CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

त्रयोदशवर्षे प्रथमोऽङ्कः

१५ जनवरी, १९९१

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली—११००५९

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

परामर्शदातृ-मण्डलम्

१. आचार्य डा० रमेशचन्द्र शुक्लः २. आचार्य श्री श्रीनिवास रथः
३. डा० कृष्णकान्त शुक्लः ४. डा० राजेन्द्र मिश्रः
५. डा० उमाकान्त शुक्लः ६. डा० विष्णुकान्त शुक्लः

अर्वाचीनसंस्कृतम् (१३/१)

(R. N. 34554/79)

(१५ जनवरी १९९१ ई०)

विषय-सूचिः

	विषयः	लेखकः	पृष्ठांकः
१.	सम्पादकीयम्		क—ख
२.	अर्वाचीनसंस्कृते १९९० यावत्प्रकाशिता लेखा रचनाश्च	डा० चन्द्रमौलि शुक्लः	१
३.	केचित्काव्यानुवादाः	डा० रमाकान्त शुक्लः	२५
४.	रक्ष्यतां सर्वथेदं सदा संस्कृतम्	आचार्य वीरेन्द्र कुमार झा	२९
५.	दुस्समयः	प्रताप वन्द्योपाध्यायः	३१
६.	शाकुन्तलीयम्	डा० कैलाशनाथ द्विवेदी	३३
७-	चाटुल-पञ्चदशी	डा० दादूराम शर्मा	४०
८.	उत्कोचाष्टकम्	" "	४१
९.	हरियाणाकविः श्रीलछमन सिंह अग्रवालः 'लक्ष्मणः'	आनन्दवर्धन शुक्लः	४३
१०.	देववाणी-परिषद्वार्ता	रमा शुक्ला	४५
११.	संस्कृत-जगद्वार्ता	आ०व०शु०, डा० रवीन्द्रनागरः	४६

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली ।
२. प्रकाशनकालावधिः—त्रैमासिकम् ।
३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।
४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतो सत्यमस्ति ।

—डा० रमाकान्त शुक्लः
प्रकाशकः, सम्पादकः

१५-१-१९९१

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्पादकीयम्

अनेनाङ्केन 'अर्वाचीनसंस्कृतं' त्रयोदशवर्षं प्रविशति । अस्य प्रवर्तन-कालेऽस्माभिश्चिन्तितमासीद् यदस्य प्रकाशनं दशवर्षपर्यन्तमवश्यं भवेदिति । परमेश्वरेण सा समीहा पूरिता । ततोऽधिकतरमपि वर्षद्वयायास्य प्रकाशनमभवत् । अद्यपर्यन्तं सहस्रत्रयाधिकपृष्ठेषु संस्कृतस्यार्वाचीनरचनाविषयिणी या सामग्री प्रकाशिता जाता तस्य सूचिरस्मिन्नङ्के दीयते । इयं सूचिः डा० चन्द्रमौलि शुक्लेन निर्मिता । एतेन सिंहावलोकनेनेदं सुस्पष्टं भवति यत्संस्कृतेऽद्यापि नवनवा रचनाः यया स्फूर्त्या विरच्यन्ते सा देववाण्या लोकवाणीत्वमपि प्रतिपादयति ।

एतदतिरिक्तमस्मिन्नङ्के पञ्च पद्यरचनाः प्रकाश्यन्ते । आचार्य वीरेन्द्र कुमार झा महाभागः 'रक्ष्यतां सर्वथेदं संस्कृतम्' इयेतस्यां रचनायां संस्कृतस्य महत्त्वं वर्णयन् तस्य रक्षायै जनानाह्वयति । 'दुस्समय' इत्यत्र श्री प्रतापवन्द्योपाध्यायमहाभागः कवीन्द्ररवीन्द्रनाथठाकुरस्य काव्यमनुवदति । अनुवादो मूलं विनापि हृदयग्राही वर्तते तथा च संस्कृतस्य प्रौढि प्रकटयति । 'शाकुन्तलीयम्' इत्यस्यां प्रवन्धरचनायां डा० कैलाशनाथद्विवेदि-महाभागेन सुप्रसिद्धं शकुन्तलावृत्तं वर्णवृत्तैः सरलया शैल्या प्रस्तूयते । अत्र रचनायां पारम्परीणा विद्वांसः 'संयोगे गुरु' रित्यस्य पालनं क्वचिदवहेलनापथमानीतं द्रक्ष्यन्ति किन्त्वद्यत्वे संयुक्ताद्यस्य वर्णस्य अगुरुत्वं नैकै रचनाकारैः क्रियते । अत्र आधुनिकाः काव्यशास्त्रिणः पुर्नविचारं कर्त्तुं मर्हन्ति । 'चाटुल-पञ्चदशी' 'उत्कोचाष्टकम्' इति रचनाद्वये डा० दादूराम शर्मा स्वव्यङ्ग्य-वचोभिः चाटुकाराणाम् उत्कोचस्य च व्यापकतामुन्मीलयति । अत्र रचना-द्वयेऽपि किं वृत्तं कीदृशी च भाषा इत्यपि काव्यज्ञैर्विचारणीयम् । अस्माभि-रेतद्रचनाद्वयमिति कृत्वा प्रकाश्यते येन रचनाकर्तुर्विचारा बहुजनसंवेद्याः स्युः ।

'केचित्काव्यानुवादाः' इत्यत्रानेन जनेन श्रीशान्तप्रकाश 'सत्यदास' प्रणीतं 'अशआर-रसधारः' इति काव्यं किञ्च डा० परड्डीमल्लिकार्जुन-प्रणीतं 'कबीरदासशतकम्' तथा 'सटीकं बसवेश्वरशतकम्' इति रचनाद्वयमवलम्ब्य प्राधान्येन विचारविमर्शः क्रियते ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/S

हरियाणाकविः श्रीलछमनसिंह अग्रवालः 'लक्ष्मण' इत्यस्मिल्लेखे श्रीआनन्दवर्धनशुक्लेन बल्लबगढ़वास्तव्यश्रीलक्ष्मणस्य संक्षिप्तः साहित्यिकः परिचयो दीयते। देववाणी-परिषद्वार्तायां संस्कृतजगद्वार्तायां च विगतमासत्रये घटितानि वृत्तानि दीयन्ते।

अद्यत्वे संस्कृतपत्रिकायाः प्रकाशनमत्यन्तं दुष्करं कार्यं प्रतिभाति। अक्षरयोजनम्, प्रारूपपठनं, मुद्रणं डाकप्रेषणं सर्वमपि समयं धनञ्चापेक्षते। संस्कृतज्ञानां सहस्रेसु कश्चिदेव सशुल्कं पत्रिकां ग्रहीतुं यतते। जलबुद्बुद संनिकाशानां मन्त्रिणां तु कथैव का ? सर्वकारीयाधिकारिणः पुनः स्वहित-रक्षणे एव दत्तावधानाः। किं कथं कुतः प्रकाशितं भवतीति न किमपि तैः सविशेषं ज्ञातुमिष्यते। यदनुदानं दशवर्षाणि पूर्वं दीयते स्म तदेवाद्यापि दीयते, काममद्य मुद्रणव्ययश्चतुर्गुणतां गतो भवेत्। तथापि पत्रिकाः प्रकाश्यन्त एव। महार्घता अभ्रंलिहा वर्तते। अस्या उद्दीपनं पुनर्विश्वस्य नायका अपि स्वचेष्टितैः संविशेषं कुर्वन्ति। अद्यैव पश्चिमेशियाक्षेत्रे ईराकाय अमेरिका-नेतृत्वेबहुराष्ट्रीयसेनाप्रदत्तः समयावधिः पूर्णो भवति। श्वः किं भवतीति प्रभुरेव जानाति। एतत्तु निश्चितमेव यदस्मद्देशेऽपि महार्घता वृद्धिं गमिष्यति। अस्यां दशायां पत्रिकाशुल्कवृद्ध्यर्थं यदि प्रस्तावः क्रियते तर्हि शुल्कदातृणां व्याकुलीभावः स्यादतोऽस्मिन् वर्षे शुल्कवृद्धिर्न क्रियते किन्तु यदि चतुर्दशवर्षे अर्वाचीनसंस्कृतं प्रकाशयिष्यते तर्हि शुल्कवृद्धिर्भविष्यत्येव।

नूतने वत्सरे वो भवेन्मङ्गलम् !

विदुषामाश्रवः

रमाकान्त शुक्लः

(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

१५-१-१९९१
आर ६ वाणी-विहारः
नयी दिल्ली-११००५९

Devavani Parishad New Delhi

Devavani Parishad New Delhi

अर्वाचीनसंस्कृतं १९९० यावत्प्रकाशिता लेखा रचनाश्च

(डा० चन्द्रमौलिः शुक्लः आर-६ वाणी-विहारः, नयी दिल्ली-११००५९)

'देववाणी-परिषद्, दिल्ली' संस्थायाः त्रैमासिकं पत्रम् **'अर्वाचीनसंस्कृतम्'** १९७९ तमेशवीयेऽब्दे प्रारब्धम् । १-२-१९७९ ई० तारिकायामस्य पञ्जीकरणार्थमावेदनपत्रं प्रस्तुतम् । ६-४-१९७९ तारिकायां च एफ-२ (ए/३३९) प्रेस/सी.सी.एस/७९ संख्यकं घोषणा-पत्रमनुमतमभूत् । अर्वाचीनसंस्कृतस्य प्रवेशाङ्कः ५-६-१९७९ तारिकायां मुद्रितः । १५ जुलाई १९९९ तारिकायां च प्रकाशितोऽभूत् । तदनु १५-१०-१९७९ तारिकायां प्रथमवर्षस्य द्वितीयोऽङ्कः प्रकाशितो जातः । इत्थं प्रथमवर्षे केवलमङ्कद्वयमेव प्रकाशितमभूत् । अतः परं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबर-मासानां प्रत्येकं १५ दिनांकेऽस्य प्रकाशनं जातम् । सप्तमवर्षीयौ द्वितीयतृतीयावङ्कौ संयुक्तरूपेण १५ अप्रेल १९८५ तारिकायां प्रकाशितावभूताम् । सप्तमवर्षीयश्चतुर्थोऽङ्कः ३१ अक्टूबर १९८५ तारिकायां प्रकाशितोऽभूत् । अष्टमवर्षीयः प्रथमोऽङ्कः ३० जनवरी १९८६ ई० तारिकायां प्रकाशितोऽभूत् । नवमवर्षीयः प्रथमोऽङ्कः २६ जनवरी १९८७ तारिकायां प्रकाशितोऽभूत् । द्वादशवर्षीयश्चतुर्थोऽङ्कश्च ७ नवम्बर १९९० तारिकायां प्रकाशितोऽभूत् । शेषे सर्वेऽप्यङ्का यथातिथि प्रकाशिता जाताः । अस्य पञ्जीकरणसंख्या आर. एन. ३४५५४/७९ अस्ति । घोषणापत्रमनुरुध्य अंग्रेजी-हिन्दी-संस्कृत-भाषासु रचिता लेखाः संस्कृतभाषानिबद्धा रचनाश्चात्र प्रकाशिताः जाताः । प्राधान्यं संस्कृतभाषाया एवास्ति । १९९० यावत् ४५ पुटकेषु, ३२९६ पृष्ठेषु[1]

---

१. मूलपृष्ठसंख्या ३१०८+अतिरिक्तपृष्ठसं. ६+ चित्रमयपृष्ठसं, ४+ आवरणपृष्ठसं. १७८=योगः ३२९६

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्पादकीयान्यतिरिच्य १०० समीक्षकात्मकाः शोधपराः सूचनापराश्च लेखाः २२० संख्याकाश्च संस्कृतरचनाः प्रकाशिताः। रचनासु खण्डकाव्य - पुराणकाव्य - गद्यकाव्य - गद्यप्रबन्ध-नाटक-ध्वनिनाटक-अष्टक - शतककाव्य - स्तोत्रकाव्य-गीत - गजल-मुक्तक - कथा-ललित-निबन्ध-अनुवादकाव्य-समस्यापूर्ति- यात्राकाव्य-स्फुटकवितादिविविध-काव्य-रूपाणि विद्यन्ते । अर्वाचीनसंस्कृते प्रकाशिता नैका रचनाः स्वतन्त्रग्रन्थरूपेणापि प्रकाशिताः जाताः। अर्वाचीनसंस्कृतस्य संस्थापकप्रधानसम्पादको डा० रमाकान्त शुक्लमहाभागोऽस्ति यो हि विगत-द्वादशवर्षेभ्यः पत्रमिदमग्रे नयति। अस्य पत्रस्य परामर्शदातृमण्डलस्य वर्तमानसदस्याः सन्ति—अचार्य रमेशचन्द्र शुक्लः, अचार्य श्रीनिवास रथः, डा० कृष्णकान्त शुक्लः, डा० राजेन्द्र मिश्रः, डा० उमाकान्त शुक्लः तथा च डा० विष्णुकान्त शुक्लः। अस्मिन् पत्रे अर्वाचीनसंस्कृतरचनास्तत्सम्बद्धा लेखाश्च प्रकाश्यन्ते। साम्प्रतिकैरनेकैर्लेखकै रचनाकर्तृभिश्चात्र सहयोगः क्रियते। १९९० ई० पर्यन्तमर्वाचीनसंस्कृते प्रकाशितानां लेखानां मौलिकरचनानां च सूची लेखकनामनिर्देशपुरस्सरम् अत्र प्रस्तूयते—

समीक्षात्मका लेखाः

वर्षम् १ अंकः १ जुलाई १९७९

१. **विंश्यां शताब्द्यां रचितानां संस्कृतमहाकाव्यानामितिहासलेखनस्यावश्यकता** (डा० रमाकान्तशुक्लः)
२. **'क्षत्रपतिचरित'-मीमांसा** (डा० रामसुरेशपाण्डेयः)
३. **'शिवराज्योदय-समीक्षा'** (डा० रमेशचन्द्र शुक्लः)
४. **'सीताचरित'–समीक्षणम्** (डा० कृष्णकान्त शुक्लः)
५. **श्रीस्वामिविवेकानन्दचरितस्य महाकाव्यत्वम्** (डा० (श्रीमती) शशि तिवारी)
६. **'दयानन्ददिग्विजय'-वैशिष्ट्यम्** (श्रीमती शशि कुमार)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अंकः २ अक्टूबर १९७९

७. श्रीनेहरुपरकसंस्कृतमहाकाव्येषु मानवमूल्यानि (डा० रमेशचन्द्र शुक्लः)

८. 'जवाहरदिग्विजय' महाकाव्ये नायकपरिकल्पनम् (डा० राजेशकुमार भारद्वाजः)

वर्षम् २ अंकः १ जनवरी १९८०

९. कविरत्न ब्रह्मानन्द शुक्ल और उनका 'नेहरूचरित' महाकाव्य (डा० रेवाप्रसाद द्विवेदी)

१०. गोस्वामिबलभद्रप्रसादशास्त्रिकृतं 'नेहरूयशःसौरभम्' (डा० रमेशचन्द्र शुक्लः)

अंक : २ अप्रैल १९८०

११. जवाहरज्योतिर्महाकाव्यस्य समीक्षणम् (डा० रमेशचन्द्र शुक्लः)

१२. 'श्रीनेहरूचरित'-'नेहरूयशःसौरभ'-महाकाव्ययोः सूक्तिविधानम् (डा० रमाकान्त शुक्लः)

अंकः ३ जुलाई १९८०

१३. डा० सी० आर० स्वामिनाथ-कृतरचनात्रयस्य समीक्षणम् (डा० रमाकान्त शुक्लः)

वर्षम् ३ अंकः १ जनवरी १९८१

१४. भाति मे भारतम् (समीक्षा) (डा० रमेशचन्द्र शुक्लः)

१५. श्रीमदप्पयदीक्षितचरितस्य पूर्वभूमिः (डा० हरिनारायण दीक्षितः)

अंकः २ अप्रैल १९८१

१६. 'दयानन्दचरित'-समीक्षा (डा० रमेशचन्द्र शुक्लः)

अंकः ३ जुलाई १९८१

१७. 'क्रिस्तुभागवत'-समीक्षा (डा० रमेशचन्द्र शुक्लः)

अंकः ४ अक्टूबर १९८१

१८. 'श्रीकृष्णचरित'-समीक्षा (डा० जयकुमार जैनः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१९. 'जानकीजीवन'-समीक्षा (डा० कौशलचन्द्र मिश्रः)
२०. 'श्रीद्वारकाधीशमहाकाव्य'-समीक्षा (डा० रमाकान्त शुक्लः)
२१. निर्माणाधीनं महाकाव्यं 'श्रीनेहरूचरितम्'
(डा० रमाकान्त शुक्लः)

वर्षम् ४ अंकः १ जनवरी १९८२

२२. 'सुगमरामायण'-समीक्षा (डा० रमाकान्त शुक्लः)
२३. 'सुगमरामायण'-विमर्शः (डा० रमेशकुमार लौ)
२४. अर्वाचीनसंस्कृतरचनामध्ययनाध्यापनयोः प्रासङ्गिकता
(डा० (श्रीमती) शशि तिवारी)
२५. शिवराजविजये राष्ट्रियभावना
(डा० हरिनारायण दीक्षितः)

अंकः २ अप्रैल १९८२

२६. मुनिश्रीज्ञानसागरकृतिसु समाजो राजनीतिरर्थश्च
(डा० किरण टण्डनः)
२७. 'भाति मे भारत'मिति काव्ये राष्ट्रियभावना
(डा० हरिनारायण दीक्षितः)
२८. अर्वाचीनसंस्कृतगद्यसमीक्षणम् (डा० कैलाशनाथ द्विवेदी)
२९. कतिपया उल्लेखनीया अर्वाचीनसंस्कृतरचनाः
(डा० रमाकान्त शुक्लः)

अंकः ३ जुलाई १९८२

३०. राधाकृष्णरसायनप्रणेता (डा० सी. आर. स्वामिनाथन्)
३१. श्री ओट्टूर उण्णिनम्बूदिरीपादविरचितं 'राधाकृष्ण-
रसायनम् (डा० रमाकान्त शुक्लः)
३२. स्वातन्त्र्योत्तर संस्कृतकाव्यम् (डा० रमेशचन्द्र शुक्लः)
३३. 'सेतुबन्ध' नाटक-समीक्षा (आचार्य लक्ष्मीचन्द्र कौशिकः)

अंकः ४ अक्टूबर १९८२

३४. 'भाति मे भारतम्': काव्यदर्शनम्
(डा० शिवदत्त शर्मा चतुर्वेदी)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वर्षम् ५ अंकः १ जनवरी १९८३

३५. 'एक विश्वास और' इत्येतस्मिन् काव्ये मामकीनो विचारः (आचार्य रमेशचन्द शुक्लः)

अंकः ३ जुलाई १९८३

३६. ग्रन्थसमीक्षणम् (रमाकान्त शुक्लः)

अंकः ४ अक्टूबर १९८३

३७. श्रीपादपरागशुद्धिपत्रम् (सम्पादकः)

३८. श्रीपादसप्ततेः श्रीपादपरागाख्या व्याख्या (डा० सी० आर० स्वामिनाथन्)

३९. पुस्तक-समीक्षा (सम्पादकः) (डा० रमाकान्त शुक्लः)

४०. देववाणी-परिषदोऽष्टमसङ्कल्पननादिवसे मुख्यातिथेः श्री पी०के० थुंगन,-महाभागस्याभिभाषणम् (श्री पी० के० थुंगन, उपशिक्षामन्त्री, भारतसर्वकारस्य)

वर्षम् ६ अंकः १ जनवरी १९८४

४१. पुस्तकपरिचयः (डा० रमाकान्त शुक्लः)

अंकः २ अप्रैल १९८४

४२. 'जय भारतभूमे'-काव्यस्य मूल्याङ्कनम् (डा० हरिनारायण दीक्षितः)

४३. गन्धदूतस्य समीक्षा (डा० रमेशचन्द्र शुक्लः)

४४. विंशशताब्दीयसंस्कृतवाङ्मयाय पञ्चाम्बुप्रदेशस्य योगदानम् (डा० शिवप्रसाद भारद्वाजः)

४५. विंशशताब्दीयरामकाव्यपरम्परायां 'श्रीरामविलापः' (डा० रमाकान्त शुक्लः)

४६. महाकविमुनिश्रीज्ञानसागरस्य संस्कृतकाव्येषु गीतानि (डा० किरण टण्डन)

४७. नवप्रकाशचर्चा (डा० रमाकान्त शुक्लः)

अंकः ३ जुलाई १९८४

४८. प्रकाशनचर्चा (डा० रमाकान्त शुक्लः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अंकः ४ अक्टूबर १९८४

४९. **प्रकाशनचर्चा** (डा० रमाकान्त शुक्लः)

वर्षम् ७ अंकः १ जनवरी १९८५

५०. **अभिनवप्रकाशनचर्चा** (डा० रमाकान्त शुक्लः)

अंकः २-३ अप्रैल-जुलाई १९८५

५१. **भारतस्य महामहिमोपराष्ट्रपतिश्रीरामस्वामीवेंकटरामन् महाभागानां सन्देशः** (श्री आर० वेंकटरामन्)

५२. **प्रधानमन्त्रिणः सूचनापरामर्शदातुः श्री० एच० वाई० शारदाप्रसाद महाभागस्य सन्देशः**

५३. **सहर्षमभिनन्दनम्** (आचार्य विश्वनाथ शास्त्री)

५४. **सन्देशः** (डा० जयमन्त मिश्रः)

५५. **राजतां मोदतां तद्विशिष्टं महः** (डा० कृष्णकान्त शुक्लः)

५६. **सन्देशः** (श्री स० रामकृष्णन्)

५७. **सन्देशः** (श्री सी० आर० पट्टाभिरामन्)

५८. **सन्देशः** (श्री ईश्वर भाई पटेलः) (श्री एन०एम० कंसारा)

५९. **श्रीयुतः शात्तपुर-रामकृष्ण स्वामिनाथः** (श्री अ० कृप्पुस्वाम्यार्यः)

६०. **डा० स्वामिनाथः-एक दिव्यं जीवनम्** (अचार्य रामदयालु शास्त्री)

६१. **एकोऽपि कर्मभिरनेकः डा० स्वामिनाथः** (डा० हर्षनाथ मिश्रः)

६२. **डा० सी० आर० स्वामिनाथन् : स्वातन्त्र्योत्तर संस्कृत प्रगति के सूत्रधार** (डा० मण्डन मिश्रः)

६३. **श्रीपादसप्ततेः डा०स्वामिनाथकृता 'श्रीपादपराग'व्याख्या** (आचार्य सोहनलाल शास्त्री)

६४. **डा० सी० आर० स्वामिनाथ-प्रणीतस्य 'श्रीबदरीशसुप्रभात'स्तोत्रकाव्यस्य समीक्षा** (आचार्य रमेशचन्द्र शुक्लः)

६५. **भव्यं व्यक्तित्वम्** (आचार्य वि० वेङ्कटाचलम्)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६६. **Dr. C. R. Swaminathan : A Real Scholar**
(Prof. N. H. Ansari)

६७. **शुभाशंसा** (श्री वी॰ आर॰ शर्मा)

६८. **अभिनन्दनोक्तिः** (प्रो॰ एन॰ एस॰ रामानुजताताचार्यः)

६९. **क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे**
(श्री शास्तृल विश्वनाथ शर्मा)

७०. **संस्मरणम्** (डा॰ उमारमण झा)

७१. **डा॰ स्वामिनाथन् के प्रति** (श्री त्रिलोकीनाथ धर)

७२. **मूर्तिमयी वेदसंस्कृतभक्तिः** (श्री नट्टुविल पषेटन्तु नारायणन् नम्पूतिरिः)

७३. **विद्याविनयसम्पन्नाः स्वामिनाथाः** (श्री साम्बदीक्षितः)

७४. **देववाणी-परिषद्वार्तासु स्वामिनाथाः** (श्रीमती रमा शुक्ला)

७५. **कविचूडामणेः स्वामिनाथमहोदयस्य कर्णभूषणम्**
(श्री भरत पिषारटिः)

७६. **स्वामिनाथरचनापरिचयः** (डा॰ रमाकान्त शुक्लः)

७७. **सहृदयवयस्यः स्वामिनाथः** (डा. टी. एन. धर्माधिकारी)

७८. Message (V.S. Mani Iyer)

अंकः ४ अक्टूबर १९८५ .

७९. **देववाणी-परिषदः सप्तमेऽष्टमे च संयुक्ते वार्षिकाधिवेशने महासचिवेन प्रस्तुतं वार्षिकविवरणम् आयव्ययविवरणम् च**
(डा॰ रमाकान्त शुक्लः)

८०. **भवतामभिमतम् (पत्रम्)** (पं॰ वसन्त गाडगीलः)

८१. **भवतामभिमतम् (पत्रम्)** (वन्दना सेलूकरः)

वर्षम् ८ अंकः ४ अक्टूबर १९८६

८२. **पं रामशरण शास्त्रिकृत—'कौमुदीकथाकल्लोलिनी' समीक्षणम्** (डा॰ चन्द्रभानु त्रिपाठी)

वर्षम् ९ अंकः १ जनवरी १९८७

८३. **अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः** (श्रीमती शशिप्रभा गोयल)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

८४. 'लक्ष्मीशतके' उदाहृतानामाख्यानकानां संग्रहः
(प्रो० वरदाचार्य कण्णन्)

अंकः २ अप्रैल १९८७

८५. ज्ञानमूर्तिः श्रीचारुदेवशास्त्री (डा० रमाकान्त शुक्लः)

वर्षम् १० अंकः २ अप्रैल १९८८

८६. काव्ये 'सब्लाइम' नामधेयम् उदात्तम्
(डा० रमाशङ्कर तिवारी)

अंकः ३ जुलाई १९८८

८७. नवप्रकाशनचर्चा-श्रीरेवाभद्रपीठकाव्यम्
(श्री सदाशिव कुमार द्विवेदी)

वर्षम् ११ अंकः २ अप्रैल १९८९

८८. श्रीगान्धिचरित वैशिष्ट्यम् (डा० रमाकान्त शुक्लः)

अंकः ३ जुलाई १९८९

८९. भवतामभिमतम् (प्रो० परमानन्द शास्त्री)

९०. भवतामभिमतम् (श्री कमलापति मिश्रः)

वर्षम् १२ अंकः १ जनवरी १९९०

९१. श्री गान्धिचरितस्य रचनाशिल्पम् (डा० सत्यव्रतः शास्त्री)

९२. 'मङ्गल्या' समीक्षणम् (अचार्य लक्ष्मीचन्द्र कौशिकः)

९३. सागरे समयोजिता आधुनिक-संकृतसाहित्य-संगोष्ठी
(डा० सूर्यप्रकाश व्यासः)

अंकः २ अप्रैल १९९०

९४. क्व गच्छानि क्व यानि ? (डा० कृष्णनारायण पाण्डेयः)

९५. स्वरमंगलायाः श्रीनेहरूविशेषांकः (नवप्रकाशनचर्चा)
(श्री अरविन्दनाभ शुक्लः)

९६. काव्योन्मेषः (नवप्रकाशनचर्चा)
(श्री श्री० भि० वेलणकरः)

९७. जीवनमुक्तकम् (नवप्रकाशनचर्चा)
(डा० रमाकान्त शुक्लः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

८८. **'भाति मे भारतं' वीक्ष्य** (संकलयित्री कु० वन्दना मिश्रा)
अस्मिन् शीर्षके संकलिताः अभिमतदातारो विद्वांसः—
डा० करुणापति त्रिपाठी, डा० नगेन्द्रः, डा० मण्डन मिश्रः डा० रामकरण शर्मा, प्रो० रेवाप्रसाद द्विवेदी, डा० देवीदत्त शर्मा, डा० मारुतिनन्दन पाठकः, डा० रमेश-चन्द्र रस्तोगी, श्री हरिमाधवशरणः, श्री एस. बी. वेलणकरः, प्रा० हरिश्चन्द्र रेणापुरकरः, डा० प्रकाश पाण्डे, डा० पुष्पा दीक्षिता, डा० दीपक घोषः, श्री दीनदयाल चतुर्वेदी, डा० विश्वम्भरः मिश्रः 'वागीशः', श्री विश्वनाथ शास्त्री, श्री मुकुल शर्मा, डा० लक्ष्मी-नारायण अग्रवालः, श्री राधेश्याम शर्मा, श्री अनन्तराम गौड़ः, स्निग्धा, अजदक, श्री आर० के० नरूला, श्री चन्द्र-भान शर्मा, डा० रवीन्द्र नागरः, याज्ञिकसम्राट् पं लालन-कृष्ण शास्त्री

९९. **देववाणी-परिषद्वार्ता प्रायः प्रत्येकमङ्के**
(डा० रमाकान्त शुक्लः, श्रीमती रमा शुक्ला, डा० रवीन्द्र नागरः)

१००. **संस्कृत-जगद्वार्ता (प्रायः प्रत्येकङ्कम्)**
(ले. श्रीमती रमा शुक्ला, डा० रवीन्द्र नागरः, डा० विन्ध्येश्वरीप्रसाद मिश्र आनन्दवर्धनशुक्लो वा)

मौलिकरचनाः

अस्यां सूच्यां प्रायः कविता एव सन्ति। अन्यथाभावे कोष्ठकेषु साहित्यविधायाः संकेतः क्रियते :—

वर्षम् २ अंकः २ अप्रैल १९८०

१. **सप्तपदी** (पं० क० न० वरदराज अयंगारः)
२. **भूतले भाति मेऽनारतं भारतम्** (संक्षेपः)
(डा० रमाकान्त शुक्लः)

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३. देववाणी-वसन्तः (पं बटुकनाथ शास्त्री खिस्ते)
४. भारतवन्दनम् (डा० वासुदेवकृष्ण चतुर्वेदः)
५. राजधान्याः सुषमावर्णनम् (डा० जगदीशदत्त दीक्षतः)
६. महामाये ! (डा० राजेन्द्र मिश्रः)
७. अहम् नेता ! (पण्डितविष्णुकान्तशुक्लः)
८. ते के न जानीमहे ! (डा० कृष्णकान्त शुक्लः)
९. दुराशा (डा० शिवप्रसाद भारद्वाजः)
१०. अयि केसरिन् ! (डा० सुधाकराचार्य त्रिपाठी)
११. शिक्षा च का यत्र न संस्कृतं स्यात् ? (वैद्य रामस्वरूप शास्त्री)
१२. आचाररूपकम् (पं रघुप्रसाद चतुर्वेदः)
१३. रसिकता सिकता कणिका कुतः (आचार्य आनन्द झा)
१४. गीर्वाणवाणीस्तवः (श्री विशुद्धानन्दशास्त्री)

अंकः ३ जुलाई १९८०

१५. कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्)
१६. ध्वस्तं कुसुमम् (डा० सी० आर० स्वामिनाथन्)
१७. नरबलिप्रबन्धः (डा० सी० आर० स्वामिनाथन्)

अंकः ४ अक्टूबर १९८०

१८. भूतले भाति मेऽनारतं भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)

वर्षम् ३ अंकः १ जनवरी १९८१

१९. श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायण दीक्षितः)

अंकः २ अप्रैल १९८१

२०. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)

अंकः ३ जुलाई १९८१

२१. आभाणकमञ्जरी (पं० टी० वी० परमेश्वर अय्यरः)
२२. सुरभारती विजयते (डा० रमाकान्त शुक्लः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अंकः ४ अक्टूबर १९८१

२३. **संस्कृतवागष्टकम्** (श्री उमाकान्त शुक्लः)

वर्षम् ४ अंकः २ अप्रैल १९८२

२४. **अन्योक्तिस्तबकम्** (कविरत्न श्रीकृष्ण सेमवालः)

२५. **जीवनं सारभूतम्** (डा० कृष्णकान्त शुक्लः)

२६. **संवेदनं निवेदनं च** (श्री मथुरादत्त जोशी)

२७. **अन्धकारः** (श्री हर्षदेव माधवः)

अंकः ३ जुलाई १९८२

२८. **भारते भासतां भारती संस्कृतिः** (डा० वनेश्वर पाठकः)

अंकः ४ अक्टूबर १९८२

२९. **अभिनवहनुमन्नाटकम्** (नवाङ्केषु) (डा० रमेशचन्द्र शुक्लः)

३०. **भाति मे भारतो भारतेऽनारतम्** (आचार्य वेदानन्द झा)

३१. **व्यवधानम्** (अध्यापक केशवचन्द्र दाशः)

वर्षम् ५ अंकः १ जनवरी १९८३

३२. पं० टी०वी० परमेश्वर अय्यर प्रणीतानि स्तबकाष्टके वर्गीकृतानि चतुस्त्रिंशदष्टकानि (साहित्यकौतुकम्)। अष्टकानां शीर्षकाणि इत्थं सन्ति १. **श्रीरुद्राष्टकम्** २. **श्रीकृष्णाष्टकम्** ३. **श्रीमद्भारताष्टकम्** ४. **राष्ट्रनेत्रष्टकम्** **सैनिकाष्टकम्**, ६. **विद्वदष्टकम्**, ७. **भिक्षुकाष्टकम्**, ८. **द्रविणाष्टकम्**, ९. **वस्त्राष्टकम्**, १०. **भोजनाष्टकम्** ११. **वेश्माष्टकम्**, १२. **ख्रिस्तुदेवाष्टकम्** १३. **श्रीकालिदासाष्टकम्**, १४. **श्रीरामाष्टकम्**, १५. **श्रीगान्ध्यष्टकम्**, १६. **श्रीदयानन्दाष्टकम्** १७. **श्रीविनोबाष्टकम्** १८. **चलच्चित्राष्टकम्**, १९. **पत्रिकाष्टकम्**, २०. **निद्राष्टकम्**, २१. **प्रेमाष्टकम्**, २२. **योषाष्टकम्**, २३. **पादपाष्टकम्**, २४. **ग्रामाष्टकम्**, २५. **पुर्यष्टकम्**, २६. **सिंहाष्टकम्**, २७. **हंसाष्टकम्**, २८. **गर्दभाष्टकम्**, २९. **करीन्द्राष्टकम्**, ३०. **काकाष्टकम्**, ३१. **दानाष्टकम्**, ३२. **धर्माष्टकम्**,

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३३. भक्त्यष्टकम्, ३४. मोक्षाष्टकं च ।
(प्रणेता—पं० टी. वी.. परमेश्वर अय्यर:)

अंक: २ अप्रैल १९८३

३३. **स्फूर्तिसप्तशती** (आर्याभाग:) (अत्र ५४ शीर्षकेषु ६१९ पद्यानि संकलितानि ।अष्टमं शीर्षकं विहाय सर्वत्र आर्याच्छन्दः प्रयुक्तम् । शीर्षकनामानि यथा—१. राधा २. कृष्णद्वैपायन:, ३. मङ्गलम्, ४. प्रतिभा, ५. उपनिषत्, ६ गीता ७. लोकमान्यतिलक:, ८. महात्मा गान्धी, ९. श्रद्धा १०. स्मृतिलोला, ११. संस्कृतभाषा चिरं जयति, १२. सहृदयसम्बुद्धिः १३. सहयोगः १४. कथा, १५. दृश्यावलि:, १६. औदार्यम्, १७. एकान्ता:, १८. मेघमाला, १९. मेघा: २०. वेदना, २१. सिद्धस्थानम्, २२. स्वरलहरी, २३. साऽपि, २४. दूरे-अन्तिके, २५. ऊर्जा विद्युत्, २६. रति:, २७. जीवनम्, २८. संघर्ष:, २९. आह्वानम् ३०. भाषा विवशा, ३१. विवशता, ३२ प्रेरणा, ३३. वैज्ञानिक धारा, ३४. कुण्ठा ३५. निषेधकाव्यायितम् ३६. पुरातनं सुन्दरं भवति, ३७. सांस्कृतिकीं रात्रिमासूते, ३८. मिश्रणवेला, ३९. उपेक्षा, ४०. क्रोधशक्ति:, ४१. कृपाणधारा, ४२. धैर्यम्, ४३. काम:, ४४. परिचय-महिमा, ४५. निन्द्यतायामाशा, ४६. बहुमतम्, ४७. अवमूल्यनम्, ४८. नैपुण्योद्घोष:, ४९. परस्परम्, ५०. धिक् तान्, ५१. किन्तुशतकम् ५२. आर्या, ५३. आशा, ५४. तिथि:)
(प्रणेता डा० शिवदत्त शर्मा चतुर्वेदी)

३४. **राजस्थानम्** (डा० रमाकान्त शुक्ल:)

३५. **देववाणी-संस्कृतम्** (श्रीलक्ष्मणप्रसाद गौतम:)

अंक: ३ जुलाई १९८२

३६. **स्फूर्तिसप्तशती** (समस्यापूर्तय:, नानाच्छन्दांसि, गीतानि च) अत्र ४२ (५५-९६) शीर्षकेषु १०० पद्यानि संकलि-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तानि सन्ति। शीर्षकनामानि यथा— ५५. परिवेशः, ५६. वारिवाहः, ५७. शरन्नितान्तम्, ५८. वसन्तः ५९. वाणी-विलसितम्, ६०. राजते राजनीतिः, ६१. वसुन्धरा, ६२. गणयति, ६३. लम्पटाः, ६४. कालिदासः, ६५. प्रणामाञ्जलिः, यज्ञोपवीतम्, ६७. वन्दामहे, ६८. प्रीतिमुत्पादयन्तु, ६९. भवानी, ७०. चातुरी, ७१. वेदाभिधान महः ७२. का कथा, ७३. नारी, ७४. गुणानां गणः, ७५. परीक्षा, ७६. न हसितमथो नापि रुदितम्, ७७. सङ्गमः, ७८. नामापि न ज्ञायते, ७९. को विहातुं समर्थः, ८०. अनुकरणम् ८१. वन्दामहे ८२. दयामयी, ८३. दर्शनम्, ८४. सुषमापारावारम्, ८५. संस्कृत-स्नेहिनां कुर्महे स्वागतम्, ८६. क्रान्तिकारिणी-कविता, ८७. संस्कृत-कविता, ८८. धिङ् मेघ !, ८९. सर्वं-जानीमः, ९०. महतां महत्त्वम्, ९१. धन्या धरा ममेयम्, ९२, नूतनम्, ९३. तानि पदानि, ९४. समयप्रवाहः ९५. किं चिन्त्यते, ९६. सविनयम् च)

(प्रणेता डा० शिवदत्त शर्मा चतुर्वेदी)

३७. पूर्णकुम्भः (ललितनिबन्धसंग्रहः)

(अत्र दश ललितनिबन्धाः संकलिताः तद्यथा—१. सहारनपुरस्य घण्टागृहश्रृंगाटकम्, २. एकं वरयात्रा-दर्शनम्, ३. काल-महिमा, ४. पूर्णकुम्भः ५. नैनीतालश्रीः ६. न सः पुनरावर्तते, ७. श्री वेङ्कटेश-मन्दिरम् ८. विवेकानन्दशिला, ९. अहमपि भारतीयः ? १०. पञ्च च मे ।)

(रचयिता—पं. विष्णुकान्त शुक्लः)

अंकः ४ अक्टूबर १९८३

३८. श्रीपादसप्ततिः (स्तोत्रकाव्यम् । ७१ शार्दूलविक्रीडितानि)

(मेलपत्तूरभट्टतिरि श्रीनारायण भट्टपादः)

३९. अहं स्वतन्त्रता भणामि (डा० रमाकान्त शुक्लः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वर्षम् ६ अंकः १ जनवरी १९८४

४०. **श्रीबदरीशतरङ्गिणी** (११२ पद्यानि) (श्री श्रीसुन्दरराजः)

४१. **सुरश्मिकाश्मीरम्** (१०८ पद्यानि) (श्री श्रीसुन्दरराजः)

४२. **कामयेऽहम्** (डा० कृष्णकान्त शुक्लः)

४३. **अष्टकद्वयम्** (श्रीश्रद्धाष्टकं स्वतन्त्रताष्टकं च)
(डा० उमाकान्त शुक्लः)

४४. **उज्जयिनीयं जयति** (डा० रमाकान्त शुक्लः)

अंक २ अप्रैल १९८४

४५. **ईहे** (श्रीश्रीसुन्दरराजः)

४६. **भाति मौरीशसम्** (डा० रमाकान्त शुक्लः)

अंकः ३ जुलाई १९८४

४७. **समयानुसारं चलतु** (श्री गणपति शुक्लः)

४८. **गीतवल्लरी** (अत्र १४ गीतानि सङ्कलितानि, यथा—
१. निखिलवाङ्मयदेवते ! जय, २. प्रभात-गीतिः, ३. गायत्री-गानम्, ४. जलदोपालम्भगीतम् ५. प्रावृड्-गीतम्, ६. एहि नन्दलाल !, ७. परुषं प्रीतिविधानम् ८. नववर्षगीतम्, ९. उद्बोधनम्, १०. कथं जातम् ११. वद विधुवदने !, १२. पश्य मुकुरे क्षणं नु वदनं स्वम्, १३. क्षणिका, १३. अहो ! अद्य यूनां गतिः का नु जाता !)
(प्रणेता—डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनय':)

४९. **पुरश्चरणकमलम्** (नाटकम्) (डा० रमाकान्त शुक्लः)

५०. **पण्डितराजीयम्** (संस्कृतरेडियोनाटकम्)
(डा० रमाकान्त शुक्लः)

अंकः ४ अक्टूबर १९८४

५१. **अभिशापम्** (ध्वनिनाटकम् (डा० रमाकान्त शुक्लः)

५२. **हरियाणा-संस्कृत-साहित्य-सौरभम्**
(डा० रामेश्वरदत्त शर्मा)

५३. **कश्चित्** (गज़लगीतिः) (डा० बच्चूलाल अवस्थी 'ज्ञानम्')

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५४. **प्रियया विना** (गज़लगीतिः)
(डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः')

५५. **कृष्णात्परं किमपि तत्त्वमहं न जाने** (१११ पद्यात्मकं स्तोत्रकाव्यम् (आचार्य श्रीरमेशचन्द्रशुक्लः)

वर्षम् ७ अंकः १ जनवरी १९८५

५६. **श्लोकमञ्जरी** (अत्र **१. मङ्गलम्, २. अन्योक्तयः ३. समस्यापूर्तयः-इति त्रिसु वर्गेषु इमा रचनाः संकलिताः सन्ति—१. मङ्गलम्**, मारुतिस्तुतिः, नुतिषोडशी, पिकपञ्चदशी, रङ्गपञ्चकभ्, वसन्तोल्लासः शरद्वर्णनम्, शकुन्तविलसितम्, **अन्योक्तयः,. समस्यापूर्तयः**—भद्रमूर्तिः, गजाननं वन्दे, स्मरामि, वागीश्वरी पातु वः, सज्ज्ञानचर्चा-सुधा, वसतु मे वदने सुरभारती, भिन्नरुचिर्हिलोकः, न जानीमहे, विद्युल्लता, वारिदाः)
(प्रणेता—डा० विन्ध्येश्वरी प्रसाद मिश्रः 'विनयः)

५७. **इन्दिरा-गीतिः** (६७ पद्यानि) (श्री श्रीसुन्दरराजः)

५८. **धातस्त्वया किं कृतम्** (डा० उमारमण झा)

५९. **हन्तेन्दिरार्या सहसा प्रयाता !**
(प्रा० हरिश्चन्द्र रेणापुरकरः)

६०. **कूहा** (११७ पद्यात्मकं खण्डकाव्यम्)
(डा० उमाकान्त शुक्लः)

अंकः २-३ अप्रैल-जुलाई १९८५

६१. **श्री स्वामिनाथ-प्रशस्तिः** (श्री वि० रघुराम शास्त्री)

६२. **स्वामिनाथरचनात्रयसमीक्षणम्** (पद्यात्मकम्)
(अचार्य रमेशचन्द्र शुक्लः)

६३. **श्रीस्वामिनाथ ! भवतामपि सुप्रभातम्**
(कविरत्न कृष्णप्रसाद शर्मा घिमिरे)

६४. **वर्धते स्वामिनाथः** (श्री श्रीसुन्दरराजः)

६५. **डा० स्वामिनाथानां शासनसेवानिवृत्तिसमये**
(डा० प्रभाकरनारायणः कवठेकरः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६६. **श्लोकनवकम्** (डा० स० सु० जानकी)
६७. **श्रीस्वामिनाथं प्रति** (श्री० भि० वेलणकर:)
६८. **दिवास्वप्न:** (महाकवि: अक्किक्तम्)
६९. **आर्याऽऽर्य:** (पं० आनन्द झा)
७०. **श्रीस्वामिनाथ: सुधी:** (डा० रमाशंकर त्रिपाठी)
७१. **कुसुमाञ्जलि:** (प० मोतीलाल 'पुष्कर:')
७२. **डा० सी० आर० स्वामिनाथमहोदयाय उपहारप्रसूनानि** (प्रो० बटुकनाथ शास्त्री खिस्ते)
७३. **जयतात् स्वामिनाथः** (श्री भरत पिषारटि:)
७४. **स्वामिनाथं नमामि** (डा० उमाकान्त शुक्ल:)
७५. **शुभाशसा** (आचार्य रमेशचन्द्र शुक्ल:)
७६. **श्रीस्वामिनाथाभिनन्दनम्** (श्री रत्नेश्वर झा)
७७. **श्रीस्वामिनाथं नुम:** (आचार्य विष्णुकान्त झा)
७८. **शुभाशसनम्** (डा० व० रा० लक्ष्मीकान्त शर्मा)
७९. **कस्य नो हितचिन्तका:** (आचार्य देवव्रत:)
८०. **अभिनन्दनम्** (डा० उमारमण झा)
८१. **आशंसा** (प्रो० पी० सी० वासुदेवन् एलयत्)
८२. **स्वामिनाथो विपश्चित्** (डा० इच्छाराम द्विवेदी)
८३. **अभिनन्दनपत्रम्** (समर्पका: श्रीएकरसानन्दसंस्कृतमहाविद्यालयीयप्राध्यापकाश्छात्राश्च)
८४. **अभिनन्दनपत्रम्** (मद्रपुरीस्थसंस्कृतविद्यासमितिनिर्वाहकप्रभृतय:)
८५. **अभिनन्दनपत्रम्** (श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठपरिवार:)
८६. **श्रीस्वामिनाथाय पत्रम्** (कविरत्न श्रीअमीरचन्द्र शास्त्री)
८७. **श्रीस्वामिनाथाय पत्रम्** (शीघ्रकवि: गोस्वामी हरिकृष्ण शास्त्री)
८८. **श्रीस्वामिनाथाय पत्रम्** (प्रो० के० पी० उर्मीस)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

८९. **अभिनन्दनम्**
(हरिद्वारपम्पुरीस्थाश्रमवर्तिनो विद्वांसस्तथा श्री भगवानदास-संस्कृतमहाविद्यलयस्याध्यापकाः)

९०. **नववर्षीयमभिनन्दनम्** (श्रीजीवदेवशर्मा)

९१. **स्वागतपत्रम्** (आचार्यं रामविलास शुक्लः)

९२. **विरुदसंमाननपत्रम्** (गो० सुन्दरम्)

९३. **स्वामिनाथरचनावली** (अत्र २५ रचनाः संकलिताः, यथा— **१. पशुपतिपञ्चास्यस्तवः, २. जीर्णोपधानम् ३. काकग्राही, ४. वेदविद्भ्यो नमः, ५. व्यासस्तुतिः, ६. देशिकरूपिण्यै मात्रे नमः, ७. आचार्यस्तवमणिमाला, ८. आचार्यसूक्तिमुक्तावलिः ९. जयति जयेन्द्रः, १०. श्री राघवः पद्मभूषणम्, ११. श्रीपाद-दामोदरसातवलेकराभिनन्दनम्, १२. शंकर एकेडमी, १३. गुरु-पवनपुरेशस्तवः, १४. गुरुवे नमः, १५. वात्सल्यम्, १६. शिवाय नमः, १७. जातकदोषः, १८. अन्यापदेशाः, १९. वंशोविलासः, २०. जयन्तु नृहरेर्नखाः, २१. शिशु-विलासः, २२. नीरदोऽस्मि न तु शारदाभ्रकः २३. कलिविलासः, २४. वातेशानन्द-लहरी, २५. गणेशाय नम** इति ।)
(रचयिता डा० सी०आर० स्वामिनाथन्)

अंकः ४ अक्टूबर १९८५

९४. **महाप्रयाणम्** (६७ पद्यात्मकं सांग्लहिन्द्यनुवादं काव्यम्)
(कविरत्न श्रीकृष्ण सेमवालः)

९५. **देवीन्दिराऽन्तर्हिता** (प्रो० रेवाप्रसाद द्विवेदी)

९६. **'देववाणी-परिषद्, दिल्ली'-सप्तमाष्टम संयुक्तवार्षिकाधि-वेशनावसरे अध्यक्षीयमभिभाषणम्** (४० **पद्यानि**)
(आचार्यं रमेशचन्द्र शुक्लः)

वर्षम् ८ अंकः १ जनवरी १९८६

९७. **रक्ष तं भारतम्** (श्री श्रीनिवास रथः)

९८. **नवभारतपुराणम्** (१-७ **अध्यायाः**) (डा० रमेशचन्द्र शुक्लः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

९९. भारतं भजामः (श्री अरविन्दनाभ शुक्लः)
१००. राष्ट्रदेवते ! (डा० रमाकान्त शुक्लः)
१०१. ज्योत्स्ना मेघासनमधिशयिता (डा० उमाकान्त शुक्लः)
१०२. इह तमसां राज्ये ! (डा० लीना रस्तोगी)
१०३. दंश-वेदना (डा० भास्कराचार्य त्रिपाठी)
१०४. मुक्तकानि (डा० रमेश कुमार लौ)
१०५. क्व कालिदासस्य जगाम भारती (डा० बच्चूलाल अवस्थी)
१०६. सा गीर्वाक् रमतां सदा मम मनः (कु० सुस्मिता शुक्ला)
१०७. कालातीतः (डा० सी०आर० स्वामिनाथः)
१०८. कविर्मानवश्च (डा० रामसुरेश पाण्डेयः)

अंकः २ अप्रैल १९८६

१०९. देशरक्षा कथम् ? (पं० विष्णुकान्त शुक्लः)
११०. विमानवातायनतः (डा० प्रभाकर नारायण कवठेकरः)
१११. नवभारतपुराणम् (८-११ अध्यायाः)
(आचार्य रमेशचन्द्र शुक्लः)
११२. श्रीनिवासरथाभिनन्दनपत्रम् (डा० भास्कराचार्य त्रिपाठी)

अंकः ३ जुलाई १९८६

११३. भारतजनताऽहम् (डा० रमाकान्त शुक्लः)
११४. निकषा (लघूपन्यासः) (डा० केशवचन्द्र दाशः)
११५. कीदृशी स्वतन्त्रता ? ('अभिराज' डा० राजेन्द्र मिश्रः)
११६. किमर्थम् ? (डा० राधावल्लभ त्रिपाठी)

अंकः ४ अक्टूबर १९८६

११७. रमाकान्तशुक्लाय पद्यपत्रम् (१) (प्रा० हरिश्चन्द्र रेणापुरकरः)
११८. रमाकान्तशुक्लाय पद्यपत्रम् (२) (डा० रामकिशोर मिश्रः)
११९. कविकुलगुरुवाणी (डा० बच्चूलाल अवस्थी 'ज्ञानम्')
१२०. श्री गरुडध्वजसपादशतकम् (१३० पद्यात्मकं स्तोत्रकाव्यम्)
(डा० रामकिशोर मिश्रः)
१२१. लक्ष्मीशतकम् (१०८ पद्यात्मकं स्तोत्रकाव्यम्)
(डा० वरदाचार्य कण्णन्),

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वर्षम् ९ अंक: १ जनवरी १९८७

१२२. **संस्कृतवाणी** (कविरत्न ओमप्रकाश ठाकुर:)

१२३. **कोऽहम्** (प्रो० सत्यव्रत शास्त्री)

१२४. **भारत्यर्चनम्** (डा० कैलाशनाथ द्विवेदी)

१२५. **आतङ्कवाद: पुनरुग्रवाद: द्वावेव संसारविनाशकौ तौ** (श्री रामेश्वरदत्त शास्त्री)

१२६. **श्रीगङ्गावन्दनम्** (डा० रामकिशोर मिश्र:)

१२७. **शिमला** (आचार्य श्रीनिवास रथ:)

१२८. **अहं स्वतन्त्रता भणामि** (१६ पद्यानि) (डा० रमाकान्त शुक्ल:)

१२९. **मैं स्वतन्त्रता तुम्हें पुकारती (अहं स्वतन्त्रता भणामि-कवितायाः हिन्दी–पद्यानुवाद:)** (पद्यानुवादकर्ता-डा० कृष्णमुरारि शर्मा)

१३०. **भा भव** (श्री मधुर शास्त्री)

अंक २ अप्रैल १९८७

१३१. **रौति ते भारतम्** ! (डा० रमाकान्त शुक्ल:)

१३२. **षोडशाक्षरीस्तोत्रशतकम्** (डा० शा० रा० स्वामिनाथ:)

१३३. **अनात्मवाद: खलु दु:खमूलम्** (प्रा० हरिशचन्द्र रेणापुरकर:)

१३४. **श्रीनूतनसत्यनारायणकथा** (डा० रमेशचन्द्र शुक्ल:)

१३५. **कालिदास-प्रशस्ति:** (डा० रमाशंकर तिवारी)

१३६. **प्रौढसखीसङ्गमसङ्गीतम्** (कविपुण्डरीक: श्री सम्पूर्णदत्त मिश्र:)

१३७. **आशीविष:** (प्रो० देवदत्त भट्टि:)

१३८. **अन्योक्तिद्वयम्** ('शुक उवाच' तथा 'श्येन उवाच') (डा० बच्चूलाल अवस्थी)

१३९. **मिहिरावलीं दृष्ट्वा** ('अभिराज' डा० राजेन्द्र मिश्र:)

१४०. **श्रीबदरीशस्तुति:** (डा० उमारमण झा)

१४१. **हैमन्तिकप्रार्थनम्** (डा० दीपक घोष:)

१४२. **रामगिरि-परिसर:** (डा० प्रकाश पाण्डे)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अंकः ३ जुलाई १९८७

१४३. **मामका भारतीयाः क्षणं श्रूयताम्** (डा० राजदेव मिश्रः)
१४४. **भारतीयः स एवाद्यसंकीर्त्यंते** (डा० शम्भुनाथ आचार्यः)
१४५. **विमानयात्राशतकम्** ('अभिराज' डा० राजेन्द्र मिश्रः)
१४६. **श्रीवैष्णवीदेवीयात्रावर्णनम्** (डा० उमारमण झा)
१४७. **श्रीगान्धिचरितम्** (गद्यप्रबन्धः १-३ परिच्छेदाः)
(प्रो० चारुदेवः शास्त्री)

अंकः ४ अक्टूबर १९८७

१४८. **श्रीगान्धिचरितम्** (४-६ परिच्छेदाः)
(प्रो० चारुदेवः शास्त्री)
१४९. **मेघप्रबोधनम् (क्रूरहृदय मेघ !)** (डा० रमाकान्त शुक्लः)
१५०. **हिमगिरे !** (प्रो० देवदत्त भट्टिः)
१५१. **मातरमाहुः** (श्री देवदत्त भट्टिः)

वर्षम् १० अंकः १ जनवरी १९८८

१५२. **नववर्ष-शुभकामनाः** (डा० उमारमण झा)
१५३. **ऋतम्** (उपन्यासः) डा० केशवचन्द्र दाशः)
१५४. **शोषः पोषश्च** (कविरत्नश्रीअमीरचन्द्रशास्त्री)
१५५. **कथंकथा** (डा० बच्चूलाल अवस्थी 'ज्ञानम्')

अंकः २ अप्रैल १९८८

१५६. **अकालजलद !** (डा० रमाकान्त शुक्लः)
१५७. **ज्वलति हन्त पञ्चापप्रदेशः** (डा० परमानन्द शास्त्री)
१५८. **भारत-वन्दना** (कविरत्न ओमप्रकाश ठाकुरः)
१५९. **राष्ट्रवन्दनम्** (डा० मल्लिकार्जुन परड्डी)
१६०. **भारतम्** (कवीश रामकैलाश पाण्डेयः)
१६१. **उज्जयिनी** (डा० हरिहर त्रिवेदी)
१६२. **उज्जयिनीमुपसर** (डा० सुधाकराचार्य त्रिपाठी)
१६३. **स्वप्नकन्यका** (श्री ई० पी० भरतपिषारटिः)
१६४. **पल्लव ! कम्पसे किम् ?** (आचार्य वेदानन्द झा)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१६५. श्रीवेदव्यासप्रणीतब्रह्मसूत्रस्य सरलश्लोकेषु विवृतिः
(आचार्य रमेशचन्द्र शुक्लः)

अंकः ३ जुलाई १९८८

१६६. देववाणी-हुंकार शतकम् (१०२ पद्यात्मकम्)
('अभिराज' डा० राजेन्द्र मिश्रः)

१६७. दयानन्दसूक्तिसप्तशती (६१६ पद्यात्मकं सूक्तिकाव्यम्)
(श्री शिवकुमार मिश्रः)

१६८. स्वागतं पयोद ते ! (डा० रमाकान्त शुक्लः)

अंकः ४ अक्टूबर १९८८

१६९. गीतमन्दाकिनी (डा० इच्छाराम द्विवेदी)

१७०. यवद्वीपसाहित्यशतकम् (१०२ पद्यात्मकम्)
'अभिराज' डा० राजेन्द्र मिश्रः)

१७१. गान्धिसूक्तिसप्तशती (६०२ पद्यात्मकं सूक्तिकाव्यम्)
(श्री शिवकुमार मिश्रः)

१७२. भवतु प्रभातः (श्री मधुर शास्त्री)

१७३. तत्स्मितम् ! (डा० दयानन्द भार्गवः)

वर्षम् ११ अंकः १ जनवरी १९८९

१७४. श्रीनेहरूवृत्तम् (११४ पद्यात्मकं काव्यम्)
(डा० रमेशचन्द्र शुक्लः)

१७५. भाव्यं शुभं भावि हि भारतस्य (श्री श्रीसुन्दरराजः)

१७६. नेहरुं तं स्मरामः (डा० रमाकान्त शुक्लः)

१७७. वसन्त-सौरभम् (डा० केदारनारायण जोशी)

१७८ दूतप्रतिवचनम् (१-३२ मन्दाक्रान्ता पद्यानि सहिन्द्यनुवादानि)
(डा० इच्छाराम द्विवेदी)

अंक : २ अप्रेल १९८९

१७९. बालीप्रत्यभिज्ञानसार्धशतकम् (१५१ पद्यात्मकम्)
('अभिराज' डा० राजेन्द्र मिश्रः)

१८०. दूतप्रतिवचनम् (३३-६२ पद्यानि) (डा० इच्छाराम द्विवेदी)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१८१. ब्रूते सत्यं शिवं सुन्दरम् (डा० परमानन्द शास्त्री)
१८२. राष्ट्रैक्यगीतम् (डा० नलिनी शुक्ला)
१८३. व्यवहारगीता (डा० रामेश्वरदत्त शर्मा)
१८४. सङ्कीर्तनसुधाषोडशी (डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः')
१८५. एकं सद् बहुधा विलोक्यते भारतम् (डा० रमाकान्त शुक्लः)

अंकः ३ जुलाई १९८९

१८६. विक्रमोर्वशीयस्य ध्वनिनाट्यरूपान्तरम्
(डा० रमाकान्त शुक्लः)
१८७. आलोकिनी (ध्वनिनाटकम्) (डा० रमाकान्त शुक्लः)

अंकः ४ अक्टूबर १९८९

१८८. अद्यत्वे (डा० विष्णुकान्त शुक्लः)
१८९. दाराशिकोहीयम् (ध्वनिनाटकम्)
(डा० रमाकान्त शुक्लः)

वर्षम् १२ अंकः १ जनवरी १९९०

१९०. उत्तरमङ्गलम् (डा० रमाकान्त शुक्लः)
१९१. भारतं नाम विश्रुतम् (श्रीसुन्दरराजः)
१९२. निर्वाचनावसरे (प्रो० बटुकनाथ शास्त्री 'खिस्ते')
१९३. निर्वाचनात्प्राक् (डा० भास्कराचार्य त्रिपाठी)
१९४. केचन प्रश्नाः (डा० कपिलदेव पाण्डेयः)
१९५. सन्ध्यामाह विधुः (डा० परमानन्द शास्त्री)
१९६. मदीयं मनो मोदते संस्कृतेन (डा० चन्दनलाल पाराशरः)
१९७. तुभ्यं नमः (डा० शम्भुनाथ आचार्यः)
१९८. दूरदर्शने प्रस्तुतं 'भाति मे भारतम्' (डा० रमाकान्त शुक्लः)

अंकः २ अप्रैल १९९०

१९९. उड्डीयते विमानम् (डा० हरिदत्त शर्मा)
२००. वसन्त-गीतम् (डा० कृष्णमुरारिः शर्मा)
२०१. वसन्त-गीतिः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)
२०२. मातुः स्तवकः (डा० बच्चूलाल अवस्थी 'ज्ञानम्')

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२०३. **जाबालिपुरं चल !** (डा० रमाकान्त शुक्लः)
२०४. **परिहास-प्रहेलिकाः** (डा० सुधीकान्त भारद्वाजः)
२०५. **यतो यतोऽपि गम्यते** (डा० भगवतीलाल राजपुरोहितः)
२०६. **धारणा** (चेतोदार्शनिकी कथा) (डा० प्रकाश पाण्डे)
२०७. **आन्दोलनम्** (डा० इच्छाराम द्विवेदी)
२०८. **जापानदेशीयानि 'तान्का' काव्यानि**
(डा० हर्षदेव माधवः)
२०९. **'सौरि सरे'ति महावाक्यम्** (डा० रामेश्वरदत्त शर्मा)
२१०. **मावमंस्थाः सखे !** (डा० परड्डी मल्लिकार्जुनः)
२११. **असख्यातवर्षाणि जीवनम्** (डा० परमानन्द शास्त्री)

अंकः ३ जुलाई १९९०

२१२. **प्रिया** (डा० हर्षदेव माधवः)
२१३. **मेघदूतः** (श्री ताराशंकर शर्मा)
२१४. **तिस्रो रचनाः (१. वर्षन्त्यनलं यदि मित्रकराः, २. ग़ज़लिका, ३. सत्यं बन्दीकृतं कन्दरे)** (डा० परमानन्द शास्त्री)
२१५. **श्रीलाललालित्यम्** (श्री बटोही झा)
२१६. **मित्रदूतम् (१०९ पद्यात्मकं दूतकाव्यम्)**
(डा० इच्छाराम द्विवेदी 'प्रणवः')

अंकः ४ ७ नवम्बर १९९०

२१७. **वदत नेतारो मनाक् !** (डा० रमाकान्त शुक्लः)
२१८. **नेतृकथा** (डा० भगवतीलाल राजपुरोहितः)
२१९. **नेतृशतनामावलिः** (डा० इच्छाराम द्विवेदी)
२२०. **ग्रीष्म-सौरभम्** (डा० केदारनारायण जोशी)
२२१. **वर्षाश्रीः** (डा० केदारनारायण जोशी)
२२२. **यायातिशर्मिष्ठीयम् (एकाङ्करूपकम्)**(डा० रामकिशोर मिश्रः)
२२३. **व्रजदर्शनम्** (श्रीबटोही झा)
२२४. **अपण्डितोऽहम्** (श्री प्रभाचार्यः पी० बी० आचार्यः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२२५. आह्वानम् (श्री प्रभाचार्यः)
२२६. धन्या धरायां कलमालिनीयम् (डा० कैलाशनाथ द्विवेदी)
२२७. संस्कृतज्ञा मृताः सन्ति, न मृतं संस्कृतं तथा
(डा० रामेश्वरदत्त शर्मा)
२२८. सत्यभक्त-दोहावली (श्री शान्तप्रकाशः सत्यदासः)
२२९. अभिनवमोहमुद्गरम् (श्री श्रीसुन्दरराजन्)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

केचित् काव्यानुवादाः

(डा० रमाकान्त शुक्लः, आर ६, वाणी-विहारः, नयी दिल्ली)

भाषान्तरे समुन्मीलितस्य भावराशेर्व्यापकतरप्रचारं कांक्षद्भिः संस्कृत-रचनाकारैः तस्य संस्कृतानुवादाः समये समये प्रस्तुताः । लोकभाषासु रचितानि यानि सुभाषितानि लोककण्ठेषु दृढं पदं चक्रुस्तेषामनुवादेन संस्कृतरचनाकार-स्तेषां सार्वदेशिकं सार्वकालिकं च उपयोगमिच्छति । कैश्चित्साहित्यकारैः मूल-काव्यस्य वृत्तानुवृत्तोऽनुवाद उपस्थापितः, कैश्चित्पुनः वृत्तान्तरेण तथा व्यधायि । विंशशताब्द्यामेव भट्टमथुरानाथ शास्त्रि—श्री ब्रह्मानन्द शुक्ल-डा० प्रेमवल्लभ द्विवेद—डा० वासुदेवकृष्ण चतुर्वेदादिभिरनेकासां रचनानां काव्यानुवादाः प्रस्तुताः । 'बिहारी सतसई'—'रामचरितमानस'—'रहीम-दोहा'—'कामायनी' —'कबीर-दोहा'—प्रभृति हिन्दी-कृतीनां पद्यानुवादाः' संस्कृते सञ्जाताः । 'दूर्वा' संस्कृत पत्रिकायाः विश्वकविता-विशेषाङ्के देशान्तरीय-भाषानां काव्यांशाः, साम्प्रतिक-कविभिः संस्कृतेऽनूदिता । 'इक़बाल'—'ग़ालिब'—प्रभृतीनाम् उर्दू कवीनामपि काव्यांशाः संस्कृते ऽनूदिता वर्तन्ते । कुराणस्यानुवादः डा० सत्यदेववर्मणा कृतः । आंग्लसूक्तीनामनुवादः श्री टी० वी० परमेश्वर-अय्यरेण कृतः ।

अस्मिन्नेव क्रमे संस्कृत-प्राकृत-हिन्दी-महाराष्ट्री-गुर्जरी-राजस्थानी-उर्दू भाषविदा संस्कृताध्यापकेन किञ्च द्वासप्ततिपुस्तकानां सम्पादकेन श्रीमता शान्तप्रकाश 'सत्यदास'-महाभागेन कृतः 'अशआर-रसधारः' इति शीर्षकयुतः श्रेयः खण्डात्मकः प्रथमो भागः समवतरति ।

अस्मिन् ग्रन्थे अनुवादकर्त्रा हिन्दी-उर्दू भाषयोः त्रिशत (३००) संख्याकानां काव्यांशानां प्रायो वृत्तानुवृत्तानुवादाः प्रस्तुताः । कुँअर बेचैन-नश्तर-प्रदीप चौबे-माणिकवर्मा-जगदीश श्रीवास्तव-स्वामीसत्यभक्त-शाद-ग़ालिब-दुष्यन्त-कुमार-अमीर कजलबाश-नश्तर हंगामी-फिराक़ गोरखपुरी - सूर्यभानुगुप्त-सुरेन्द्र शर्मा-जफ़र-साहिर-शकील बदायूँनी-ज़हीर कुरैशी-ह० नायडू-सरदार ज़ाफरी-जज्बी-निदा फ़ाज़ली-बिस्मिल-अहमक फफूँदवी-अकबर इलाहाबादी-दाग़-ज़ौक-बशीर बद्र-मीनाकुमारी-कैलाश सेंगर-ज़रीफ़ जबलपुरी-अलम-सीमाब-चकबस्त-यगाना-कृष्णमित्र-सुमन कुशवाह-शिव ओम बब्बर-गोपाल-प्रसाद व्यास-हफ़ीज-रियाज-राहत इन्दौरी-कृष्णबिहारी नूर-सहबा अख्तर-जिगर-आसी-हसरत-अहद प्रकाश-शोला-हुल्लड़ मुरादाबादी-फ़ना निज़ामी-

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कृष्णानन्द सोख्ता-साहिर शेवी-कँवल सरहदी-कृष्णमोहन-अनिल उदित-इत्येतन्नामकानाम् एकोनषष्टि (५९) संख्याकानाम् प्राचीनार्वाचीनप्रसिद्धाप्रसिद्ध-हिन्दी-उर्दू कवीनां सुभाषितानि संस्कृते अनूदितानि। कुँअरबेचैंने कवेरतितमां प्रीतिदृ शते। कविना लोकभाषाप्रसिद्धाः शब्दा अपि संस्कृते यथावत्परिगृहीताः, यथा—

प्यासे होठों से जब कोई झील न बोली बाबूजी !
हमने अपने ही आँसू से आँख भिगो ली बाबूजी !

कुँअरबेचैंनकृतस्यास्य मूलकाव्यांशस्यानुवादो यथा—

सरसी काचित्पिपासिताधरयुगं नावदत् बाबूजी !
अहमश्रुभिः स्वकीये नेत्रे क्लिन्ने कृतवान् बाबूजी !

(पृ० ६५)

यथा वा—

जालिमों का सर तो काटा जा भी सकता है 'कुँअर' !
जुल्म का सर काटने वाली कटारी अब कहाँ ?

अस्यानुवादो यथा —

हे कुँअर! मस्तकं छेत्तुं शक्यतेऽप्यपराधिनाम्।
छिद्यते येनापराधः कुत्र खड्गः सोऽधुना ॥

(पृ० ७३)

दुष्यन्तकुमारस्य काव्यांशस्य अनुवादो यथा—

अब नई तहज़ीब के पेशे नज़र हम
आदमी को भूनकर खाने लगे हैं ! (मूलम्)
नूतनायाः सभ्यतायाः सन्निधाने
अद्य मानवमेव दग्ध्वा भक्षयामः। (अनुवादः)

भाषायाः सारल्यम्, अनुवादे वृत्तानुवृत्तेः पालनम्, अनूद्यांशानां सञ्चयश्च अनुवादकवेर्गहनमनुशीलनं काव्यप्रतिभां च सम्यक् सूचयन्ति। श्री शा० सत्यदासमहाभागो ग्रन्थरचनार्थं भूयो भूयोऽभिनन्द्यते। आशासे काव्यरसिका अनेन 'अशआर-रसधारेण'[1] (कवितारसधारया) नूनमेव सिक्ता भविष्यन्ति।

---

१. अशआर-रसधारः, संकलयितानुवादकश्च-शान्तप्रकाशःसत्यदासः, प्रका० कुलदीप प्रकाशन, उदयपुर। संस्क०-प्रथमम् १९८९ ई०। मूल्यम्-१०/-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

डा० परड्डी मल्लिकार्जुन-महाभागस्य 'कबीरदास-शतकम्' 'सटीकं बसवेश्वरशतकम्' इत्युनुवादकाव्यद्वयमपि भाषान्तरस्थ-सदाशयान् देववाण्या माध्ययेन सहृदयानां पुरः प्रस्तौति ।

कर्णाटकविश्वविद्यालयस्य संस्कृतविभागे प्रवाचको डा० परड्डी-मल्लिकार्जुनः अर्वाचीनसंस्कृतस्य पाठकानां कृते नास्त्यपरिचितः । नैकरचना-कारेणानेन बसवप्पा-कबीरयोः समाजकल्याणाभिनिवेशिणां सुभाषितानां पारम्परिक-संस्कृतवृत्तेषु अनुवादः कृतः । 'बसवेश्वर-शतक' स्यामुखे तेनोक्तम्—

वचनशतकमेतत् संस्कृतानूदितं च
बसवचरितयुक्तं टीकयोपेतमेव ।
सकलभुवनविद्वल्लोकमोदं तनोतु
श्रवणमननपूर्वं विश्वमैत्रीं करोतु ।। (पृष्ठ viii)

अनेन सत्यप्रासेन कविना कर्णाटेषु लोककण्ठस्थितानि कर्णाटीभाषाबद्धानि सुभाषितानि सकलजगति सौकर्येण अवगमयितुं शक्यन्ते । पुनश्च एते अनुवादा मूलकाव्यस्यैव विच्छित्तिं दधते । तथा—

देहस्तवेति मम नास्ति तनुः स्वतन्त्रा
चित्तं यदा तव भवेत् नहि तन्मदीयम् ।
वित्तं यदा भवति ते मम नास्ति किञ्चित्
श्री सङ्गमेश सकलं भवदीयमेव ।। (पद्य ८७)

डा० मल्लिकार्जुनस्य कबीर काव्यानुवादोऽपि दिङ्मात्रमुपस्थाप्यते—

'निन्दक नियरे राखिये आंगन कुटी छवाय ।'

इत्यादिदोहापद्यस्य अनुवादोऽयम्—

निन्दकं स्थापयेन्नूनं समीपे चोटजे सदा ।
जलादिभिर्विना येन स्वभावो विमलीकृतः ।।

एवमेव 'कबिरा संगत साधु की ज्यौं गंधी की बास' इत्यादिदोहापद्यस्य अनुवादं पश्यन्तु सहृदयाः—

सङ्गः सतां भवति गन्धवतां समीपे
वासो यथा सुरभिचित्तहरः पृथिव्याम् ।

---

१. 'सटीकं बसवेश्वरशतकम्' । ले० डा० मल्लिकार्जुन परड्डी । प्रका० श्रीजगद्गुरुगङ्गाधर-धर्मप्रचारकमण्डलम्, मूरुसाविरमठः हुब्बल्ली-५८००२० । संस्क० प्रथमम्, नवम्बर १९८९ ई० मूल्यम् २० रु० ।

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गन्धं न यच्छति जनाय यदप्ययं स्वं
सामीप्यतः सुरभियुक्त इति प्रसिद्धम् ।।

ये जनाः मूलकाव्येन परिचिताः सन्ति तेषां कृते तु अनुवादोऽयं प्रियोऽस्त्येव, ये पुनः कबीरस्य रचनां न दृष्टवन्तस्तेषामपि कृते मूलकाव्यवत्सरलं सरसं प्रेरणादायकं चेदं काव्यमस्ति ।

डा० परड्डीमल्लिकार्जुनमहाभागो नूनमेव ग्रन्थद्वयरचनार्थं साहित्यिकानां वर्धापनानि अर्हति ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रक्ष्यतां सर्वथेदं सदा संस्कृतम्

आचार्यं वीरेन्द्र कुमार झा, (सा० विभाग:) श्री मोतीनाथ संस्कृत
महाविद्यालय:, रमेशनगरं, नयी दिल्ली-१५

देवलोकार्चितं यद्रमापूजितं
सर्वमोदाश्रय: यत्सुसभ्यैस्तुतम् ।
संस्कृतेराश्रय: लोकसम्मानितं
रक्ष्यतां सर्वथेदं सदा संस्कृतम् ॥१॥

नवरसाऽऽलङ्कृतं रीतिगुणसंयुतं
कालिदासादिकविभिस्सदा सेवितम् ।
यत्र कृष्णार्चितं भागवतं ह्यमृतं
रक्ष्यतां……॥२॥

यत्र रामायणं लोकसेवापरं
यत्र गीताऽमृतं ज्ञानगुरुकल्पितम् ।
यत्र शाकुन्तलञ्चाद्भुतं वाङ्मयं
रक्ष्यतां……॥३॥

ताण्डवं कत्थकं नृत्यलोकार्चितं
यत्र दीपावली पूर्णिमा वर्णिता ।
यत्र देव्यास्स्तुतिर्वर्णिता सा शती
रक्ष्यतां……॥४॥

यत्र गंगा - यमुनयो: प्रभा वर्णिता
मोक्षदा संगमश्रीस्तयो: वर्णिता ।
यत्र विद्योतते सर्वथाऽऽयोनिजा
रक्ष्यतां……॥५॥

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यत्र सर्वस्वभूताः हि वेदाः स्मृताः
पश्यतां साम्प्रतं कीदृशी दुर्दशा !
एतदन्वेषणं स्वात्मना धार्यतां
रक्ष्यतां......॥६॥

यन्नवैः प्राक्तनैर्लेखकै रक्षितं
यस्य वाक्यं महाक्रान्तिसम्पादकम् ।
यत्पठित्वा जनाः सद्गुणैर्भूषिताः
रक्ष्यतां......॥७॥

यत्सुसभ्यासु भाषासु सम्मानितं
यन्महन्मानमासाद्य मोदास्पदम् ।
यद् ऋषीणां बुधानाञ्च वंशव्रतं
रक्ष्यतां......॥८॥

प्राणिमात्रं कुटुम्बं यया बोध्यते
दानमात्रं हि सारं यया शिक्ष्यते ।
सा हि भाषा कथं स्यान्मृता बान्धवाः !
रक्ष्यतां......॥९॥

संकुचितभावना येन निस्सारिता
नित्यमौदार्यवृत्तिस्सदा पोषिता ।
भर्तृहरिनीतिनिपुणं महत्संस्कृतं
रक्ष्यतां......॥१०॥

स्वीयसत्तासुरक्षार्थमावश्यकं
रक्षितं यत् सदैवाऽस्ति रक्षाकरम् ।
यत्पुराणं सदप्यस्ति नव्यं शुभं
रक्ष्यतां सर्वथेदं सदा संस्कृतम् ॥११॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दुःसमयः

(रवीन्द्रनाथठाकुरकृतपद्यस्य वङ्गानुवादः)

श्री प्रतापवन्द्योपाध्यायः

यद्यप्येषा शिथिलगमना मन्दमायाति सन्ध्या
सर्वा गीतिः प्रशमनमगादिङ्गितानां निदेशात् ।
यद्यप्यस्मिन् विपुलगगने विद्यते नैव सङ्गी
कापि क्लान्तिः किल परिणता लिम्पतीहाङ्गकानि ॥१॥

व्यूढाशङ्का जपति सततं केवलं मौनमन्त्रं
प्रावारेणापसृतमखिलं सर्वतो दिग्दिगन्तम् ।
इत्थंभावोऽपि मम विहग त्वं विहङ्गाङ्ग मोहा-
दन्धः स्तब्धं सपदि कुरु मा पक्षपाशं स्वकीयम् ॥२॥

नैषा काचिद्वनमुखरता मर्मरैर्गुञ्जितैर्वा
पारावारोऽजगररसितैः स्फीतिमापद्यतेऽयम् ।
नैतत् कुञ्जं नयनरमणं कुन्दसूनप्रतानैः
फेनोल्लासो ननु कलततिव्यक्तकोल्लोलदोलः ॥३॥

क्वासौ वेला दृशमुपगता पुञ्जिता पुष्पपत्रै-
स्तत् तीरं वा निहितमथवा क्व श्रयार्थेह शाखा ।
इत्थंभावेऽपि मम विहग त्वं विहङ्गाङ्ग मोहा-
दन्धः स्तब्धं सपदि कुरु मा पक्षपाशं स्वकीयम् ॥४॥

अद्याप्येषा लसति पुरतो दीर्घयामा त्रियामा
निद्रामस्ताचलमुपगता सेवते सप्तसप्तिः ।
विश्वं विश्वं प्रहरगणनातत्परं स्थाणुमूर्ति
संस्तभ्यान्तःश्वसनपवनं राजते मुक्तसङ्गम् ॥५॥

सद्यो दृष्टो गहनतिमिरं भेदयित्वा कथञ्चित्
प्राचीमूले प्रतनुकलया वङ्किमः शीतरश्मिः ।
हन्तैतस्मादपि विहग मे त्वं विहङ्गाङ्ग मोहा-
दन्धः स्तब्धं सपदि कुरु मा पक्षपाशं स्वकीयम् ॥६॥

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ऊर्ध्वाकाशेऽङ्गुलिकलनया मण्डली तारकाणां
त्वामुद्दिश्य प्रहितनयना दत्तसंकेतमास्ते ।
नीचैर्घोरोच्छलितमरणं सन्ततं क्षोभमाणं
वीचीक्षेपैः किल शतशतैरुत्थितं धावति त्वाम् ॥७॥

दूरे तीरेऽञ्जलिरचनया के तथामन्त्रयन्त
एह्येहीति स्वनमनुनये दीनमुच्चारयन्तः ।
हन्तैतस्मादपि विहग मे त्वं विहङ्गाङ्ग मोहा-
दन्धः स्तब्धं सपदि कुरु मा पक्षपाशं स्वकीयम् ॥८॥

मा भैस्तावन्न खलु घटते बन्धनं स्नेहमा-
न्नास्त्येवाशा छलमिदमहो सर्वथा तन्मृषोद्यम् ।
हंहो वाणी प्रसरति न हि क्रन्दनं निष्फलं वा
नास्ते गेहं न च विरचितं पुष्पशय्याप्रतानम् ॥९॥

पक्षमास्त्येकं विततगगनप्राङ्गण राजमाणं
प्रत्यूषस्य व्यपहतदिशं चित्रितं ध्वान्तपुञ्जैः ।
हन्तैतस्मादपि विहग मे त्वं विहङ्गाङ्ग मोहा-
दन्धः स्तब्धं सपदि कुरु मा पक्षपाशं स्वकीयम् ॥१०॥

★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शाकुन्तलीयम्

(डा० कैलाशनाथ द्विवेदी, डी०लिट्०,
प्राचार्यः, म०प्र० महाविद्यालयः, कोंच (जालौन))

आसीन्नृपाणामधिपः प्रतापी, महामनस्वी मतिमान् महात्मा ।
स कान्यकुब्जं नगरं शशास, कुशीकवंशे विमले प्रसूतः ॥१॥
गेयो गुणी गाधिसुतो गरिष्ठो, महेन्द्रतुल्यश्च महाप्रभावः ।
स कौशिकः कीर्तिमवाप लोके, लोकेशकल्पोऽतुललोकपालः ॥२॥
ययौ कदाचिन्मृगयानिमित्तं, वनं प्रशान्तं सघनं ससैन्यः ।
वसिष्ठपुण्याश्रममाशु लब्ध्वा, ह्यातिथ्यलाभं ललितं स लेभे ॥३॥
स्वातिथ्यमूले सुरधेनुरेव, तस्याः श्रियं वीक्ष्य नृपस्तु लुब्धः ।
तां कामधेनुं सुधनं ग्रहीतुं, वसिष्ठमेवं वशिनं ययाचे ॥४॥
"मह्यं मुने देहि दुघां हि दिव्यां, रत्नानि राज्ञां निकटे लसन्ति ।
तपस्विनस्तृप्तियुताः महान्तः, परिग्रहादेव भवन्ति दूराः ॥५॥"
"राजन् मखार्थं सुरधेनुरूपं दिव्यं प्रसादं शुभसाधनञ्च ।
नेदं प्रदेयं परमार्थहेतुस्तपस्विनां यज्ञविधिं हि रक्ष ॥६॥"
गर्वातिरेकेण स गाधिसूनुर्बलाद् गृहीत्वा सुरधेनुमाशु ।
हुंकारमात्रेण तदैव तस्याः सेना समस्ता पतिता पृथिव्याम् ॥७॥
शस्त्रास्त्रवृष्टिर्विफला बभूव, दृष्टो वसिष्ठो मृदुशान्तचित्तः ।
सः कौशिकस्तस्य च राजदण्डः क्षणं परास्तो मुनितेजसेव ॥८॥
तद्ब्रह्मतेजस्तपसाऽधिगन्तुं तीव्रं तपोऽतृप्तमना चकार ।
नदी हिमाद्रौ कलगौतमीयं तपस्थली तस्य बभूव रम्या ॥९॥
दृष्ट्वा समाधौ मघवा सशङ्कस्तं गाधिपुत्रं तपसो विरन्तुम् ।
नियुक्तवान् तापससविघ्नभूतां तां मेनकां के न विदन्ति विज्ञाः ॥१०॥
रतेः श्रियं ह्रीपदमादधानां मधौ मनोहारिवने रमन्तीम् !
कामस्य बाणानिव वर्षयन्तीं, दृष्ट्वा च तां को न बभूव विद्धः ॥११॥

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रुत्वा स्वनं नूपुरसिञ्जनस्य समेखलाकंकणकिंकिणीनाम् ।
संगीतपूर्णं सरसं च रागं विरागभावं विससर्ज योगी ॥१२॥
भग्नः समाधिश्चलितञ्च चित्तं, ध्यानक्रियायां विरतिर्यदैव ।
त्यक्त्वा निरोधं चलचित्तवृत्तेर्विलासभावो हृदि संविवेश ॥१३॥
तद्रूपसिन्धौ रसवीचिमग्नो मृगस्तृषार्त्तो मरुभूमिमध्ये ।
तथैव भोगं ह्यनुधावमानश्चिच्छेद बन्धं जनसंयमस्य ॥१४॥
उद्दामकामं ह्यनुभूय शान्ते वने सुरम्ये नगराजकण्ठे ।
सा मेनकैकाऽत्र सुतामसूत तपस्विनः सिद्धिमिवानुकाम्याम् ॥१५॥
महेन्द्रमन्तव्यमिवैव पूर्त्या मातुर्ममत्वं मनसा च हित्वा ।
त्यक्त्वा सुतां तां रुदतीमनाथां नाकं गतेयं जननी कठोरा ॥१६॥
कदाचिदेवं करुणाकरस्तु कण्वः कृपालुः कुलपः सशिष्यः ।
ददर्श दूरे रवितापरोधीन्, नैकान् शकुन्तान् विततोर्ध्वपक्षान् ॥१७॥
शकुन्तछायामिव नीतकन्या शकुन्तला नामवती बभूव ।
कण्वस्य क्रोडे सुखलालितेयं स्नेहं च लेभे दुहितेव तस्य ॥१८॥
कण्वाश्रमीया कवितेव काम्या कलाधरस्यैव कलेव रम्या ।
चक्षुःशलाकेव सुधामयीयं चानन्दधारेव सुधीमुनीनाम् ॥१९॥
सौन्दर्यराशिः शुभलक्षणैश्च शालीनतामूर्तिरशेषकृत्यैः ।
क्रीडापरा क्रीडनकैरशेषैः प्रेमाकुलेव प्रकृतौ प्रविष्टा ॥२०॥
कण्वाश्रमे काननकन्यकेव क्वचित्सखीभिः सह कन्दुकेन ।
क्रीडापरा कस्य न चित्तमेषा व्यमोहयत् केलिकुतूहलेन ॥२१॥
क्वचिद्रहः पुत्तलिकासमेता, काम्येषु कुञ्जेषु विचारयन्ती ।
आकारयन्ती मुनिकन्यकाश्च सख्यः समस्ताः कलकेलये वै ॥२२॥
क्वचित्तु सा सर्वसखीसमेता संधावमाना नवतित्तिलीभ्यः ।
क्रीडायुता सैकतरम्यतीरे सुमालिनीतीव्रगतेस्तटिन्याः ॥२३॥
सार्धं सखीभिः सलिलं सलीलं सुधाघटैस्सा सलिलाशयेभ्यः ।
सिसिञ्च सर्वाश्रमबालवृक्षान् पयोदमालेव वनं निदाघे ॥२३॥
वृद्धान् मुनीन् मार्गनिदर्शनेन, बालान् मृगान् मातृसुमेलनेन ।
संसेव्य सर्वान् मुनिदेवकल्पान्, निनाय कालं कलकण्वकन्या ॥२५॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिनावसाने तमसः प्रवृद्धौ, सुबुद्धिशीलेव तमो निहन्तुम् ।
नवेङ्गुदीतैलमयेन रात्रौ रराज दीपेन शिखेव वह्नेः ।।२६।।
सम्मार्जनं स्वाश्रमरम्यभूमेः सम्वर्द्धनं फुल्लफलप्रसूतेः ।
संचालनं चारुमुनिक्रियायाः संदर्शिता सा भुवि सत्क्रियेव ।।२७।।
विद्याविनीता गुरुभिर्गृहीता, सदासखीभिर्मनसा ह्यभीता ।
प्रीता परं पावनवन्यभूमौ, सीतेव सा श्राद्धपरा बभूव ।।२८।।
गुरोः समा ज्ञानदगौतमी सा, निर्देशने लब्धमशेषज्ञानम् ।
मातेव मान्या मृदुभावदात्री, धात्रीव धैर्येण पुपोष चेमाम् ।।२९।।
प्रियम्वदाऽस्याः प्रियभाषिणी वै, प्रियानसूया सुसखीद्वयञ्च ।
शुशोभ कुञ्जे कलमञ्जरीव नटीव रंगे ह्यनुरञ्जयन्ती ।।३०।।
अथैकदा शान्ततपोवने सा शुश्राव कोलाहलमेव घोरम् ।
मृगान् निहन्तुं मृगयानिमित्तं समागतः कोऽपि नरेश्वरोऽत्र ।।३१।।
कण्वाश्रमे पादपसेकमग्नां ह्यभग्नकुम्भेन पयोधरां ताम् ।
रहः सखीभ्यां सह भाषयन्तीं ददर्श तत्कामनवावतारः ।।३२।।
दृष्ट्वाऽतिथिं देवसमानदीप्तं रस्यैर्वचोभिर्हृदयं हरन्तम् ।
रूपश्रियेव स्वमनो विशन्तं कामस्य बाणैर्विवशा बभूव ।।३३।।
कन्योचितं चेतसि शिष्टभावं संस्कारशीला न मुमोचमानम् ।
संयम्य कामं मनसाऽतितीव्रं स्वातिथ्यधर्मं धृत्या चचार ।।३४।।
विस्मृत्य बाधां भ्रमरस्य भीत्या, प्रीत्यङ्कुरं प्रादुरभूत् प्रियस्य ।
कामस्य बाधा हृदि वर्धमाना सन्तापितां तामवशां चकार ।।३५।।
नखाङ्कितं वै नलिनीदले तु, प्रेष्यं पवित्रं प्रणयस्य पत्रम् ।
पूजोपहारं सुमनोभिरेव समर्पय त्वं रसिकप्रियाय ।।३६।।
सख्योः परामर्शमिवानुसृत्य, लिलेख सर्वं शुचिहृद्यभावम् ।
विभाव्य विवशां व्यथितां सकामां, व्यथाहरः पार्श्वं इवानुदृष्टः ।३७।
संकोचलज्जामितशीलभावं विभाव्य सख्यौ चतुरे तदानीम् ।
तिरोहिते तद्धितकामवत्यौ सकामयुग्मं ह्यनुरञ्जयन्त्यौ ।।३८।।
एकान्तकुञ्जे नवकान्तसंगे युवाहृदोः जागृतप्रीतिभावे ।
विभिद्य भित्तिं शुचिसंयमस्य गान्धर्वरीत्यां परिणीतवन्तौ ।।३९।।

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भ्रष्टं मृणालाभरणं विशिष्टं स्रस्तः सपुष्पो मृदुकेशपाशः।
छिन्नश्च तस्याः नवपुष्पहारः संदष्टशय्या मृदितेव दृष्टा ॥४०॥
श्रुत्वेव तस्याः परितापवृत्तं यज्ञोदकं तापनिवारणार्थम्।
नीत्वाजगामाशु निशेव शोच्या, सा गौतमी विघ्नमयीव भूत्वा ॥४१॥
आमंत्रयस्व स्वसखं रथाङ्गं रथाङ्गनेऽरम्यनिशा प्रयाता।
संकेतिता सा चतुरा सखीभ्यां निष्क्रम्य कुञ्जादवदत् सखेदम् ॥४२॥
"कुञ्जे निलीनो भव हे नरेन्द्र ! समागतेयं गुरुगौतमी सा।
रक्षस्व शिष्टाचरणं विशिष्टं तपोवने तद् गुरुताञ्च रक्ष" ॥४३॥
सन्तापहारिन् मृदुवेलिकुञ्ज सुखाय संश्रित्य तवोरुकण्ठम्।
आमंत्रयेऽहं पुनरेव भोक्तुं सम्भाष्य दीनेव ततो गताऽऽसीत् ॥४४॥
प्रीतिप्रसादं स्वजनस्य प्राप्य, नामाङ्कितां भासुरमुद्रिकां ताम्।
दृष्ट्वा दिदीपे प्रणयप्रदीपो दध्यौ तमेव स्मृतिलीनचित्ता ॥४५॥
एकान्तकुञ्जे प्रियध्यानलीना, शालीनताऽतिथ्यपरायणाऽपि।
श्रुतं स्वनं नैव तपोधनस्य, दुर्वाससोऽभ्यागतकोपमूर्तेः ॥४६॥
शापन्तु लब्ध्वा प्रियविस्मृतेश्च यदैव ज्ञातं विजने सखिभ्याम्।
प्रियंवदायाः विनयप्रसन्नाः प्रोवाच दान्तः निजशापमोक्षम् ॥४७॥
दृष्ट्वा प्रियाभूषणमात्मानस्तं सद्यः प्रियः स्वस्मृतिदीपदीप्ते।
त्वां ज्ञास्यतीवातिघनान्धकारे सृष्टिं यथा पश्यति दिव्यभानुः ॥४८॥
यदैव कण्वः कृतकृत्ययुक्तः प्रत्यागतः पावनसोमतीर्थात्।
ज्ञातं समस्तं घटितं क्षणेन, तपस्विनां किं भविता परोक्षम् ?? ॥४९॥
दुष्यन्ततेजो दधतीं सतीं तां ज्ञात्वा च लोकं व्यवहारदृष्ट्या।
पत्युः समीपं नयनार्थमाशु निर्दिष्टशिष्यौ कथितौ च तेन ॥५०॥
सा कण्वपुत्री प्रकृतिप्रदत्तैर्विभूषिताभूषणजालदिव्यैः।
स्वाशीर्वचोभिरभिनन्द्यमाना, विदा प्रदत्ताऽखिलतापसीभिः ॥५१॥
सौहार्दशीलं शुचिदिव्यस्नेहं, सख्याः समक्षं ह्यवलोक्य रूपम्।
सौभाग्यकामा मुनिकन्यकाश्च, सुरार्चनैर्मंगलमेव तेनुः ॥५२॥
तस्याः विदायां नियतोऽपि कण्वो विहाय धैर्यं मनसः समस्तम्।
सन्तापभावं हृदि वैक्लव्यं मेने स्वयं दीनमिव गृहस्थम् ॥५३॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पितुः शुभाशीर्वचनं निशम्य, प्रदक्षिणीकृत्य च यज्ञवेदीम् ।
संश्लेष्य सख्यौ सरलस्वभावा, कण्वाश्रमात् सा गमनं ययाचे ॥५४॥

लताभगिन्यस्तरुबन्धुकल्पाः स्वल्पं सुसंगं भवतां नु लब्ध्वा ।
तपोवनाद्दूरनिवासाकामा विदां भवद्भ्यस्त्वह याचते वै ॥५५॥

यूयं मदीयं मधुवारि पीत्वा, प्रेमामृतं प्राप्य विवर्धिताः स्थ ।
त्यक्त्वा सुछायां भवतां सुसेव्यां सन्तापनाशः क्व भविष्यतीति ॥५५॥

दृष्ट्वा मधौ तत्सुमनःसमृद्धि प्रमोदपूर्णेव समुत्सुकाऽहम् ।
आनन्दमग्नाऽभवमेव पुष्पैराभूषणं नैव दधे भवद्भ्यः ॥५७॥

धर्माश्रमेऽश्रान्तमृगीमृगाश्च ह्यव्याजस्नेहं भवतां स्मरामि ।
किं व्याकुलाः दर्भदलं विहाय, विदा न मह्यं ह्यधुना प्रदेया ?५८॥

मात्रोज्झितोऽयं मृगबालकल्पः सम्वर्धितः श्यामकमुष्टिभिर्वै ।
दर्भाङ्कुरैर्विद्धमुखोऽसहायो मयेङ्गुदीतैलनिषेकपुष्टः ॥५९॥

रुणद्धि मार्गं किमहो मदीयं मोहं ममत्वं मयि किं त्वदीयम् ?
ममत्वशून्येव गतिर्मदीया द्रक्ष्यन्ति त्वां योग्यगुरुश्च शिष्याः ॥६०॥

किं कोकिले कूजसि कुञ्जपुञ्जे, यात्रास्मदीया ध्वनिना त्वधीना ।
मयूर किं नृत्यसि नाश्रमेऽस्मिन्नस्मद्वियोगे विरतः किमर्थम् ?६१॥

पितुः सुदीक्षामवधार्य धृत्या गार्हस्थधर्मं ह्यनुश्रुत्य भक्त्या ।
पत्युः कुले सद्गृहिणीपदार्थं प्रणम्य पूज्यं पितरं गतेयम् ॥६२॥

शोकाकुलं वीक्ष्य निजाश्रमन्तु कण्वस्तपस्वी समयानुसारम् ।
संदिश्य शिष्यौ नृपपौरवार्थं पुत्र्याः हितार्थं वचनं बभाषे ॥६३॥

सगौतमीशिष्यजनैः समेता, सौभाग्यकामा पतिभक्तिमाप्तुम् ।
गंगातटे पावनशक्रतीर्थं, पवित्रगंगासलिलं ववन्दे ॥६४॥

शच्याः शुभे तीर्थजले गृहीते, नामाङ्किता भासुरमुद्रिकाऽस्याः ।
पपात गंगाविमले जले वै, प्रक्षालनायेव निजं कलंकम् ॥६५॥

सगौतमीशिष्यजनैः समेता, सा हस्तिनाह्वं नगरं प्रविश्य ।
राज्ञः सभायां भयमाशु हित्वा, सौन्दर्यमूर्तिर्हृदि तस्य तस्थौ ॥६३॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अज्ञातदुर्वृत्तदशाऽऽत्मनः सा नृपो यदेमां न बुबोध काले ।
कण्वस्य सन्देशवचोऽपि श्रुत्वा सस्मार किञ्चिन्न हि दैवयोगात् ।६७।
कण्वाश्रमीयां घटनां निवेद्य नामाङ्कितां भासुरमुद्रिकां ताम् ।
ददर्श च शून्यकराङ्गुलीं स्वां संस्मारयत् सा मृगशाववृत्तम् ।।६८।।
यदैव नार्यो निखिलाः नृपेण निन्दावचोभिश्छलछद्मरूपाः ।
तिरस्कृताः सभ्यजने समाजे, तेजस्विताऽस्यास्त्वरितं दिदीपे ।।६९।।
कोपाकुलैवं भुवि कम्पमाना, वातावधूता नलिनीव दृष्टा ।
सा वक्रभ्रूः रक्तिमनेत्रयुक्ता, "ह्यनार्यवृत्तं" नृपतिं बभाषे ।।७०।।
पत्युर्घृणाऽप्रीतिकरीमुपेक्षां, पितुर्निराशां प्रणलामुपेत्य ।
निराश्रयेवोत्कुलपंकलिप्ता, सन्तापशंकुं मनसीव लेभे ।।७१।।
रुरोद सोच्चैरतिकातराक्षी, सीतेव भूमेर्विवरं ग्रहीतुम् ।
स्त्रीज्योतिषा शोकनिवारणार्थम्, सैवान्तरिक्षे त्वरितं हि नीता ।।७२।।
हिमालये साऽप्सरसः सुतीर्थे, सुरासुराणां गुरुवासमध्ये ।
मारीचवात्सल्यनिधिं च लब्ध्वा स्नेहामृतं साऽदितितोऽन्वभूत ।।७३।।
दाक्षायणीदत्तमशेषदाक्ष्यं दाक्षिण्यभावं नवज्ञानदीक्षाम् ।
लब्ध्वेन्द्रियाणां शुचितां ललामां दृष्टा च सैवाऽत्र तपस्विनीव ।।७४।।
व्रतोपवासैर्नियमैः कठोरैर्बभूव सा चान्द्रकलेव क्षामा ।
घृतैकवेणी मलिनाम्बरा च, पत्युः सुदीर्घे विरहे रमन्ती ।।७५।।
प्रसूय पुत्रं भरतं महान्तं, निःशंकवीरं युधि कालरूपम् ।
सिंहोरुसत्त्वं भुवि सर्वदान्तं, बभूव लोके जननी सुधन्या ।।७६।।
पुण्याश्रमे पावनलोकज्ञानं, संस्कारबीजं विधिना प्रदाय ।
स्वाचारशिक्षां शुभमर्पयित्वा, प्रेम्णैव तं सूनुमियं पुपोष ।।७७।।
नृपस्तु निर्जित्य दुरात्मदैत्यान्, प्रत्यागतः कश्यपपुण्यभूमिम् ।
दृष्ट्वाऽत्र दूनां दयितां सपुत्रां मेने स्वयं सः कृतिनां सुधन्यः ।।७८।।
पूर्वापराधं मनसस्तु पत्युः क्षन्त्वा च मत्वा निजभाग्यदोषम् ।
लब्ध्वा दितेःकाश्यपसिद्धवाक्यं, शचीव सौभाग्ययुता बभूव ।।७९।।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शकुन्तला विधातुस्तु सत्क्रियेव गतिः शुभा ।
सौन्दर्यप्रेममूर्तिः सा कालिदाससुकल्पना ॥८०॥

धन्या निसर्गकन्येयं, प्रेमिकाऽप्रतिमा भुवः ।
प्रकृतिप्राङ्गणे पुष्टा, प्रीतिरीतिप्रकाशिनी ॥८१॥

सखिहृत्प्राणभूतेव, धूतेवाबन्धवायुना ।
मानिनी वीरमातेयं वात्सल्यार्थं मनस्विनी ॥८२॥

पुरुवंशपताकेव, भारतप्राणधारिणी ।
भरतमानसे स्थित्वा भारतकीर्तिवर्धिनी ॥८३॥

सती साध्वी सुशीलेयं राजते जनमन्दिरे ।
पूजयाम इमां भक्त्या सुभक्ताः भारताः वयम् ॥८४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चाटुल-पंचदशी

(डा० दादूरामः शर्मा, प्राध्यापकः, मध्यप्रदेश-राज्यान्तर्गते
सिवनीनगरस्थे शासकीयस्नाकोत्तरमहाविद्यालये
पत्रालय :— सिवनी, विषय : (जिला)-सिवनी, म०प्र०)

चाटुल-मंत्रिणोर्मध्ये कः प्रणम्यो मयादिमः ?
चाटुलं प्रथमं वन्दे यो हि सर्वार्थसिद्धिदः ॥१॥

नेतृ - मंत्रि - हुजूराणां चाटुलः सव्येतरः करः ।
कार्यसिद्ध्यै अतस्तस्य भवानुगामी सत्वरम् ॥२॥

हुजूर - प्रार्थिनोर्मध्ये चाटुलस्तथा तिष्ठति—
पति - पत्न्योर्मध्ये संयोजकं चिह्नं यथा ॥३॥

कालबूतं विना चाटुं नास्त्युपायः दृढतरः ।
सिद्धिसदनस्य स्लैबं शिरस्यनेन धार्यते ॥४॥

चाटूलमादाय समुचितेन साधय मार्गेण प्रयोजनम् ।
अधरे चाटूकारिता स्यात् करे मुद्रोपायनम् ॥५॥

बॉसं संतोष्यानुकूलं गोपनीयं प्रतिवेदम्—
लेखयितुं यदि वाञ्छसि चाटुं सेवस्वाहर्निशम् ॥६॥

युगेऽस्मिन् निरर्थकाः दक्षता - प्रतिभादयः ।
तासामुपरि पदं धृत्वा चाटुलः सफलतां वृणोति ॥७॥

यथा राम-नाम-कीर्तिर्वाल्मीकिना विस्तारिता ।
नेतृ - मंत्र्यादीनां गुणाञ्चाटुः प्रचारयति ॥८॥

मूकीभूतपण्डिता विद्यते सभा भारते ।
चाटुला अत्र वक्तारः कः पृच्छत्यधुना नः ॥९॥

मंत्रीणां दरबारे पदानां भवति लुण्ठनम् ।
कृतार्थाश्चाटुलवन्तश्चाटुहीना हतोद्यमाः ॥१०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

महिमवन्तश्चाटुला स्युरत्र मार्गमापका: ।
प्रीता: ददति न: पदानीच्छितानि न संशयः ॥११॥

चाटुधर्मो ध्रुवो लोके, अन्यधर्मा निरर्थका: ।
अन्यद्दधाना जना: पश्चात्त्यक्ता भविष्यन्ति ॥१२॥

त्यक्त्वा मानं मदमीर्ष्यां चाटुल-चरण - सेवनम्—
कुरु यदि सफलतावरणं कर्तुमिच्छसि सत्वरम् ॥१३॥

सर्वधर्मान् परित्यज्य चाटुलं शरणं व्रज—
मोचनं सर्वत्रासेभ्यो प्रयोजनसिद्धिभवेत् ॥१४॥

"विद्यमानेषु चाटुलेषु" स्वर्गादुद्घोषयति हरिः—
"अधुनावश्यकता नास्त्यवतारस्य मे भुवि" ॥१५॥

(टिप्पणी :— अस्यां कवितायां हुजूर-वास-कालबूत-स्लैवादयाः संस्कृतेतर शब्दाः भाषामाधुनिकीकर्तुं प्रयुक्ताः)

उत्कोचाष्टकम्

—डा० दादूराम शर्मा

नमः उत्कोचदेवाय सर्वकार्यविधायिने ।
नमोऽनन्तरूपाय, जगति सर्वत्र व्यापिने ॥१॥
अलं ज्ञानविकासेन, वृथेदं कर्म-पौरुषम् ।
कुरूत्कोचसाधनां मूढ ! कलौ सर्वार्थसिद्धिदाम् ॥२॥
संदिग्धमस्तित्वं येषां धर्मवैभिन्न्याज्जगति ।
सुरास्ते दुराराध्या: आशुतोषः सुरोऽयम् ॥३॥
अलमादर्शप्रलापेन निष्क्रियेणार्थसिद्धिषु ।
उपविशोत्कोचतरिणीमसफलतार्णवतारिणीम् ॥४॥
परिवर्तितं युगमन्ध ! नारिप्राधान्यमभूदिह ।
श्रीपतिं त्यक्त्वा विष्णुं तस्मादाराधय त्वं श्रियम् ॥५॥
शिवं वदन्त्याशुतोषं भक्त्यास्ते चिन्त्यबुद्धयः ।
विस्मृतः कथं तैः शिवजनकोऽयं सुरेश्वरः ? ॥६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

किं किं न ददाति भक्तेभ्यः उत्कोचाख्यः नवेश्वरः ?
मेघमन्द्रेण नादेनाह्वयत्ययं मुहुर्मुहुः— ॥७॥
'सर्वास्था: परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वत्रासेभ्यो मोक्षयिष्यामि मा शुचः" ॥८॥
विश्वैकता - मैत्र्योर्व्यापको भवति विस्तारः ।
एकसूत्रतामाबध्नाति भ्रष्टाचारः प्रतिजनम् ॥९॥

माहात्म्यम्—

उत्कोचाष्टकपठनेन व्यवहारकुशलो नरः ।
इच्छितं फलं प्राप्नोति, पदोन्नतिं च तत्क्षणम् ॥

समर्पणम्—

'भ्रष्टाचार' इति ख्यातां शासनतंत्रस्य कुरूपताम् ।
प्रथमोद्घाटयित्रे शाकुन्तले कालिदासाय समर्पितम् ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हरियाणाकविः श्री लछमनसिंह अग्रवालः

लक्ष्मणः

(श्री आनन्दवर्धन शुक्लः, आर ६ वाणी विहारः,
नयी दिल्ली-११००५९)

सुरभारतीपरिचरणप्रयतान्तःकरणः सदाचारशरणः अग्रवालो लछमनसिंहः १९९५ तमे विक्रमसम्वत्सरे कार्तिकमासस्य कृष्ण-द्वितीयायां हरियाणाराजस्य फरीदाबादमण्डलस्थिते 'झाडसैंतली' नाम्नि ग्रामेऽजायत। आजन्मनो विविधज्वरशीतलादिरोगपीडितः सन् शारीरिकदौर्बल्यं दृष्टिमान्द्यञ्च भजमानः शनैः शनैः क्षीयमाण-दृष्टिः एकोनविंशतिवर्षदेशीयोऽत्रलोकयितुं लोकमक्षमः पूर्णतः संवृत्तः। परं बाल्यादेव वाग्देव्याः प्रसादेन तीव्रबुद्धित्वादसौ विद्यालये विचक्षणत्वं प्रकटयन् तासु तासु कक्षासु छात्रवृत्तिमुपार्जयन् स्वयमेव दत्तशुल्कः इण्टरपरीक्षां यावत् नेत्रवानेव ववृते। पश्चाच्च नेत्रहीन-त्वात् परमाभीलं भजमानः बल्लवगढ़नगरे गृहे स्थित एव आङ्ग्ल-भाषामध्यापयन् वृत्त्युपार्जनं समारेभे।

सप्तविंशतिवर्षदेशीयस्यास्य काव्यकर्मणि मतिरस्फुरत् यदासौ 'प्रभातशतकम्' नाम काव्यं प्रणीय १९७० तमे ख्रिष्टाब्दे प्रकाशित-वान्। गच्छता कालेन स्वाध्यायमश्रित्य १९७३ तमे वर्षे संस्कृतविषय-मवलम्ब्य पञ्जाबविश्वविद्यालयतः एम० ए० परीक्षां समुत्तीर्णवान्। स्वाध्यायशीलत्वात् संस्कृतप्रियत्वाच्च काव्यकर्मणि तस्य प्रयत्नः उत्तरोत्तरं वृद्धिमेव समवाप। फलतः १९७७ तमे वर्षे 'कालरात्रिम्', १९८० तमे 'राष्ट्रदर्पणम्' १९८१ तमे 'विज्ञानगीतम्' १९८२ तमे 'कुटुम्बिनीम्' १९८३ तमे 'पद्यपुष्पवाटिकाम्' १९८४ तमे च 'धातु-विवर्तम्' नाम ग्रन्थं प्राचीकशत्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

'राष्ट्रदर्पण'स्तु प्रथमकृतेः प्रभातशतकस्येव संशोधितं रूपं वर्तते। अन्यत्र 'विज्ञानगीतम्' १९८२ 'कुटुम्बिनी' १९८४ तमे 'पद्य-पुष्पवाटिका' च १९८५ तमे ख़्रिस्ताब्दे 'हरियाणासाहित्यअकादमी' द्वारा पुरस्कृताः।

'धातुविवर्तें' नाम ग्रन्थे लेखकेन आग्ङ्लभाषानिर्माणे संस्कृत धातुकोषस्य योगदानं युक्तियुक्तं विशदीकृतम्। इदानीं च हिन्दी-भाषा लिखितं 'शब्दविवर्तः' नाम पुस्तकं प्रकाश्यमानं वर्तते। यत्र आङ्ग्लसंस्कृतभाषयोः सम्बन्धाः विशेषेण प्रकाशीकृताः। दर्शितञ्च यदाङ्ग्लभाषाकोशस्य प्रचुरतरस्यांशस्य विकासः संस्कृततः प्राकृत-भाषाणां विकासस्यैव सरणौ संजातः। अन्यानपि द्वित्राणि पुस्तकानि शीघ्रमेव लिपिबद्धानि भवितारः इत्याशास्यते।

१९९० ई० तमेशवीयेऽब्दे प्रकाशिते 'ऋतम्भरा' नाम्नि पुस्तके अयं महानुभावः स्वं 'लक्ष्मण' इति कवेरुपनाम्ना अलञ्चकार। अत्र पुस्तके श्री लक्ष्मणेन स्वपूर्वप्रकाशितकृतिभ्यः सूक्तयः संकलिताः। कवेर्वर्तमान आवाससंकेतोऽयम्—श्रीलछमनसिंह अग्रवालः, ५४/१, सिही गेट, वल्लबगढ़-१२१००४, फरीदाबादः।

अत्र दिङ्मात्रम् 'ऋतम्भरातः' सूक्तिरेका उदाह्रियते—

परैः किं किं राष्ट्रं कथय भुवि नीतं विधुरताम्,
कियन्तो धर्मास्ते विमतपुरुषैर्ये प्रशमिताः।
स्वकीयं दौर्बल्यं परिभवनिदानं भुवि नृणाम्,
प्रहाराः स्वीयानामनतिकरणीया न तु रिपोः॥

(ऋतम्भरा, पद्य ८२, पृ० २४)

★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषद्वार्ता

कविगोष्ठी

२४-११-१९९० तारिकायाम् नवदिल्ल्याम् वाणी-विहारे परिषदध्यक्षस्य डा० राजेन्द्र मिश्र-महाभागस्याध्यक्ष्ये किञ्च मध्यप्रदेश-संस्कृताकादमी-सचिवस्य डा० भास्कराचार्यत्रिपाठि-महाभागस्य मुख्यातिथित्वे समायोजितायां कविगोष्ठ्यां नैकेषां कवीनां संस्कृतरचना प्रास्तूयन्त । प्रायः सर्वैरेव कविभी राष्ट्रस्याखण्डतां खण्डयितुं तत्परा राजनेतारः स्वरचनाभिर्धर्षिताः । डा० रमाकान्त शुक्लेन 'वदत नेतारो मनाक्' शीर्षका दीर्घकविता प्रस्तुता । डा० राजेन्द्रमिश्रेण स्व रचनाभिः श्रोतारो मन्त्रमुग्धाः कृताः ।

परिषदः पञ्चदशः स्थापनादिवसः

देववाणी-परिषदः पञ्चदशः स्थापनादिवसः १३-१२-१९९० तारिकायां सम्मानितोऽभूत् । अस्मिन्नवसरे विगतवर्षेषु समायोजितानां परिषत्समारोहाणां दृश्य-श्रव्यांशानां साक्षात्कारोऽक्रियत । चित्रप्रदर्शनी, परिषत्प्रकाशितग्रन्थ-प्रदर्शनी चायोजिते । मुख्यातिथिना परिषदः प्राक्तनाध्यक्षेण डा० कृष्णकान्त-शुक्लमहाभागेन साम्प्रतिकविद्वेषमये वातावरणे ऐक्यसाधिकायाः देववाण्याः प्रचारस्य सविशेषं प्रासंगिकता निरूपिता ।

आचार्यरमेशचन्द्रशुक्ला इदानीं स्वस्थाः

२३-जुलाई १९९० तारिकायां परिषदः संस्थापकाध्यक्षा आचार्य रमेशचन्द शुक्लमहाभागाः दक्षिणचरणनिष्क्रियतयाक्रान्ता जाताः । इदानीं परमेश्वरकृपया ते स्वस्थतां भजन्ति । परमेश्वरं प्रार्थयामो यत्ते स्वस्थतराः सन्तु ।

'अभिराज' डा० राजेन्द्रमिश्राभिनन्दनम्

देववाणी-परिषदोऽध्यक्षः सुख्यातः संस्कृतकविः, 'अभिराज' डा० राजेन्द्र-मिश्रमहाभागो हिमाचलप्रदेशविश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षपदे नियुक्तः । इतः पूर्वं डा० मिश्रमहाभागः प्रयागविश्वविद्यालयस्य संस्कृत-विभागे प्रवाचकपदमलञ्चकार—इति विदितमेव विदुषाम् । २१-१२-१९९० ई० तारिकायां डा० मिश्रमहाभागाय देववाणी-परिषत्पक्षतः परिषन्महासचिवेन डा० रमाकान्तशुक्लेनाभिनन्दनं व्याहृतम् ।

(रमा शुक्ला)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अ० भा० प्राच्यविद्यापरिषदः पञ्चत्रिंशत्तममधिवेशनम्

हरिद्वारस्थे गुरुकुलकाँगडीविश्वविद्यालये अखिलभारतीय-प्राच्यविद्या-परिषदः (AIOC Pune) पञ्चत्रिंशत्तममधिवेशनम् १६—१८-११-१९९० तारिकासु आयोजितमभूत् । उद्घाटनं प्रो० राजा रमन्ना-महाभागेन कृतम् । डा० रमाकान्त शुक्लेन 'सुरभारती विजयते'-गीतिः प्रस्तुता । छात्राभिश्छात्रैश्च सरस्वतीवन्दना-कुलगीते प्रस्तुते । स्थानीयसचिवेन श्रीवेदप्रकाशशास्त्रि-महाभागेन मञ्चसञ्चालनं कृतम् । महासचिवेन प्रो० एस० डी० जोशि-महाभागेन द्विवार्षिकं विवरणं प्रस्तुतम् । परिषदो महाध्यक्षेण प्रो० रमारञ्जन मुखर्जीमहाभागेन प्राच्यविद्याया विभिन्नशाखासु क्रियमाणमध्ययनं किञ्च संस्कृतस्य रचनात्मकं साहित्यमवलम्ब्याभिभाषितम् । षट्त्रिंशत्तममधिवेशनं पुण्यनगरे १९९२ तमे वर्षे भविष्यति । डा० प्रभाकरनारायण कण्ठेकरमहाभागः महाध्यक्षो निर्वाचितः, प्रो० पाल थीमे-महाभागः विशिष्टाध्यक्षो निर्वाचितः । 'क्लासिकल संस्कृत'-विभागस्याध्यक्षः डा० रमाकान्तशुक्लो निर्वाचितः । अग्रिमाधिवेशने नैके पुरस्कारा अपि सर्वोत्तमपत्रवाचकेभ्यो दास्यन्ते येषु 'आचार्यश्रीब्रह्मानन्दशुक्ल पुरस्कार.' (१००१ रूप्यकात्मकः) 'पं० नारायणदेव-शुक्लपुरस्कार:' (५०१ रूप्यकात्मकः) अर्वाचीनसंस्कृतसाहित्यसम्बन्धिभ्यां श्रेष्ठ-शोधपत्राभ्यां दास्येते ।

अस्मिन्नवसरे 'निर्धन-निकेतने' १६-११.१९९० तारिकायां 'संस्कृत कवि सम्मेलनम'प्यायोज्यत । गुरुकुलकाँगड़ीविश्वविद्यालये संस्कृतविभागाध्यक्षेण डा० महावीरशास्त्रिमहाभागेन कवीनां स्वागतं कृतम्, डा० रमाकान्त शुक्लेन कवि सम्मेलनस्य सञ्चालनं कृतम् । मुख्यातिथित्वं सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य पूर्वकुलपतिना डा० राजदेवमिश्रमहाभागेन किञ्च आध्यक्ष्यं कुमायूँ विश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षेण डा० हरिनारायणदीक्षित-महाभागेन कृतम् । डा० राजेन्द्र मिश्र-डा०जनार्दनप्रसादपाण्डेय मणि-सौ० कमल अभ्यंकर-डा० पुष्पा दीक्षित-डा० इन्द्रमोहन सिंह-डा० जीतसिंह खोखर-जयेन्द्र-डा० जयश्री चट्टोपाध्याय-डा० शान्तिनाथ घोष-डा० बदरीनाथकल्ला-डा० कृष्णनारायण शास्त्रि-डा० मिथिलेश कुमारी मिश्रा-डा०शिवबालक द्विवेदि-प्रभृतिभिः षड्विंशतिकविभिः स्वरचनाः पठिताः ।

अधिवेशने ५०० प्रायाणि शोधपत्राणि प्रस्तुतान्यासन् ।

पं० ओगेटि परीक्षितशर्मणे साहित्य-अकादमी पुरस्कारः

नैकेषां नाटकानां काव्यानां च कर्ता पं० ओगेटिपरीक्षित शर्ममहाभागः 'श्रीमत्प्रतापराणायनम्' इत्याख्ये महाकाव्ये अस्मिन् वर्षे 'साहित्य अकादमी

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुरस्कारं' लभते-इति १५-१२-१९९० तारिकायां दूरदर्शनेन समाचारमाध्येन विज्ञापितम् । पं० शर्मणे वर्धापनानि !

मैत्रेयी कालेज-संस्कृत-साहित्य-सभा

२०-१२-१९९० ई० तारिकायां दिल्ली विश्वविद्यालयस्य मैत्रेयी महाविद्यालये तदीयसंस्कृतसभायास्तत्त्वावधाने 'कालिदासस्य काव्यवैभव'मवलम्ब्य डा० रमाकान्त शुक्लेनाभिभाषितम् । अस्मिन्नवसरे डा० शशी तिवारी डा० कमलेश जैन प्रभृतयो विदुष्योऽपि विचारविमर्शे सहभागित्वं निरवहन् । डा० शुक्लस्य काव्यपाठोऽप्यभूत् ।

मैनपुर्यां वेदमन्दाकिनी

मैनपुर्यां २६—२९-१२-१९९० तारिकासु सुरभारती-सेवासंस्थान-नवदिल्लीस्थ वेदविद्याप्रतिष्ठान-उत्तरप्रदेशसंस्कृताकादमी-संयुक्त-तत्त्वावधाने 'वेदमन्दाकिनी' नाम वेदगोष्ठी, विद्वदभिनन्दनम्, अखिलभारतीयसंस्कृतकविसम्मेलनम्, सांस्कृतिकनृत्यगीतादिकार्यक्रमाश्च आयोज्यन्त । समारोहस्योद्घाटनं वेदविद्याप्रतिष्ठानस्योपनिदेशकेन श्रीत्रिलोकीनाथधरमहाभागेन कृतम् । सुरभारतीसेवासंस्थानस्य महासचिवेन डा इच्छारामद्विवेदिना विद्वदभिनन्दनावसरे मुख्यातिथिः उ० प्र०-शिक्षामंत्री श्रीअशोकवाजपेयीमहाभागो मैनपुर्यामुत्तरपाञ्चाल पुरातत्त्वकेन्द्रस्य प्रतिष्ठापनार्थं स्थानीयमहिलामहाविद्यलये संस्कृतविषये स्नातकोत्तरकक्षाः प्रवर्तयितुं, वेदविद्यालयं स्थापयितुं च प्रचोदितः । डा० रामकरण शर्म - डा०वासुदेवकृष्णचतुर्वेद - डा०बच्चूलालअवस्थि - डा० रमेशचन्द्र शुक्ल-डा० रेवाप्रसाद द्विवेदिनोऽभिनन्दिता अभूवन् । सस्कृतकविसम्मेलनस्य आध्यक्ष्यं डा० रामकरणशर्मभिः मुख्यातिथित्वं च डा० वासुदेवकृष्ण चतुर्वेदैः निर्व्यूढम् । डा० पुष्पा दीक्षित-डा० उमाकान्त शुक्ल-डा० विष्णुकान्त शुक्ल-डा० त्रिवेणीप्रसाद शुक्ल-डा० शिवगोविन्द पाण्डेय-डा० रमाकान्त शुक्ल-श्री ओमप्रकाश त्रिवेद-श्री त्रिलोकीनाथ धर-डा० सुधाकराचार्य-डा० भास्कराचार्य त्रिपाठि-डा० इच्छाराम द्विवेदैः स्व रचनाः प्रस्तुताः ।

वेदमन्दाकिन्यां नैके वैदिकपण्डिताः वेदपाठं चक्रुः । या० जुगलकिशोर मिश्र-डा०रमाकान्त शुक्ल डा० विष्णुकान्त शुक्लादिर्भिविद्वद्भिः वेदाध्ययनस्य आवश्यकतामवलम्ब्याभिभाषितम् । कु० शेफाली-श्रीमती कञ्चन-निर्देशने नीरू सतीजादिभिः छात्राभिः संस्कृतगीतयः प्रस्तुताः ।

दिल्ली संस्कृत अकादम्या

२६-११-१९९० ई० तारिकायां '४ साउथ एवेन्यू लेन, नव देहली' इत्यत्र 'प्रियदर्शिनीन्दिरा संस्कृतकाव्यगोष्ठी' समायोजिता यत्र डा० भास्कराचार्य त्रिपाठी, डा० राजेन्द्रमिश्रः, डा० रमाकान्त शुक्लः, 'कविरत्न' श्रीकृष्ण

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सेमवाल: अन्ये चानेके कवय: स्व रचना: पपठु: । पूर्वलोकसभाध्यक्ष: श्रीबलरामजाखड़महाभागो मुख्यातिथि:, श्रीलालबहादुरशास्त्रि राष्ट्रियसंस्कृत-विद्यापीठकुलपति: डा० मण्डनमिश्रमहाभाग: विशिष्टातिथि:, दिल्लीप्रशासनस्य शिक्षायुक्त: श्रीगंगादासमहाभागश्च अध्यक्ष आसीत् । सञ्चालनं अकादमी-सचिवेन 'कविरत्न' श्रीकृष्णसेमावालमहाभागेन कृतम् ।

(आनन्दवर्धन: शुक्ल:)

डा० रमाकान्त शुक्लायाभिनन्दनग्रन्थ:

डा० रमाकान्त शुक्लस्य संस्कृतसेवित्वं, कवित्वं, सम्पादकत्वं, समीक्षकत्वं, नाट्यकर्तृत्वं, देववाणी-प्रचारकत्वं चालक्ष्य 'डा० रमाकान्त शुक्लाभिनन्दन-ग्रन्थसमित्या' स्तत्त्वावधाने 'देववाणी-सुवास:' इतिशीर्षकोऽभिनन्दनग्रन्थ: प्रकाश्यते। प्रसिद्धसंस्कृतकविर्विद्वांश्च 'अभिराज' डा० राजेन्द्र मिश्रमहाभागो ऽस्याभिनन्दनग्रन्थस्य प्रधानसम्पादकोऽस्ति । डा० पुष्पा दीक्षित-डा० रवीन्द्र नागर-डा० इच्छाराम‌द्विवेदप्रभृतय: सम्पादकमण्डलस्य सदस्या: सन्ति। अभिनन्दनग्रन्थस्य संरक्षकमण्डले प्रो० रामचन्द्रनारायण दाण्डेकर-डा० प्रभुदयालु अग्निहोत्री-डा० प्रभाकर नारायण कवठेकर प्रो० रमारञ्जन मुखर्जी-डा० आद्याप्रसाद मिश्र-डा० रामकरणशर्म-प्रो० सत्यव्रत शास्त्रि—डा० मण्डन मिश्र-डा० श्रीधरभास्कर वर्णेकर 'प्रज्ञाभारती'—डा० रमेशचन्द्र शुक्ल—डा० बच्चूलाल अवस्थिन: सदस्या: सन्ति । डा० देवीदत्तशर्म—डा० रेवाप्रसाद द्विवेद—आचार्य श्रीनिवासरथ—डा० राधावल्लभत्रिपाठि— डा० हरिनारायण दीक्षित—डा० भास्कराचार्य त्रिपाठि—डा० गणेशदत्तशर्माण: परामर्शदातृ-मण्डलसदस्या: सन्ति। अभिनन्दनग्रन्थे पञ्च खण्डा: सन्ति । १५०० प्रायपृष्ठेषु संस्कृतवाङ्मयस्य विविधपक्षेषु शताधिकविद्वद्भि: स्व विचारा अभिव्यक्ता:। श्रीकाञ्चीकामकोटिपीठाधीश्वराणां जगद्गुरुश्रीशङ्कराचार्याणामाशीर्वाद: डा० शुक्लाय, तस्य पञ्चाशत्तमे जन्मदिवसे (२४.१२.१९९०), वितीर्णो-ऽभवत्। २७.१२.१९९० तारिकायां नवदिल्ल्यां भारतस्य पूर्वराष्ट्रपतिना श्री ज्ञानी जैलसिंह—महाभागेन 'देववाणी-सुवास'स्य प्रथमखण्डस्य पाण्डुलिपि: डा० शुक्लाय समर्पिता। २८.१२.१९९० ई० तारिकायां मैनपुर्यामेकस्मिन् समारोहे, द्वितीयखण्डस्य पाण्डुलिपि: डा० शुक्लाय उ० प्र० शिक्षामन्त्रिणा श्री अशोकवाजपेयीमहाभागेन समर्पिता । अभिनन्दनग्रन्थो मुद्रणाधीनो वर्तते। ग्रन्थार्थं देशविदेशस्थैनेकैर्विद्वद्भि: स्व शुभकामना: प्रेषिता: सन्ति ।

(डा० रवीन्द्र नागर:)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्ययः : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasans-kritam/*Arvācīnasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)।

'देववाणी-परिषद्, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१३/१)-प्रधानसम्पादकः डा रमाकान्त शुक्लः। प्रकाशनतिथिः १५ १.१९९१।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० ५०.००
२.	श्रीनेहरूवृतम् (आचार्य रमेशचन्द्र शुक्लः)	रु० १५.००
३.	श्रीपादसप्ततिः(श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ५०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० १८.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना(डा०हरिनारायण दीक्षित)	रु० १५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्रः)	रु० १५.००
१६.	गान्धिसूक्तिसप्तशती (,, ,,)	रु० १५.००
१७.	सुगमरामायणम् (डा० रमेशचन्द्र शुक्लः)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० ७०.००
२०.	सूक्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नाट्यसप्तकम् (,, ,,)	रु० ६०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः)	रु० १२.००
२९	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २१.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० १०.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३३.	अभिशापम (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
३४.	ऋतम (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)
त्रयोदशवर्षे द्वितीयोऽङ्कः

१५ अप्रेलः, १९९१

प्रधानसम्पादकः
डा० रमाकान्त शुक्लः
एम० ए०, पीएच० डी०, साहित्याचार्यः
सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली—११००५९

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
१. आचार्य डा० रमेशचन्द्र शुक्ल: २. आचार्य श्री श्रीनिवास रथ:
३. डा० कृष्णकान्त शुक्ल: ४. डा० राजेन्द्र मिश्र:
५. डा० उमाकान्त शुक्ल: ६. डा० विष्णुकान्त शुक्ल:

अर्वाचीनसंस्कृतम् (१३/१२

(R. N. 34554/79)

(१५ जनवरी १९९१ ई०)

विषय-सूचि:

विषय:	लेखक:	पृष्ठांक:
१. सम्पादकीयम्		४९
२. हृदयोद्गार:	पं० आद्याचरण झा	५१
३. अस्ति किञ्चिद्वाचिकम्	'अभिराज' डा० राजेन्द्र मिश्र:	५२
४. पत्रम्	प्रो० रेवाप्रसाद द्विवेदी	५३
५. ,,	डा० कैलाशनाथ द्विवेदी	५४
६. पश्य बन्धो क्षणम्	डा० इच्छाराम द्विवेदी 'प्रणव:'	५५
७. भारते ऽनारतं किं नु बोभूयते	डा० रामप्रकाशवर्णी	५७
८. संगच्छध्वं संगच्छध्वं	कविरत्नम् ओम्प्रकाश ठाकुर:	५९
९. दीपावलीशुभेच्छा	डा० उमाकान्त शुक्ल:	६१
१०. पद्यप्रसूनस्तबक:	पं० शैलेन्द्रनाथ पाठक:	६५
११. मुक्तकद्वयी	डा० शम्भुनाथ आचार्य:	७०
१२. गलज्जलिका	'अभिराज' डा०राजेन्द्रमिश्र:	७१
१३. साधु जानेऽहम्	,, ,,	७२
१४. नवसंवत्सरवर्धापनम्	डा० अमियचन्द्र शास्त्री	७२
१५. वन्दे महापुरुष ! ते चरणारविन्दम्	'अभिराज' डा० राजेन्द्रमिश्र:	७३
१६. सिद्धरामेश्वरम्	डा० प्रकाश पाण्डे	७४
१७. किं जीवनं ते	डा० रमाकान्त शुक्ल:	७५
१८. देववाणी-परिषद्वार्ता	रमा शुक्ला	७६
१९. संस्कृत-जगद्वार्ता	आनन्दवर्धन शुक्ल:	७९—८२

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली।

२. प्रकाशनकालावधि:—त्रैमासिकम्।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्ल:, भारतीय:, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहार:, नयी दिल्ली-११००५९।

४. पत्राधिकारिणां नाम्ना सह सङ्केत:—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहार:, नयी दिल्ली-११००५९।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति। —डा० रमाकान्त शुक्ल:

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य त्रयोदशवर्षीयो द्वितीयोऽकः पाठकानां करकमलेषु आगच्छति ।

'कविः सृजति, सहृदयः समालोचकश्च अनुभवति पश्यति च।' —इति नियमानुसारम्-अर्वाचीनसंस्कृतस्य पाठकानां प्रो० रेवाप्रसाद द्विवेद-पं० आद्याचरण झा-प्रो० राजेन्द्र मिश्र-डा० कैलाशनाथ द्विवेदानां पत्राणि प्रकाश्यन्ते यानि लेखकेभ्यो नूतनां काञ्चित्प्रेरणां दातुमर्हन्ति ।

अर्वाचीनसंस्कृतस्य यदायमङ्कः प्रकाश्यते तदा देशे सर्वैरपि जनप्रतिनिधिभिः सचातुर्यम् एकवर्षोपस्थित्यामपि स्वपेंशन-लाभ-प्रस्तावे पारिते सति, नवम-लोकसभाभङ्गे सति दशमलोकसभानिर्वाचनस्य सज्जा भवति। मईमासस्य चतुर्थे सप्ताहे निर्वाचनं भविष्यतीति निश्चितम्। टिकटार्थिन इतस्ततो भ्रमन्ति। सद्य एव अधिगतटिकटा निर्वाचनार्थिनो भवद्द्वारि समागमिष्यन्ति। एतेषां जनप्रतिनिधीनां विषये डा० इच्छारामद्विवेद प्रणवस्य 'पश्य बन्धो क्षणम्' इति रचना भवद्भिरास्वादनीया। इयं रचना इदम्प्रथमतया मैनपुर्याः जिलाप्रदर्शन्यां २५.३.१९९१ तारिकायामायोजिते संस्कृतकविसम्मेलने कविना श्रावितासीत्। अर्वाचीनसंस्कृते इतः पूर्वं नेतॄन् निर्वाचनं चावलम्व्य प्रकाशितानां पं० विष्णुकान्त शुक्ल-डा० भास्कराचार्य त्रिपाठि-प्रो० बटुकनाथशास्त्रि 'खिस्ते'-डा० भगवतीलाल राजपुरोहित-डा० रमाकान्तशुक्लादिकृतानां रचनानां क्रमे स्रग्विण्यां रचितेयं प्रणवस्य नवा रचना कामपि नूतनामेव भङ्गीमङ्गीकरोति।

जसरानावासिनो डा० रामप्रकाशवर्णिनः 'भारतेऽनारतं किं नु बोभूयते' इति रचना अस्माभिः २५.३.१९९१ तारिकायां मैनपुर्यां श्रुता। इयं हि 'भाति मे भारत' 'रौति ते भारतम्' इति रचनयोः क्रमे पठनीया। अत्र हि देश-दुर्दशा वर्ण्यते कविना। कविरत्नं श्रीओम्प्रकाशठाकुरः 'संगच्छध्वं संगच्छध्वम्' इत्येतस्यांताललयनिबद्धायां रचनायां विघटनप्रवृत्तीर्विहाय एकतामवलम्वयितुं भारतीयजनान् प्रेरयति ।

विगतेषु वर्षेषु दीपावल्यवसरे अस्मदग्रजैः कविवरेण्यैः डा० उमाकान्त शुक्लैः संस्कृते शुभकामनाः प्रेष्यन्ते । ता एव हिन्दीअनुवादसहिता अत्राङ्के प्रदीयन्ते । अत्र कवेः कल्पनापाटवं दर्शनीयं विद्यते ।

तराणाग्रामवासिना श्रीशैलेन्द्रनाथपाठकमहाभागेन साकमस्माकं सम्भाषणम् उज्जयिन्यां कालिदास-समारोहावसरे समायोजितेषु संस्कृतकविसमवायेषु भवति । पाठकमहोदयस्य 'पद्यप्रसूनस्तबके' पारम्परिकप्रौढ्या सह देशभक्ति-भावः प्राधान्येन व्यज्यते । सूक्तिविधानमपि रमणीयम् ।

डा० शम्भुनाथ आचार्य-प्रणीता 'मुक्तकद्वयी' एकतो वसन्तसखस्य काम-देवस्य गरिमाणं गरयति अपरतश्च राष्ट्रस्य कष्टेन दुःखमनुभवति ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

'अभिराज' डा० राजेन्द्रमिश्रस्य 'गलज्जलिका' 'साधुजानेऽहम्' इति शीर्षके द्वे अपि प्रत्यग्रे रचने सामाजिकीं देशस्थितिं नेतॄणां च नाट्यकौशलं सम्यगभिव्यङ्क्त:। तदीया 'वन्दे महापुरुष ! ते चरणारविन्दम्' इति रचना 'फाल्गुनिकीं सादरपरिहासप्रवृत्तिं द्योतयति।

श्री अमियचन्द्र शास्त्री नवसंवत्सरे वर्धापनं प्रयच्छति। स्वीकुर्वन्तु सर्वेऽपि। डा० प्रकाशपाण्डे 'सिद्धरामेश्वरम्' इत्यत्र महाबलेश्वरक्षेत्रे मुनिसिद्धरामेश्वरनाम्ना ख्यातं तीर्थं वन्दते।

'किं जीवनं ते' इतीयं रचना मया २९.३.१९९१ तारिकायां 'नीलाचल एक्सप्रेस'—रेलयानेन नवदिल्लीतो रायबरेलीं गच्छता कृता। इयं हि मुक्तकानां समूहोऽस्ति यत्र प्रत्येकं मुक्तकं स्वतन्त्रं वर्तते। इयं हि उर्दू गजल-शैलीमनुधावति। इयांस्तु विशेषो यदत्र मुक्तकानां संख्या गजलतोऽधिकतरी विद्यते। अत्र कवेरनुसारं जीवनस्य साफल्यसाधकानां तत्त्वानां संकेतो विधीयते क्वचिच्च हास्यव्यङ्ग्यसंस्पर्शोऽप्यत्र द्रष्टुं शक्यते। भाषा तु सरलैवेति मन्ये। अस्या: सर्वप्रथम: पाठो मया रायबरेलीनगरस्थे फीरोजगान्धीमहाविद्यालये ३०.३.१९९१ तारिकायां कृत:। महाविद्यालयीयप्रेक्षागारे महाकविकालिदासविषयिण्या: संगोष्ठ्या: समापनसत्रस्याध्यक्षतां कुर्वाणेन मयेयम् 'अभिराज' डा० राजेन्द्रमिश्रस्य मुख्यातिथित्वे किञ्च डा० इन्द्रदेव द्विवेद-डा० सुधाकराचार्य त्रिपाठि-डा० आर०पी०सिंह-डा० रसराज-डा० यदुनाथप्रसाददुबे-डा० कृष्ण कुमार मिश्र-डा० जनार्दनप्रसाद पाण्डेय मणि-प्रभृतीनां विद्वत्कवीनां समक्षे डा० शिववरणशुक्लस्य संयोजकत्वे तत्रत्यछात्राध्यापकानामतिथीनां च पुरत: श्रावयित्वा तदाशिषां पात्रीकृता। तदनु ३१-३-१९९१ तारिकायां बरेली नगरे 'अल्पना' नाम्न्या: संस्थायास्तत्त्वावधाने अस्या: पाठोऽभूत्। ह्य एव अर्थात् १४.४.१९९१ तारिकायामस्या केचनांशा: आकाशवाण्या दिल्लीकेन्द्रात् प्रसारितायां 'रक्षको यत्र भक्षक:' इति मे वार्तायामपि उद्धृता जाता:। राजधानीकालेजस्य प्राध्यापकबन्धुभि:, कर्मचारिभि: छात्रैश्चापीयं श्रुता। इदानीमियमर्वाचीनसंस्कृतस्य पाठकान् निकषा समागच्छति। कीदृशीति त एव जानन्तु।

देववाणी-परिषद्वार्तायां संस्कृत-जगद्वार्तायां च विगतमासत्रये घटितानां केषाञ्चिद् गतिविधीनां संक्षिप्तविवरणं दीयते। विदुषामाश्रव:

१५-४-१९९१
आर ६ वाणी-विहार:
नयी दिल्ली-११००५९

(डा० रमाकान्त शुक्ल:)
प्रधानसम्पादक:

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥ श्रीः ॥

राष्ट्रपतिसम्मानित
आचार्यपण्डित आद्याचरण झा

यात्रा-शिविरः
A-14, नीतिबागः
नयी दिल्ली
२०.३.१९९१

हृदयोद्गारः

(१) १८.३.९१ दिनाङ्के सुमधुरसान्ध्यवेलायां नयीदिल्लीस्थित ६ वाणी विहारे डॉ० रमाकान्तशुक्लमहोदयानामावासे सुरभारतीचर्चामर्चां दृष्टवा श्रुत्वा च नितरां मोदमाप्तं मे मनः।

(२) अत्र देववाणी-परिषदः कियन्तः समुत्साहवन्तो युवानो विद्वांसः सदस्याः डॉ० शुक्लमहोदयेन साकं समुपस्थिताः आसन्। तत्र संक्षिप्त-सारस्वतसमारोहे यन्मया दृष्टं यच्च श्रुतं, यच्च लब्धं तत्सर्वं मम वार्धक्येऽस्मिन् स्फूर्तिवर्धक मकरध्वजतुल्यम्।

(३) स्व सहयोगिभिः सह शुक्लमहोदयस्य सुरभारती-सपर्या न केवलं वैदिकी षोडशोपचारमयी किन्तु वैज्ञानिकी वैदिकी सविशेषाशेषोपचारमयीति निःसंकोचं ब्रवीमि।

(४) विविधसाहित्यिकरचनाग्रन्थान्, अर्वाचीनसंस्कृतनाम त्रैमासिकीं संस्कृतपत्रिकामवलोक्य विहंगमदृष्ट्या कतिपयांशांश्च प्रपठ्य दूरदर्शने "भाति मे भारतम्" इति परिदर्शं च विधाय सुसौख्यं सुशान्ति चाप्तवान्।

(५) पत्रिकायामस्यां यत्र कियन्तो वरीयांसो मनीषिणः कियन्तो मम सहयोगिनश्चिन्तकाः विद्वांसस्तथा बहवो ममानुजप्रतिमाः कनीयांसो युवानः प्रभविष्णवो लेखकाः सन्ति, तत्र न जाने केनापि दुर्भाग्येन नाहमेकत्राप्यस्मि। नात्र निदानान्वेषणं समुचितं केवलं संयोगमपहाय।

(६) पौरस्त्यपाश्चात्त्योभयविधप्रासंगिकीं रचनां वीक्ष्यामरवाणी समेधते प्रतिदिनमिति मन्यामहे। निष्ठया श्रद्धया साहसेन धैर्येण सुरभारती-समर्थकाः कियन्तः सन्ति इत्यप्यहं सुदीर्घकालाध्ययनाध्यापनविशालप्रशासना-नुभवेन जानामि। नात्र तस्य विश्लेषणं प्रासंगिकम्। वदन्ति बहवः, कुर्वन्ति कियन्त एव।

(७) एभिः कतिपयैरुद्गारैः देववाणीं प्रति नमन् परिषदं प्रति शुभाशंसां व्याहरन् डॉ० शुक्लमहोदयेन समं परिषत्परिवारं निकषा हार्दिकीं मङ्गल-कामनां प्रेषयामि।

—आद्याचरण झा

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अस्ति किञ्चिद्वाचिकम् !

शिमला, १०.४.९१

स्वति। सादरं प्रणमति मिश्रोऽभिराजराजेन्द्रः श्यामलापीठस्थहिमाचल-प्रदेशविश्वविद्यालयीयसंस्कृतविभागाध्यक्षोऽर्वाचीनसंस्कृतसम्पादकान् डॉक्टर-श्रीरमाकान्तशुक्लमहाभागान्। त्रिरत्नमिव पत्रिकाया अङ्कत्रयं समवाप्य तदन्तरालनिबद्धकाव्यरसायनञ्चाकण्ठं निपीय परितोषघूर्णितनयनोऽयं सारस्वतानुचरः परमामोदमावहते।

प्रणवाख्येन मद्दुर्ललितानुजेन मदनपुरवारतवेनापि निर्मदेन विरचितं मित्रदूतं पाठं पाठं महान् प्रमोदस्समजनि। यतो हि काव्यमिदं न केवलं प्राक्तनदूतकाव्यपरिपाटीमधुनाऽपि सञ्जीवयांततरामपि तु कमपि कम्रधियं सुधियं विश्रुतयशसं नायकीकृत्य संस्कृतकविताया जीवन्ततामपि साधु साधयति। मध्ये मध्ये च कविना प्रयुक्ता नर्ममर्मप्रसङ्गा अतिपरिचयादवज्ञां जनयन्तोऽपि गोष्ठीरसं सम्यक् पोषयन्ति!

यथा खलु मदुपज्ञे मृगाङ्कदूताभिधे काव्ये भारतस्थाः सर्वेऽपि सहृदय-संस्कृतसेविनस्संस्मृताश्चन्द्रयात्राव्याजेन तथैवात्रापि प्रणवकविना कश्चित्प्रेष्ठो वयस्यो डॉ० रमाकान्तो ललितकाव्यविषयीकृतो वर्तते। काव्यप्रणयनार्थं कृपया मत्साधुवादैः आशीर्वचोभिश्च तेजस्विनमिमं माणवकं सभाजयन्तामिति साग्रहं निवेद्यते।

'वदत नेतारो मनागि'ति कशाघातप्रसविनी नवप्रसूतिस्सारस्वती कवि-कण्ठीरवस्य रमाजानेश्श्रीरमाकान्तशुक्लस्य प्रत्यग्रगलितराजनयमधिक्षिपति वाक्प्रहारैः। काव्यमिदं साम्प्रतिकं शासनतंत्रं निरवगुण्ठं विदधाति। बकव्रतान् नेतॄन् नग्नीकरोति। घोणाघर्षणं विधाय सारमेयकल्पा लाङ्गूलचालनकला-कोविदा ये नेतारो वदनोदरदर्शनैः जनसमुदायं प्रभावयन्ति त एवासन्दीमवाप्य किं किं कुकृत्यं न कुर्वन्ति? सर्वमस्माभिर्दृष्टं व्यतीतेषु कतिपयमासेषु! जन-संवेदनावाहकः कविर्नैतादृशं पापं सोढुं क्षमते। निरङ्कुशोऽसौ। अत एव निर्विशङ्कं निर्भर्त्सयति तादृशान् नयकीटान्।

डॉ० रमाकान्तशुक्लं भूयो भूयोऽभिनन्दामि काव्योपायनार्थम्। अर्वाचीन-संस्कृतं निजार्वाचीनत्वं साधु संरक्षेदित्याशासानो विरमति मिश्रोऽभिराज राजेन्द्रः।

—मिश्रोऽभिराजराजेन्द्रः

आचार्योऽध्यक्षश्च, हिमाचलप्रदेशविश्वविद्यालयीयसंस्कृतविभागे (शिमला)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कालिदाससंस्थानम्, वाराणसी

२८, महामनापुरी, वाराणसी-५

संस्थापक अध्यक्ष
आचार्य रेवाप्रसाद द्विवेदी
पत्रक्रमांक २२/९१-९२

सचिव
सदाशिवकुमार द्विवेदी
दिनांक १२.४.१९९१

प्रेष्ठा डा० रमाकान्त शुक्लाः
६, वाणी विहारः, नव दिल्ली-५९

कविवर्य्या डा० रमाकान्तशुक्ला जयन्ति,

अर्वाचीनसंस्कृतस्य १५.१०.८९, १५.७.९०, १५.१०.९० इत्येतैस् तिथिभिः प्रकाशिता प्रापि मया ह्यस्तन एव दिवसे अङ्कत्रयी सेयं वेदत्रयीय मङ्गलाय प्रभवति संस्कृतस्य। १५.१०.८९ दिवसीये अङ्के भवतां दाराशिकोहीयं नाम नाटकमतीव महत्त्वपूर्णमिति हृदयेन शपानि। तस्यास्य हिन्दीभाषामयोऽनुवादोऽपि मूलेन सह पृथक्पुस्तकतया प्रकाशनीयः। धर्मतः सम्प्रदायस्य को नु भेद इति काव्यादस्मात् स्पष्टतमम्। सम्प्रदायेषु य आग्रहः संप्रदायान्तर-द्वेषक्लिष्टः स एवाधुना धर्मरूपेणाधिक्षिप्यते। एतादृशं साहित्यमिदंयुगेऽत्यन्त-मेवावश्यकम्। एतत्प्रकाशनायापि भवतां वर्धापनानि।

१५.७.९० अङ्केऽपि सर्वा अपि रचनाः काव्यमय्योऽभिनवाश्च। अत्र श्रीमान् झोपाह्वो बटोहीकवि ललिता-लालबहादुरावधिकृत्य श्रीलाललालित्यम् इति यत् काव्यं प्रणिनाय तत्र भावना श्रेष्ठा, श्रीमतः प्रणवकवेर्मित्रदूते धाम-चतुष्टयस्य यद् वर्णनं तत्रानुभवामो मेघदूतस्य काव्यकलायाः स्पर्शम्। भगवान् बदरीशः स्पर्शमिमं प्रगुणयेद् येन मित्रवराः श्रीद्विवेदिनः समुदारं यशोऽर्जयेयुः। १५.१०.९० अङ्केऽपि जोशी केदारनारायणः प्रशस्यः। तस्य ग्रीष्मं वर्षाश्चाधिकृत्य रचितानि ३३ पद्यानि स्तुत्यान्येव। अनयोर्द्वयोरपि कविरत्नयोः संयोगस्य पूर्वस्वरदीर्घत्वावधानं प्रार्थ्यते। एव ब्रुवाणोऽत्रत्यस्यैव डा० रामेश्वरदत्तशर्मणो बिभेमि—'भाषाशुद्धि समादाय भाययन्ति तदेषिणः, लिङ्ग-संख्यादिसंस्कार-चक्रे यातं च तद्वयः' इति वाक्यात्।

सत्यभक्तदोहावलिः सुभाषितेषु श्रेष्ठायते, सुन्दर-द्वादशी च तथैवोत्तमायते हिन्द्याङ्गलाङ्गलैः पोषितगुणा।

एवं विधाय भवतां संरम्भाय शतं, सहस्रं, कोटिशश्च साधुशब्दाः सादर-मुपायनीक्रियन्ते। अचिरादेव भूयादेवात्र भवतामदेवमातकं सर्वविधसमृद्धि-सौराज्यम्, जायेतैव च सुजाता कीर्त्तिः सर्वपथीना, सार्वजनीना, सर्वाङ्गीण-सौभगयोगा चेत्याशंसे

काश्यपो द्विवेदी
रेवाप्रसादः 'सनातनः'

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥ श्रीहरिः ॥

डा० कैलाशनाथ द्विवेदी
पीएच०डी०, डी०लिट्०
प्राचार्य

मथुराप्रसाद महाविद्यालय
कोंच (जालौन)-२८५२०५

दिनांक १२.४.९१

प्रिय वन्धुवर डा० शुक्ल जी,

सादर नमस्कार !

अत्र कुशलं तत्रास्तु। आपने "अर्वाचीनसंस्कृतम्" के वर्ष १९९० के चारों अंक भेजने की कृपा की। एतदर्थ हार्दिक धन्यवाद ! इन सबको अद्योपान्त अवलोकित कर अत्यन्त आनन्दित हूँ। आपकी 'उत्तरमङ्गलम्' 'वदत नेतारो मनाक्' 'जाबिलपुरं चल रमाकान्त !' जैसी स्तरीय सामयिक श्रेष्ठ रचनाएँ वस्तुतः हृदयावर्जक हैं और प्रेरणाप्रद भी। इन उत्कृष्ट अंकों की प्रस्तुति के लिए हमारी हार्दिक बधाई एवं आगे भी ऐसे सुन्दर अंकों की सफलता हेतु अनेक शुभकामनाएँ स्वीकारें।

आपका ही
कैलाशनाथ द्विवेदी

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पश्य बन्धो क्षणम् !

(डा० इच्छाराम द्विवेदी 'प्रणवः', मैनपुरी)

शुभ्रवस्त्रावृताः कृष्णलीलारताः
वामनाचारदक्षाः कृतघ्ना अमी ।
याचमाना मतं द्वारदेशस्थिता
निस्त्रपा आगताः पश्य बन्धो क्षणम् ॥

एभिरेवापमानं कृतं संसदो
ध्वंसिता लोकविश्वासभावान्विति: ।
लोकसौधं तिरस्कृत्य स्वैः कर्मभिः
लोकरक्षापराः पश्य बन्धो क्षणम् ॥

कोऽपि 'बोफोर्स'-शोभाधरो राजते
मण्डलायोगकीर्त्या युतः कोऽप्यसौ ।
बर्बरं पूजयन्कोऽप्यसौ बर्बरः
रामभद्रायते पश्य बन्धो क्षणम् ॥

कोऽपि धर्मध्वजो राष्ट्रसेवापरः
स्वे रथे चिह्नमायोज्य देशेऽभ्रमत् ।
तद्दलं वर्द्धितं किन्तु देशस्थितिः
क्लिश्यते कर्दमे पश्य बन्धो क्षणम् ॥

एकतो जम्बुका एकतो वै वृका
एकतो व्यावृतास्या महाव्यालकाः ।
दिग्विमूढा वराकी प्रजा कम्पते
प्राणरक्षाकुला पश्य बन्धो क्षणम् ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मूल्यसीमापणेऽसीमिता दृश्यते
नेतृभिस्तन्न राज्ये परामृश्यते ।
कर्षकाणामहो क्रन्दनं श्रूयते
तैलकोषेषु हा पश्य बन्धो क्षणम् ।

नित्यहत्यापरोधो वरीवर्द्धते
क्रूरहिंसा समाजे दरीदृश्यते ।
शान्ति - सीता वराकी भृशं कम्पते
लोकविद्रावणो रावणो वर्द्धते ।।

शासनासन्दिकाराधने प्रत्यहं
निन्दनीया कुनीतिर्वरीवर्तते ।
बाहुबद्धाः समे चौरलोका अमी
आगता नाशितुं पश्य बन्धो क्षणम् ।।

यत्र निर्वाचने नित्यहिंसाकराः
शस्त्रसन्धा खला आप्तुकामा मतम् ।
तत्र निर्वाचनं कीदृशं स्यात्सखे
पामरं संगरं पश्य बन्धो क्षणम् ।।

किन्नु कुर्मो वयं साम्प्रतं बान्धवाः
यद्धि निर्वाचनं नो गृहे प्रापितम् ।
तद्धि नूनं विचिन्त्यैव देयं मतं
राज्यनिर्वाचने पश्य बन्धो क्षणम् ।।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भारतेऽनारतं किं नु बोभूयते ?

(डा० रामप्रकाश वर्णी, एल० आर० कालेज, जसराय फिरोजाबाद)

भारतेऽनारतं किंनु बोभूयते,
धर्मभावो विलुप्तः कथा श्रूयते ।
मानवो दानवीभूय दन्द्रस्यते,
स्वार्थसंसाधने दिक्षु चङ्क्रम्यते ॥१॥

किं विधेयं नु ध्येयं न वै चिन्त्यते.
सद्गुरुर्नैव कश्चिन्न शिष्यो भुवि ।
नाशमायात्कथं तामसी यामिनी
ज्ञानदीप्तो रविर्नैव विद्योतते ॥२॥

वर्द्धते तृष्णिका - हारिणी प्रत्यहं,
मोमुदीतीह लिप्सा वने वह्निवत् ।
जाहसीति प्रवृत्तिः सखे ! दानवी,
मानवी द्रौपदी रोरवीति द्रुतम् ॥३॥

धर्मशिक्षा सुजाताऽधुना घातिनी,
कैङ्करीं नो ददातीति जोघुष्यते ।
मातृहा तातहा देवहा दूषिता,
शैक्षिकी पद्धतिर्मानवैः पूज्यते ॥४॥

प्रैदिधद् भावना नास्तिकी प्राणिषु,
प्रेजते देवदेवाधिदेवार्चनम् ।
आस्तिकी वल्लरी क्षीणतामागता,
भौतिकीं भूतिमाप्तुं जगद्धूयते ॥५॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कूटनीतिः पिशाची दनोध्वंस्यते,
सभ्यनीतेर्वनं तत् पनीपत्यते ।
द्वेषज्वालावली स्वार्थव्यालावली,
दंदहीतीहया ददशीति प्रकम् ॥६॥

निष्कुटे नैव पम्फुल्यते मानसे,
सौरभेयी लता मालती माधवी ।
गन्धमाघ्राय हीनं निजेगिल्यते,
दुर्द्विरेफः परस्वं च पेपीयते ॥७॥

हे विधातः ! कथा कौमुदी नैव मे,
दुर्दशा मानवी विद्यते त्वीदृशी ।
हेयसी श्रेयसी प्रेयसी किं नु यत्,
प्रेक्षिता यादृशी सैव रुग्गीयते ॥८॥

★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संगच्छध्वं संगच्छध्वम्

(ओमप्रकाश ठाकुर: डी ७५७, सरस्वती-विहार:
दिल्ली-११००३४)

हे भरतदेशसदलंकारा:
सुजना ! मोहादवबुध्यध्वं
समयस्याह्वानमिदं स्फीतं
सङ्गच्छध्वं संगच्छध्वम् ।
क्व गतं तद् भारतवर्चस्वं
क्व गतं तेज: पौरुषमतुलं
जातिर्याता किं कातरतां
पीत्वा मदमोहमयीं मदिरां
हास्यास्पदतां यातां स्वदशां
किंचिच्चेतस्याकलयध्वम् ।।१।।
संगच्छध्वं……

अलमलं प्रथाभिस्ताभिर्व:
या मिथो विघटनं जनयन्ते
कुर्म: किं जातिविभेदैस्तै:
हीनोन्नतभावं घटयन्ते
भित्वा पुराणजर्जरदुर्गं
नव्योदयहेतो: प्रयतध्वम् ।।२।।
संगच्छध्वं……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

परिचिनुत संघशक्ति महतीम्
अन्योन्यं वृथाविवादैः किं
सर्वेऽन्ये लक्ष्यनिषक्तदृशः
शक्तिर्वो हन्त विकीर्णा किं
स्थितिमाकलय्य सकलां सद्यः
मोहस्वापादवबुध्यध्वम् ॥३॥
सगच्छध्व·······

अरयः षड्यन्त्रपराः परितः
समयं गमयथ तन्द्राभक्ता
प्राचां गुरुतागौरवगाने
लग्नाः स्मृतशौर्यकथावृत्ताः
अवधारितकरणीयास्त्वरितम्
उचितं प्रतिकारं प्रकुरुध्वम् ।४।
संगच्छध्वं······

विद्याबलबुद्धिविधानानां
क्षुद्रैररिभिः कथमवमानः
आनीय चेतनां राजनये
संरक्ष्यो राष्ट्रियसम्मानः
स्वार्थानपहाय समृद्धिचयैः
विलसत नृत्यत संमोदध्वम् ।५।
संगच्छध्वं······

★★★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दीपावली-शुभेच्छा:

(डा० उमाकान्त शुक्लः, ५६ पटेलनगरम्
मुजफ्फरनगरम् 'उ०प्र०')

धम्मिल्ले यूथिकेवांग राजमाना सुमंगला ।
ध्वान्तेऽस्मिन् दीपमालेयं कुर्याद्वो मंगलं शुभम् ।।

जूड़े में टँकी जूही सी अन्धेरी रात की दीपमाला पर मङ्गल कामना ।

तमालनीले तमसां विताने
समर्पिता स्वर्णमयीव रेखा ।
नखक्षताकार-बलि-प्रदीपै-
र्दीपावली वस्तनुतां प्रमोदम् ।।

दीपावली के पूजादीपों से आपका अभिनन्दन ।

ऋज्वायता लम्बितवक्रभावा
सान्द्रा क्वचित् क्वापि च सान्तराला ।
तमस्ततेश्चन्दनपत्रभङ्गो
दीपावली दिश्यतु वः प्रमोदम् ।।

दीपावली, अँधेरों पर खिची चन्दन रेखा, आपका मंगल करे ।

छन्दोविशेषनिचितैरिव दीपदीपै-
श्छेकोक्तिरम्यकलना शुभदीपमाला ।
व्याप्तं तमःपिचुभरं धवलीकरोतु
सौवर्णपिञ्जनशतैरिव पिञ्जयन्ती ।।

दीपपंक्तियों—सोने की धुनकियों से तम-तूल को छाँटती दीपावली आपका मंगल करे ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अमा सवित्रीं प्रविलोक्य पार्श्वे
शिखा सृपाटीं प्रविभिद्य सोत्काः ।
स्फुरन्ति चूङ्कृत्य तमःकुलाये
दीपाण्डकेभ्यो द्युतिचाटकैराः ॥
तमोऽक्षरे कालमहाप्रबन्धे
न्यस्तां क्वचिद्गैरिकरागरेखाम् ।
विडम्बयन्ती कुरुताच्छिवं वो
दीपावली ज्योतिरदभ्रकुल्या ॥

दीपक के अण्डों से फुदकते द्युति के चिरौटों की चटक। या फिर फिर काल के महाप्रबंध की किसी पंक्ति पर खिंची लाल रेखा। ज्योतिकुल्या दीपावली आपका मङ्गल करे।

उद्यद्धिरण्मयसहस्रकरालकुन्त-
च्छायानुकारकुशलास्तिलकाभिरामाः ।
कौन्दप्रगल्भनवकुड्मलकान्तशिल्पा-
श्चूडालदीपकलनास्तिमिरं दहन्तु ॥

सुनहरी बर्छियों, तिलक के आकारों या कुन्दकलियों सी दीपशिखाएं आपका मङ्गल करें।

क्वचित्प्रकाशद्रुमकुड्मलाभा
क्वचिच्च हैमाक्षकलापवीक्ष्या ।
शृंगाटके शारिफलाभिरूपा
दीपावली दिव्यतु दीपिताशा ॥
प्रकाशलेखाभिरनाविलाभि-
रभ्यस्तरेखागणिताभिरामा ।
लाजैर्हंसद्भी रुचिरैश्च मिष्टैः
श्रेयो विदध्यात्तव दीपमाला ॥

कहीं—
प्रकाश के रूख की कलियाँ,
कहीं—

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सोने के पासे
और
चौराहों पर—
चौसर सी बिछी
दीपावली !!!
प्रकाश रेखाओं को देख, लगता है
रेखा गणित सीख रही है
यह
हँसती खीलों
और
रुचिकर मिठाइयों से
आपका मङ्गल करे।

इह प्रतोल्यामभिषेणयद्भि-
भर्ल्लूककालैर्निविडैस्तमोभिः ।
असावुदेष्यन् मुदितः प्रदीपो
निवार्यते तद्विलसत्प्रकाशात् ॥
तावत्तमो दृष्यतु लेढु लोकं
रुणद्धु चक्षूंषि श्रृणातु चेटः ।
यावत्स्वकीयाभिरनाविलाभिः
प्रभाभिरारात्स्मयते न दीपः ॥
स्निग्धाञ्जनक्षोणिभृति प्रफुल्ल-
प्रसूनया किंशुककानश्रीः ।
सान्द्रान्धकारे विकचप्रकाशा
दीपावली दीव्यतु दीपिताशा ॥

क्रूर काले भालुओं से निविड अँधियारे
परजित हों।
जलें
नवदीप

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दीपावली का शुभ।
सुर्मई पर्वत खिलें ज्यों
ढाक के फूलें वनों से
त्यों
अमावस की गली ये
दीप जागें
स्नेह पूरित।

तालीवने पाटलकुड्मलानां
विडम्बयतीय विकासलोलम्।
कीराङ्गनात्रोटिमनोहरश्रीः
शिवं विदध्यात्तव दीपमाला॥

ताडकुंज में खिली पाटल कलियों
और
सुग्गों की चोंच
का
रंग रूप ले दीपावली
मंगलमय हो।

★ ★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पद्यप्रसूनस्तबक:

(पं० शैलेन्द्रनाथ पाठक: एम० ए० शास्त्री
नयापुरा तराना, जिला उज्जैन)

श्रीमत्सहृदयानन्दवर्धिने मानदायिने ।
वाग्लक्ष्म्यैकान्तभक्ताय रमाकान्ताय ते नमः ॥
सादरं प्रेष्यते पद्यप्रसूनस्तबको नवः ।
सन्नतेन मया तेन प्रीयतां सुकवेर्मनः ॥
उज्जयिन्याः समीपस्थतराणाग्रामवासिनः ।
शैलेन्द्रस्य प्रणतयो विलसन्तु सदा मम ॥

वन्दना

सारस्वतमहत्त्वलास्यलोलां मनोहराम् ।
वन्दे कवीन्द्रमण्डितकमन्दिराभिनयोज्ज्वलाम् ॥

ज्योतिष्मतीं शुद्ध - गुणात्मशक्ति,
ज्ञानश्रियः शान्त-विलास-हासाम् ।
मनीषिवृन्दैरभिनन्दनीयां
वन्दामहे कामपि चित्स्वरूपाम् ॥

सरस्वती-सुप्रतिभा-प्रकाशः
सुधी - चकोरैक - सुहृद् - विलासः ।
सदैव सारस्वत - चन्द्रहासो
जयत्यसौ सत्कविकालिदासः ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कान्ता विशुद्धरविगौरतनुर्विशाला-
सस्यैकनीलवसना नवतारहारा ।
मुग्धा रसाल-कल-काकलिका-निनादा
सेयं वसन्ततिलका नवसंवतः श्रीः ।।

प्रताप-वीर-प्रतिभापुरस्सरा
सदाशिवज्ञानधरा धुरन्धरा ।
मनोहरा भूतलसर्वसुन्दरा
जयत्यसौ भारत-भूर्वसुन्धरा ।।

श्रीमद्भारत-प्राशस्तिकम्

ज्ञानज्योतिःस्वरूपो विमलसुमनसाञ्जन्मभूरत्नसूतिः,
क्षोणीसिन्दूरबिन्दुर्विलसितसुयशस्सिन्धुदिव्यप्रभेन्दुः ।
आत्मज्योतिष्मतां सच्चितिसुमतिमतां पुण्यभूमिर्विभूनां
श्वेतच्छत्राभिरामो हिमनगमुकुटो राजते राजतेजाः ।।

स्वर्गो भुवः सुरपतेर्नवनन्दनं त्वं
सौभाग्यमेव शुभकीर्त्यमराङ्गनायाः ।
रत्नाकरोऽसि तव रत्नपरम्परा सा
स्रष्टुः प्रगल्भवचसोऽपि दवीयसीव ।।

गुण-प्रकर्षोर्वरबीजभूमि-
र्विधेः स्वकीया सुर-सुन्दरश्रीः ।
सरस्वती - हास्य - कलाग्र - भूमिः
रमानटी - विभ्रम-रङ्गभूमिः ।।

त्वां सूर्य्यचन्द्रकृतदीप-भ-पुष्पमाला
नित्यं समर्चयति सृष्टिसुवासिनीयम् ।
लक्ष्मीपितुः करतलार्पितपाद्यमन्ते
मन्दानिलैः स्तुतमतीव दिगङ्गनाभिः ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिव्यात्मसात्त्विकगुणाऽऽदिविहारभूमे !
किं वर्णयामि महतीं विरुदावलिं ते ।
वाण्याः प्रयाति सततं क्वणनेन वीणा-
तन्त्रीप्रमण्डनकृते निजबाहुवल्ली ।।

महापुरुषाय श्रद्धाञ्जलिः

(महात्मनो निर्वाणदिवसाद् द्वादशाहे)

स्वातन्त्र्यचन्द्रवदनः कथमद्य खिन्नः ?
स्रस्तालकाऽऽकुलितधीर्भुवि राज्यलक्ष्मीः ?
हा हन्त ! हन्त !! अभिनन्दनकाल एव
ग्रस्तोदयः सपदि भारतभाग्यभानुः ।।

धीरप्रशान्तनृपनीतिधुरन्धरोऽसौ-
सर्वाङ्गसुन्दरविभूतिवरोऽवतारः ।
श्रीमोहनः सकलविश्वविमोहनोऽय-
मस्तङ्गतो नरहरिर्वसुधाभिरामः ।।

स्थानेऽभवद् भरत-भू-प्रतिभा-प्रतीको
राज्यश्रियो मुखमपश्यदहिंसयैव ।
विश्वैकवन्द्यमहिमन् ! प्रबलात्मशक्ते-
र्दीक्षागुरो !! अमरता चरणे नता ते ।।

हे जीवनोद्धरण ! भारतमातृभूमेः
क्व प्रस्थितोऽसि विषमे पतिते जनन्याः ?
हा साम्प्रतं वयमकिञ्चनभारतीयाः-
श्रद्धाञ्जलिं सजलमद्य समर्पयामः ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शुभाशंसनम्

सञ्जीवितार्षप्रतिभाप्रभवा पुरा या
ज्योतिष्मती श्रुतिसुधाशनभास्वरा या ।
विद्यैकरत्ननिकषोपलकल्पिता या
सा भारती भवतु भारतभव्यभूत्यै ॥

ईश ! त्वयाद्य मम भारतदेश एषः
स्वीयप्रसन्नहृदयेन निभालनीयः ।
लक्ष्मीविलासवसतिः प्रबलात्मतशक्ते-
र्भूतिः समुल्लसतु भूतिलकायमाना ॥

मुग्धारविन्द वनकान्तिहरा मुखे मे
हृद्याऽनवद्यचरिता कविता चकास्तु ।
वाणीविलास-पदलास्यविधानदक्षा
सा काऽपि शक्तिरनिशं मम शं तनोतु ॥

सा धीरशक्तिरमला प्रतिभा कवीनां
वाणी स्वभावमधुरा चतुराननस्य ।
विद्यावधूवरचिदात्मसुखैककोषः
सारस्वतस्वमखिलं जनभूतयेऽस्तु ॥

सूक्तयः

सद्भूतेः कुलधाम पोषणरसः सारस्वतज्योतिषां
सर्वाङ्गोज्ज्वलसत्यतत्त्वाधिषणालीलाविलासः सताम् ।
विद्यारत्नपरम्परा प्रतिनिधिः सौभाग्यभानुर्धिय-
स्तत्त्वज्ञानरसायनं विजयते वेदस्वरूपोदयः ॥

शुद्धार्षप्रतिभाप्रसूतमहसा, ज्ञानश्रियं हासयद्-
यत्सन्मौक्तिकधीषु जीवनरसं सञ्चारयद्राजते ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सत्यान्वेषणतत्पराऽऽगमगणे जीवातुरेवात्मन-
स्तद् दिव्यात्मकगुणौजसैकममलं वेदामृतं पीयताम् ॥

अयि मधुकर ! केलिं मा कुरु त्वं वनेऽस्मिन्
सुमधुरंमधु पीत्वाऽऽभिः समं पद्मिनीभिः ।
वसतिरिह गजानां द्राक् स्वदेशं प्रयाहि
स्मरसि कुटिलहृद्भिर्दुस्सहः सद्विलासः ?

वीर ! प्रताप भुवि भारतवीरतायाः
सर्वाङ्गसुन्दरवरोऽसि गतोऽमरत्वम् ।
त्वां संस्मरत् स्वपुलकाञ्चितगात्रसारः
पूतो मनाञ्जलिरयं भवतेऽर्पितो यत् ॥

भो भो सद्गुणसम्प्रदायमहिमप्राणैकरक्षापर !
श्रीमद्भारत ! कुत्र शात्रवयशःपीयूषपानं तव ?
शक्रस्पर्धिसमृद्धिवैभवयशोलक्ष्मीविलासः क्व सः
सङ्ग्रामाङ्गणकेलिकारणमहामृत्युञ्जयत्वं क्व तत् !!

भो भो भारतवर्ष ! कुत्र गरिमा प्रज्ञा प्रचण्डा च ते
क्वाद्यत्वे शरणागतेषु करुणा सा प्राणभिक्षाऽरथे ।
उत्सर्गश्च रणाङ्गणे क्व नु तव स्वातन्त्र्यरक्षाकृते
हं हो कुत्र सतीत्वरक्षणविधौ स्त्रीरक्तसन्तर्पणम् ॥

प्रज्ञोपस्नुतवेदमातृपयसा पुष्टात्मवर्चस्विनो
विप्राः सद्गुणसम्पदः प्रकृतितः स्वत्वाभिमानोन्नताः ।
तैर्हित्वा कुलदेवतामथ कदा प्रह्वीकृतं मस्तकं
पादैर्लाञ्छित भर्तृकामभिपरां हीनाङ्गगां चञ्चलाम् ॥

चेतो ! लक्षय नित्यमेव सुपथञ्ज्योतिष्मतां सम्मतं,
सत्यज्ञानसुधासुनिर्झरतटे विश्रम्य शुद्धं भव ।
कल्याणाचरणं विधेहि सततं विश्वोपकारिव्रतं
मत्वा संसृतिचक्रमेतदखिलं कर्तव्यकर्मोद्भवम् ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

येषां दिव्यरसायनोज्ज्वलमुखी सद्भूषणालङ्कृता
प्रज्ञाचन्द्रकरप्रसादितयशःकौमुद्वती भारती ।
क्रीडन्ती स्वगुणौजसा प्रतिपदं देदीप्यमाना भुवि
स्वर्निर्माति नवं सदा पदरजस्तेषां हि वाञ्छाम्यहम् ॥

मातृभूमिं प्रति

लब्धं जन्म मयात्र भारतभुवि प्रेम्णाऽस्मि सौभाग्यवान्
तस्याः स्नेहनिधिर्हि जीवितनिधिः किं कोषगैर्वैभवैः ।
तत्तत्पुष्परसैकसौरभधनं प्राप्तं हृदाप्यायनं
तस्मिन् तारकवृन्दचर्चितभुवः स्वर्गे मनो मोदताम् ॥

अस्तित्वस्य निगीर्णको विधुरयं सौन्दर्यसारो मम
कुत्रान्यत्र विभाति शीतलकरस्तन्नैव जाने स्मरः ।
आकाशान्मम नेत्रयोरधिगतः पूर्वं प्रकाशो यतः
सैवान्त्ये समयेऽपि चुम्बतु हि मे नेत्रे गते मीलनम् ॥

राष्ट्रध्वजवन्दनसमये

(शिशूनां कृते स्वतन्त्रतादिवसे स्वागतगीतिः)

स्वागतं मम मातृभूमि-विशालगौरव ! स्वागतम् ।
स्वागतं सम्मान्यजनताः भारतीयाः ! स्वागतम् ॥

रविरयं समुदितः प्राची गौरवर्णा भासते ।
जनमनः स्वातन्त्र्यतुङ्गो ध्वजो गगने राजते ॥

स्वागतं राणाप्रतिज्ञापूतगौरव ! स्वागतम् ।
स्वागतं सम्मान्यजनताः भारतीयाः ! स्वागतम् ॥

★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गलज्जलिकाऽभिराजस्य !!

(मिश्रोऽभिराजराजेन्द्रः आचार्योऽध्यक्ष्च, शिमलास्थहिमाचलप्रदेश-
विश्वविद्यालयीयसंस्कृत-विभागे)

ऊर्ध्वबाहुको विरौम्यहं कोऽपि नो शृणोति वाचिकम् !!

जीर्णकाष्ठभङ्गुरा तरी नाविकोऽपि मद्यघूर्णितः
वल्गते प्रभञ्जनोऽम्बरे सूचयन्नकाण्डताण्डवम् !!

ज्वालितस्समर्चनागृहे यस्त्वया शिखावलस्सखे !
क्षीयते नु तस्य वर्त्तिका स्नेहसङ्कटे क्व जीवितम् ??

योऽयमश्रुसागरेऽखिलं रङ्गमेव मज्जयत्यलम्
कोऽत्र विस्मयो यतो न्विदं प्राग्दशाऽभिनीतिपाटवम् !!

पुष्पिते फलान्विते तरौ शुष्यति क्व मूलमूर्जितम् ?
घोषयन्ति तत्कथं खला भारतेऽद्य संस्कृतं मृतम् !!

लोक एव तन्त्र्यते दृढं शासका यतो न लम्पटाः
उज्ज्वलं ततोऽस्ति भारते शासनं नु लोकतान्त्रिकम् !!

अग्निना सहाऽप्यहं सुखी वारिणा सहाऽप्यहं सुखी
एतदेव मेऽस्ति पौरुषं दुर्लभं यशोऽभिचारिकम् !!

कीदृशो दशाविपर्ययो यन्निरक्षरा विपश्चितः
काव्यकृत्कुविन्दकव्रजो मोदतेऽधिभोजवाटिकम् !!

दुर्मदेन हस्तिना हतो यत्पिपीलको मरुस्थले
तद् विलोक्य सैन्धवं जलं द्रागबभूव हन्त तैलकम् !!

हृद्यभावसङ्कुलेऽमले काव्यकल्पने सनातने
सादराः पिबन्तु सार्जवं वल्गुभावमाभिराजिकम् !!

★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

साधु जानेऽहम्

(मिश्रोऽभिराजराजेन्द्रः, शिमला)

समुत्थेयं कुतो वात्या किमर्थं तच्च जानेऽहम् ।
गृहेऽग्निः केन सन्दीप्तः किमर्थं तच्च जानेऽहम् ॥

कदाचित्सौधशृङ्गस्थोऽपि काको नैति ताक्ष्र्यत्वम्
न दोषो मृष्यते यत्नै रहस्यं तच्च जानेऽहम् ॥

विधानं चाटुभिर्भुङ्क्ते बली स्तम्बेरमः कस्मात् ?
धुनीते वा कथं श्वा पुच्छमित्यपि साधु जानेऽहम् ॥

क्वचिद्रामः क्वचिद्रोटी क्वचित्सर्वोदयाऽऽकाङ्क्षा
अभिप्रायन्तु युष्मद्भाषणानां हन्त जानेऽहम् ॥

भृशं निर्भत्सितः कर्णिकपदैरपि राजनीतौ त्वम्
यथा काष्ठाधिरूढस्तत् प्रतिष्ठामर्म जानेऽहम् ॥

हृदिस्थं कालकूटं यन्निगूह्योद्गिरसि पीयूषम् !
प्रयतसे छलयितुं युक्त्याऽभिराजं तच्च जानेऽहम् ॥

क्वचिद्रक्तः क्वचित्पीतः क्वचिद्वा कर्बुरः कृष्णः
यथा कृकलासतामेषि व्रतं ते किन्न जानेऽहम् ??

नवसंवत्सरं वर्द्धापनम्

(श्री अमियचन्द शास्त्री , मथुरा)

विश्वस्मिन् नववत्सरे प्रथयतात्, सर्वेश्वरो मङ्गलम्
स्वास्थ्यं सर्वजनोऽधिगच्छतु शुभं, निःश्रेयसे स्वात्मनः ।
नव्येऽस्मिन् प्रतिमानसं प्रविशताद्, वर्षे प्रमोदो महान्
दद्यात् कीर्तिततिं सुनिर्मलमतिं, शम्भुः सदा वः शिवम् ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वन्दे महापुरुष ! ते चरणारविन्दम् !![1]

(मिश्रोऽभिराजराजेन्द्रः, शिमला)

दूर्वाप्रलोभितकवीश्वरकृष्णसार !
वाग्देवतावसतिरक्षणसिद्धमल्ल !
हासावहेलित - दुरात्मजनप्रतिष्ठ !
वन्देऽमहापरुष ! ते चरणारविन्दम् !!

केयं **सुधाशबलिता'सुरती'** ममारि-
र्या वल्लभस्य वदने नितरां प्रविष्टा ?
एवं विरौति **सुरतिन्** ! क्षपितात्रकाशा
वाणी तमालभृतगल्लदरीदविष्ठा !!

एकान्तपाङ्गवलनाम्पि संप्रदाय
सार्धस्थितं स्वजनमुच्चकविं करोषि !
ज्ञानाभिराजरथवल्लभकान्तपुष्प !
गूढाभिसार सहकार ! भवन्तमीडे ।।

गीते भविष्यति रतिर्नितरां न केषां
माद्यद्द्विरेफनिचिते प्रसरद्वसन्ते ?
स्वाधीनरागकलया तदु माकरन्दीं
मुद्रां श्रयस्व कलयस्व सुहृत्प्रमोदम् !!

चक्षुर्न भो गमय जातु कुहूविवर्त्ते
व्याजेन माऽऽविलय वर्णरतिप्रतिष्ठाम् ।
उद्यद्विनोद ! भवतो नवसुप्रभातं
मित्रव्रजः प्रतिकलं कलयन् विभाति !!

सविनयमभिव्यनक्ति
मिश्रोऽभिराजराजेन्द्रः

---

1. दूर्वासम्पादकेभ्यो डॉ० भास्कराचार्यत्रिपाठिभ्यश्शिमलास्थहिमाचल-प्रदेशविश्वविद्यालयीयसंस्कृतविभागाध्यक्षैरभिराजराजेन्द्रैस्सम्प्रेषिताः फाल्गुनिकाः प्रणामाः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सिद्धरामेश्वरम्

(डा० प्रकाश पांडे, 'अहल्या' सोमल वाडा, दत्तमन्दिरपार्श्वे,
वर्धा रोड, नागपुरम्)

सिद्धरामेश्वरं नौमि रे मुनीश्वरम्
तत्र यत्सुन्दरं तत्र पावित्र्यमेव
तत्र यद्ग्रामकं तत्र रामेश्वरम्
राममूर्ति महान्तं सदा राजितम्
वृक्षजालैर्वृतं मङ्गलं सुन्दरम्
यन्महल्लीयते, यत्र रामेश्वरम्
यत्र काव्यात्म वल्लीयतेऽध्यात्म यत्,
तत्र रामेश्वरं सिद्धरामेश्वरम् ।
सिद्धिरपि जायते वृद्धिरपि जायते
सम्यगाशाभिरेव यत्पदं पूज्यते
तत्र वै राजते सिद्धरामेश्वरम्
नश्यते गीर्यते जीवनं स्तूयते
स्तूयते दिव्यताराशिरपि गीयते
यत्र तत् तत्पदं नौमि रामेश्वरम् ।
सिद्धरामेश्वरं सिद्धरामेश्वरम् !

सन्दर्भ :—महाबलेश्वरे मुनिसिद्धरामेश्वरनाम्ना ख्यातं किमप्यद्भुतं तीर्थम् । तत्र रामनवमीदिवसे गत्वा परमा शान्तिर्लब्धा। तदेवाभिक्ष्य कविता । तत्रैव नातिदूरं किमपि सरो लक्ष्यते तत् काव्यात्म-सुन्दरम् सिद्धरामेश्वरञ्चाध्यात्म-शिवमिति सुरुचिरविरोधं दर्शयन्ती कवितेयं वाचकं श्रोतारं चानन्दयतु ।

*

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

किं जीवनं ते !

(डा० रमाकान्तशुक्लः, ६ वाणी-विहारः, नयी दिल्ली-५६)

न वा स्वार्थः परार्थो नापि बन्धो !
त्वया चेत्साध्यते, किं जीवनं ते ! ॥१॥
न साहित्य न सङ्गीतं कला वा
न रासिक्यं च ते, किं जीवनं ते ! ॥२॥
न दाक्षिण्यं, न सौशील्यं, न कीर्तिः
न सेवा, नो दया, किं जीवनं ते ! ॥३॥
विपदि धैर्यं, तथाभ्युदये क्षमा नो
न वा युधि विक्रमः, किं जीवनं ते ! ॥४॥
गुरोः पित्रोर्न चरणा वन्दिताश्चेत्
अहङ्कारात्त्वया, किं जीवनं ते ! ॥५॥
न कश्चित्प्रेमबन्धे त्वामबध्नात्
वृथाजीविन् सखे ! किं जीवनं ते ! ॥६॥
त्वया यदि शासनासन्दीमवाप्य
न लोको रञ्जितः, किं जीवनं ते ! ॥७॥
अहो दैनन्दिनी मतयाचना ते
वनीपक नेतृवर ! किं जीवनं ते ! ॥८॥
न निःश्वसितं, न रुदितं, मूर्च्छितं नो
प्रियाविरहे त्वया, किं जीवनं ते ! ॥९॥
वियोगे ते जनो नो कोऽपि खिन्नः
न योगे प्रीतिमान्, किं जीवनं ते ! ॥१०॥
मनोभावो न निर्द्वन्द्वं प्रकटितः
कपटचारिस्त्वया, किं जीवनं ते ! ॥११॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विषामृतयोर्विवेकं नैव कर्तुम्
त्वमीशश्चेत्तदा किं जीवनं ते ! ॥१२॥
न दुष्टास्तर्जिताः स्वीयेन महसा
न सन्तो मानिताः, किं जीवनं ते ! ॥१३॥
करालः काल इव नाभासि चेत्त्वम्
कुकृत्यानां कृते, किं जीवनं ते ! ॥१४॥
त्वया स्वान्तःसुखार्थं देववाणी
न पठिता, न श्रुता, किं जीवनं ते ! ॥१५॥
प्रभुः कर्ता च भर्ता चैव हर्ता
न चेदाराधितः, किं जीवनं ते ! ॥१६॥
निपीतं नैव मधु प्रेम्णः कदाचित्
विरस मृल्लोष्ठ रे ! किं जीवनं ते ! ॥१७॥
न भुक्ता रसवशात्त्वत्पार्श्वमाप्ता
रहसि काचित्त्वया, किं जीवनं ते ! ॥१८॥
वृथा चन्द्रो वृथा मधुयामिनीयम्
न पार्श्वे ते प्रिया, किं जीवनं ते ! ॥१९॥
स्वदेशः सेवितो न प्राणप्रणतः
विकत्थन धूर्त रे, किं जीवनं ते ! ॥२०॥
मुखे मधु ते मनसि ते कालकूटः
तृणावृत कूप ! रे किं जीवनं ते ॥२१॥
कृतघ्नत्वं कदाचारः पिशुनता
इमे त्वद्बान्धवाः, किं जीवनं ते ! ॥२२॥
स्वयं नष्टः परान्नाशयसि नित्यम्
व्यसनशतशालिनः किं जीवनं ते ! ॥२३॥
क्षणे रुष्टः क्षणे तुष्टः सखे त्वम्
अहो चलचित्त रे किं जीवनं ते ॥२४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मुखे ते मक्षिकाः 'कुर्वन्ति भिन् - भिन्
न चोड्डाययसि रे ! किं जीवनं ते ! ॥२५॥

सुरक्षितमस्ति नो पदमपि पलार्थम्
अहो मन्त्रिप्रवर ! किं जीवनं ते ॥२६॥

प्रदर्शन-गालिका-कार्यावरोधैः
अहो प्राचार्यवर ! किं जीवनं ते ॥२७॥

प्रकृत्यंके न ते क्रीडा बभूव
सदा हर्म्यस्थ रे ! किं जीवनं ते ॥२८॥

न दुग्धं माहिषं ध्यायामिनस्ते
सुलभमास्तेऽन्वहं ! किं जीवनं ते ! ॥२९॥

न चेत् पार्श्वे सखे ते स्वास्थ्यवित्तम्
धनैरेतैरलं, किं जीवनं ते ॥३०॥

उपायैस्तैश्च तैर्धृतमपि मनस्ते
प्रियां नोपैति चेत् किं जीवनं ते ! ॥३१॥

उपालम्भो न चानुनयोऽपि तुभ्यं
अहो प्रणयिन् युवक ! किं जीवनं ते ॥३२॥

तवागमने तथा गमने न चर्चा
वराक प्राघुणिक ! किं जीवनं ते ॥३३॥

परोक्षे शत्रुभिर्मित्रैस्तटस्थैः
न चेच्छ्लाघ्योऽसि रे, किं जीवनं ते ॥३४॥

अयं श्रोता न बोधति भाषणं ते
अनर्गलजल्पिनः किं जीवनं ते ! ॥३५॥

न दीनाः सेविताः शुद्धेन मनसा
कुनेतॄन् सेवसे, किं जीवनं ते ! ॥३६॥

न माता जन्मभूर्बन्धो ! मता चेत्
किमेतेनायुषा, किं जीवनं ते ! ॥३७॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

न दृष्टं भारतं स्निग्धेन मनसा !
अहो विश्वभ्रमिन् ! किं जीवनं ते ।।३८।।
कृपेशस्याशिषो यदि वा गुरूणाम्
न लब्धा जीवने, किं जीवनं ते ! ।।३९।।
त्वयार्वाचीनसंस्कृतमपि न पठितम् ?
न दृर्वालोकिता ? किं जीवनं ते ! ।।४०।।
रमाकान्तोऽभिराजो वा रथो वा
श्रुतो यदि न त्वया, किं जीवन ते ! ।।४१।।

★

मुक्तकद्वयी

(डा० शम्भुनाथ आचार्यः, बद्रीविशालः कालेजः फर्रुखाबादः)

(१)

एष मन्मथः सदैव
वर्तते वपुर्विनैव
हन्ति कामिनीजनान् हि
पुष्पमार्गणैर्भृशं हि
तत्सखश्च माधवोऽपि
चाम्रमञ्जरीपिकोऽपि
कोऽपि राधिकां विनैव
कृष्णभूमिकायते
वेणुधारकं विनैव
कापि राधिकायते

(२)

दृश्यतामियं स्वराष्ट्रकुण्डली
सौख्यमाप्नुयात् कथं हि राष्ट्रकम्
लग्नमास्थितो विधुन्तुदो बली
सौरिभौमवीक्षितश्च नित्यशः

★

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषद्वार्ता

(१) १६.२.१९९१ तारिकायां डा० रमाकान्तशुक्लेन प्रणीतस्य निर्देशितस्य च 'भाति मे भारतम्' इत्यनुष्ठानस्य अपरेऽपि दश भागा दूरदर्शन-निदेशालयेन स्वीकृताः। एतेषां निर्माणं शीघ्रमेव आशास्यते। दूरदर्शनाधिकारिण एतदर्थं धन्यवादमर्हन्ति।

(२) १८.३.१९९१ तारिकायाम् देववाणी-परिषदि राष्ट्रपतिसम्मानितानां कामेश्वरसिंहसंस्कृतविश्वविद्यालयपूर्वोपकुलपतीनाम् पण्डितप्रवराणाम् आचार्यं श्रीआद्याचरणझामहाभागानाम् संस्कृतस्य वर्तमानस्थितिमवलम्ब्य भाषणं किञ्च काव्यपाठोऽभूत्। अस्मिन्नवसरे परिषत्पक्षत आचार्येभ्यः परिषन्महासचिवेनाभिनन्दनं व्याहृतम्! अस्मिन्नवसरे आचार्यवीरेन्द्रकुमार झा-धीरेन्द्र झा-डा० रमाकान्तशुक्लैरपि कविताः प्रस्तुताः।

(रमा शुक्ला)

संस्कृत-जगद्वार्ता

(१) २२.१.१९९१ तारिकायां 'एम०पी० क्लब, नार्थ एवेन्यू, नयी दिल्ली' इत्यत्र अखिलभारतीयसंस्कृतपरिषद्-लोकभाषाप्रचारसमित्योस्तत्त्वावधाने 'सुरभारती' संस्थायाः कलाकाराणाम्, उज्जयिन्यां त्रयस्त्रिंशत्तमे कालिदास-समारोहे 'विक्रमोर्वशीय'स्य प्रस्तुत्यर्थम्, अभिनन्दमक्रियत। अस्मिन्नवसरे 'संस्कृतम् ऐक्यसाधकम्' इत्येषा लघुनाटिकापि प्रास्तूयत।

(२) २९.१.१९९१ तारिकायां नवदिल्लीस्थे हिमाचल-भवने 'दिल्लीसंस्कृत अकादमी' अ० भा० संस्कृत कविसम्मेलनमायोजितवती यस्योद्घाटनं दिल्ल्या उपराज्यपालेन श्रीमार्कण्डेयसिंहमहाभागेन कृतम्। कुलपतिना डा० मण्डन मिश्रमहाभागेन कवीनामभिनन्दनं कृतम्। सञ्चालनमकादमीसचिवेन 'कविरत्न' श्रीकृष्णसेमवालमहाभागेन कृतम्। अस्मिन्न् कविसम्मेलने कविशिरोमणि अमीरचन्द शास्त्रि-आचार्यश्रीनिवासरथ-श्री सुन्दरराजन्-रमाकान्त शुक्ल-डा० इच्छाराम द्विवेदी 'प्रणव'-डा० कृष्णलाल-डा०सत्यपालनारङ्ग-डा० वेदकुमारी घई-डा० जीतसिंह खोखड़-डा० लीना रस्तोगी-श्री शैलेशभट्ट-प्रभृतिभिः पञ्चविंशतिप्रायैः कविभी रचनाः प्रस्तुताः। अस्य केचनांशाः ८.२.९१ तारिकायां दूरदर्शनेन प्रातःकालीने राष्ट्रीयप्रसारणे प्रदर्शिताः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(३) ५-६.२.९१ तारिकयोः मन्दसौरनगरे म० प्र० संस्कृतअकादम्या 'युवराज क्लब' स्थाने 'अष्टमूर्तिः' इति द्विदिवसीया विद्वत्संगोष्ठी समायोजिता यत्र षट्सु सत्रेषु दशपुरस्य (मन्दसौरस्य) सांस्कृतिकवैभवं दशपुरावन्तिक्षेत्रगतमभिलेखीयं संस्कृतसाहित्यमवलम्ब्य च विचारविमर्शो जातः। अस्मिन्नवसरे भोपालस्थकलापद्मसंस्थया 'चित्राङ्गदा' नृत्यनाटिकापि प्रस्तुता।

(४) १३—१४.२.१९९१ तारिकयोः रायपुरे (म०प्र०) शासकीयसंस्कृत महाविद्यालये 'संस्कृतवाङ्मये राष्ट्रियचिन्तन' मभिलक्ष्य द्विदिवसीया शोध-संगोष्ठी आयोजिता जाता यत्र पञ्चाशत्प्रायैः विद्वद्भिः स्वशोधपत्राणि प्रास्तूयन्त। संगोष्ठ्या उद्घाटनं प्राक्तनप्राचार्यो डा० रामनिहालशर्म-महाभागोऽकरोत्। संगोष्ठ्याश्चतुर्णां सत्राणामाध्यक्ष्यं डा०प्रभुदयाल अग्निहोत्री डा० बच्चूलाल अवस्थि-डा० राममूर्ति त्रिपाठि-डा० रामचन्द्र तिवारिभिः कृतम्। अस्मिन्नवसरे सांस्कृतिककार्यक्रमोऽप्यायोज्यत यत्र पुरस्कारवितरणं डा० रमाकान्तशुक्लेन कृतम्। आचार्यश्रीनिवासरथाध्यक्ष्ये श्रीरमाकान्तशुक्लस्य सञ्चालकत्वे च संस्कृतकविगोष्ठी अप्यायोजिता बभूव यत्र डा० पुष्पा दीक्षिता-डा० विन्ध्येश्वरीप्रसाद मिश्र-डा० बच्चूलाल अवस्थि-डा० प्रभुदयाल अग्निहोत्र्यादिभिः कविताः प्रस्तुताः। कविसम्मेलने विशिष्टातिथित्वं आयुक्तः श्री ए०डी० मोहिले-महाभागश्चकार।

संगोष्ठीसञ्चालकेन किञ्च महाविद्यालयप्राचार्येण डा० कृष्णदेवसारस्वत-महाभागेन विदुषामभिनन्दनं कृतज्ञताज्ञापनं च कृतम्।

(५) २३—२४.२.१९९१ तारिकयोः ग्वालियरनगरे कलावीथिकायां म०प्र० संस्कृत अकादम्या 'वासन्ती' नाम्नी भवभूति-संगोष्ठी समायोजिता। अस्या उद्घाटनं जीवाजीविश्वविद्यालयस्य कुलपतिना कृतम्। दायसत्रस्या-ध्यक्ष्यं डा०राजेन्द्रमिश्र महाभागेन सञ्चालनं च डा० राधावल्लभत्रिपाठिवर्येण कृतम्। उपजीव्यसत्रस्याध्यक्ष्यं डा०रेवाप्रसादद्विवेदमहाभागेन सञ्चालनं च डा०रमाकान्तशुक्लमहाभागेन कृतम्। विसर्जनसत्रस्य आध्यक्ष्यं डा०बच्चूलाल-अवस्थिमहाभागेन सञ्चालनं च डा०लक्ष्मीनारायण अग्रवाल-महाभागेन कृतम्। अस्मिन्नवसरे विदुषां नगरिकमभिनन्दनमप्यक्रियत। अकादमी-सचिवेन डा० भास्कराचार्य त्रिपाठिना कार्तज्ञ्यं व्यज्ञाप्यत।

संगोष्ठ्यवसरे संस्कृतकविगोष्ठी,संग्रहालयदर्शनं, इटैलियनगार्डने सनातन-धर्ममन्दिरे च विदुषामातिथ्यं तथा च नृत्यनाट्याद्यायोजनान्यपि संवृत्तानि।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(६) २५.२.१९९१ तारिकायां ग्वालियरनगरस्थे कमला राजे महिला महाविद्यालये संस्कृतकविगोष्ठी समायोज्यत यस्या आध्यक्ष्यं डा० बच्चूलाल अवस्थिभिः कृतम्। डा० इच्छाराम द्विवेद 'प्रणव'-अभिराज डा० राजेन्द्र मिश्र-डा० भास्कराचार्य त्रिपाठि-डा० रमाकान्तशुक्लैः स्व रचनाः श्राविताः। अस्मिन्नवसरे 'भाति मे भारतम्' इत्येतत्कार्यक्रमस्य वीडियोफिल्मप्रदर्शनमभ्यभूत्। डा० छाया शर्मा सञ्चालनमकरोत्। प्राचार्या डा० सप्रा महाभागा धन्यवादज्ञपनमकरोत्।

(७) ९—१०.३.१९९१. तारिकयोः पुर्यां राष्ट्रियवेदविद्याप्रतिष्ठानपक्षतः श्रीजगन्नाथ-संस्कृत-विश्वविद्यालयतत्त्वावधानेन पूर्वभारतीयवेदसम्मेलनमायोजितम्। द्विदिवसीयेऽस्मिन् सम्मेलने 'पूर्वभारतीयवेदपरम्परा' 'उत्कलीयवैदिकी धारा' 'वेदसंस्कृतिः मूल्यबोधश्च' 'वैदिकसंस्कृतं सम्भाषितसंस्कृतं च' इत्यादिविषयेषु विद्वद्भिर्विचारविमर्शः कृतः। वृन्दगीति-ओडिशीनृत्यमालादिमनोरञ्जककार्यक्रमा अप्यायोज्यन्त।

(८) २५.३.१९९१ तारिकायां मैनपुर्यां शीतलादेवी-मेलापकावसरे समयोजितायां प्रदर्शन्याम् इदम्प्रथमतया संस्कृतकविसम्मेलनमायोज्यत। अस्य आध्यक्ष्यं डा० चन्दनलालपाराशर-महाभागेन मुख्यातिथित्वं डा० रमाकान्तशुक्लेन सञ्चालनं च सुरभारतीसेवासंस्थानमहासचिवेन डा० इच्छारामद्विवेद 'प्रणव' महाभागेन कृतम्। मैनपुरी-जिलाधिकारिणा कवीनां स्वागतं कृतम्। पञ्चदशप्रायैः कविभिः स्वरचनाः पठिताः।

(९) २९—३०.३.१९९१ तारिकयोः रायबरेलीस्थे फीरोजगान्धी महाविद्यालये तत्रत्यसंस्कृत-विभागेन विश्वविद्यालयानुदानायोगस्य 'कोहसिप' योजनान्तर्गतं द्विदिवसीया कालिदास-संगोष्ठी समायोजिता। संगोष्ठ्या उद्घाटनं डा० राजदेवमिश्रमहाभागेन कृतम्। प्रथमपरिचर्चासत्रस्याध्यक्ष्यं डा० सुधाकराचार्यत्रिपाठिमहाभागेन कृतम्। द्वितीयसत्रस्याध्यक्ष्यं डा० रमाकान्तशुक्लेन मुख्यातिथित्वं च अभिराज डा० राजेन्द्र मिश्र महाभागेन कृतम्। डा० शुक्लेन कालिदासस्य सौन्दर्यवर्णनमवलम्ब्याभिभाषितं किञ्च सद्य एव ग्रथिता 'किं जीवनं ते' इतिशीर्षका रचना इदम्प्रथमतया श्राविता। डा० मिश्रेण कालिदासीयकाव्यस्य वैशिष्ट्यं प्रकाशितं किञ्च स्वीया नैका रचनाः श्राविताः। अस्मिन्नवसरे डा० जनार्दनप्रसादपाण्डेय 'मणिः', डा० रसराजः, डा० प्रशस्यमित्र शास्त्री चापि स्व रचनाः श्रावयामासुः। संगोष्ठ्या संयोजकेन डा० शिववरण शुक्ल-महाभागेन सञ्चालनं कृतम्। संस्कृतविभागाध्यक्षेण डा० इन्द्रदेवद्विवेदिमहाभागेन अतिथीनामभिनन्दनं कृतम्। 'कोहसिप'-निदेशकेन

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

डा० आर० पी० सिंह-महाभागेन संस्कृतस्य अध्ययन-शोध-व्यवहारार्थं छात्रा आहूताः। संगोष्ठ्यां डा० अमलधारी सिंह-डा० रसराज-डा० यदुनाथप्रसाद-दुबे-डा० कृष्णकुमारमिश्र-डा० केशवगुप्त-प्रभृतिभिर्विद्वद्भिः शोधपत्राणि पठितानि।

अस्मिन्नवसरे 'भाति मे भारतम्' इति वीडियोफिल्मं महाविद्यालय-प्रेक्षागारे समवेतैर्दर्शकैः स्वादं स्वादमवलोकितम्।

(१०) ३१.३.१९९१ तारिकायां बरेल्यां विश्वविद्यालयानुदानायोगस्य प्रसारकार्यक्रमान्तर्गतं बरेलीकालेजस्य संस्कृत-विभागे डा० रमाकान्तशुक्लस्य 'स्वातन्त्र्योत्तरसंस्कृतसाहित्यस्य प्रवृत्तीः' अवलम्ब्याभिभाषणं सञ्जातम्। अस्या व्याख्यानसंगोष्ठ्या आध्यक्ष्यम् आचार्यलक्ष्मीचन्द्रकौशिकमहाभागेन कृतम्। संस्कृतविभागाध्यक्षेण डा० कृष्णकान्तशुक्ल-महाभागेन प्राध्यापकेन डा० राजेशभारद्वाजमहाभागेन तथा डा० बलभद्रप्रसादगोस्वामिमहाभागेन परिचर्चावक्तव्यानि प्रदत्तानि। कार्यक्रमस्य प्रारम्भः श्रीदुर्गेशचतुर्वेदकृत-सरस्वतीवन्दनातः सञ्जातः।

(११) ३१.३.१९९१ तारिकायां बरेलीनगरे 'अल्पना' संस्थायास्तत्त्वा-वधाने डा० रमाकान्त शुक्लेन 'वदत नेतारो मनाक्' 'किं जीवनं ते' 'भाति मे भारतम्' 'भारतजनताहम्' इत्यादिरचनानां पाठः कृतः। डा० शुक्लाय अभि-नन्दनं व्याहरता संस्थासचिवेन डा० कौशलनन्दनगोस्वामिमहाभागेनोक्तं यत् डा० शुक्लस्य रचना अत्यन्तं सशक्ताः, सामयिक्यः, कालजयिन्यः, सरलाः, सरसाश्च सन्ति। अस्मिन्नवसरे नैके साहित्यकाराः, समाजसेविनः संगीतकारा-श्चोपातिष्ठन्। कल्पनासक्सेना-मनीषा-मंजुला-विशाल-योगेशादिभिः डा० शुक्लस्य रचनाः ससंगीतं स्वस्वरेषु प्रस्तुताः।

(१२) पञ्चाम्बु-सर्वकारेण १९९० वर्षे '२५००० रूप्यकात्मकः साहित्य-शिरोमणि (संस्कृत)-पुरस्कारः' प्रो० देवदत्तभट्टि-महाभागाय समर्पितः। अस्माकं वर्धापनानि।

(१३) २९.१.१९९१ तारिकायाम् आकाशवाण्या दिल्ली केन्द्रात् डा० रमाकान्तशुक्लप्रणीतं 'महात्मा' इति रूपकं प्रसारितमभूत्। १४.४.१९९१ तारिकायां तत एव 'साहित्यिकी' तिकार्यक्रमान्तर्गतं 'रक्षको यत्र भक्षकः' इति विषयमवलम्ब्य डा० रमाकान्तशुक्लस्य संस्कृतवार्ता किञ्च संस्कृते-ऽभिनवप्रयोगानलम्ब्य डा० रवीन्द्रनागरमहाभागस्य हिन्दीवार्ता प्रसारिते। संस्कृतानुरागिणां कृते प्रमोदावहोऽयं विषयः किन्तु अद्यत्वे आकाशवाण्या संस्कृतकविसम्मेलनानि न प्रसार्यन्त इति कष्टस्य विषयः। आशास्यते सूचना-प्रसारणमन्त्रालयोऽस्मिन् विषये दत्तावधानो भवेत्।

(आनन्दवर्धन शुक्लः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	—	२०००-००	प्रतिपृष्ठम्
अन्यपृष्ठानाम्	—	१०००-००	प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	—	५००-००	

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 25 .00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं 'अर्वाचीनसंस्कृतम्' (Arvacheenasanskritam/*Arvācīnasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)।

'देववाणी-परिषद, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१३/२)-प्रधानसम्पादकः डा रमाकान्त शुक्लः। प्रकाशनतिथिः १५.४.१९९१।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु०	५०.००
२.	श्रीनेहरूवृत्तम (आचार्य रमेशचन्द्र शुक्लः)	रु०	१५.००
३.	श्रीपादसप्ततिः(श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु०	४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु०	२०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु०	१५.००
६.	आभाणकमञ्जरी (,, ,,)	रु०	१५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु०	३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु०	३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु०	५०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु०	४० ००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु०	२०.००
१२.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु०	२०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु०	१८ ००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना(डा०हरिनारायण दीक्षित)	रु०	१५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्रः)	रु०	१५.००
१६.	गान्धिसूक्तिसप्तशती (,, ,,)	रु०	१५.००
१७.	सुगमरामायणम् (डा० रमेशचन्द्र शुक्लः)	रु०	६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु०	४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु०	२०.००
२०.	सूक्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु०	३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु०	५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु०	२०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु०	२०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु०	१०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु०	१०.००
२६.	पण्डितराजीयम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु०	२०.००
२७.	नाट्यसप्तकम् (,, ,,)	रु०	६०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः)	रु०	१२.००
२९	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु०	२०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु०	४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु०	१०.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु०	२०.००
३३.	अभिशापम (नाटकम्) (डा० रमाकान्त शुक्लः)	रु०	२०.००
३४.	ऋतम (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु०	२०.००

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

त्रयोदशवर्षे तृतीयोऽङ्कः

१५ जुलाई, १९९१

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली–११००५९

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

परामर्शदातृ-मण्डलम्

१. आचार्य डा० रमेशचन्द्र शुक्लः
२ आचार्य श्री श्रीनिवास रथः
३. डा० कृष्णकान्त शुक्लः
४ डा० राजेन्द्र मिश्रः
५. डा० उमाकान्त शुक्लः
६ डा० विष्णुकान्त शुक्लः

अर्वाचीनसंस्कृतम् (१३/३)

(R. N. 34554/79)

(१५ जुलाई १९९१ ई०)

विषय-सूची

विषयः	लेखकः	पृष्ठांकः
१. सम्पादकीयम्		१
२. ब्रूहि जगन्नाथस्वामिन् !	डा० रमाकान्त शुक्लः	३
३. अशनिपातः	डा० कृष्णकान्त शुक्लः	५
४. राजीवहत्या	डा० प्रकाश पाण्डे	७
५. भारती-परिदेवनम्	डा० राजेन्द्र मिश्रः	८
६. वृत्तपत्रम्	डा० सत्यव्रत शास्त्री	१७
७. कालिदासः शिरोमणिः	प्रो० ताराशंकर शर्मा	३६
८. दोहादशकम्	डा० परमानन्द शास्त्री	३७
९. दाडिममेकं शतं रोगिणः	डा० परमानन्द शास्त्री	३८
१०. रससिद्धान्तस्याधिवक्ता डा० सुन्दरलाल कथूरिया	डा० रमाकान्त शुक्ल	४१
११. देववाणी-परिषद्वार्ता	आनन्दवर्धन	४३
१२. संस्कृत-जगद्वार्ता	आनन्दवर्धन	४३
१३. मानवता	डा० जीतसिंह खोखर	४४
१४. भवतामभिमतम्	डा० हरिदत्त शर्मा	४५
१५. लेखक-सङ्केताः		४६

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली ।

२. प्रकाशनकालावधिः—त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति । —डा० रमाकान्त शुक्लः

१५-७-१९९१ प्रकाशकः सम्पादकः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य त्रयोदशवर्षीयेऽस्मिन् तृतीयेऽङ्के या सामग्री दीयते तत्र २, ३, ४, ५, क्रमे प्रकाशितं रचनाचतुष्टयं भारतस्य पूर्वप्रधानमन्त्रिणः श्री राजीवगान्धिनोऽसामयिकं हत्याजन्यं निधनमभिलक्ष्य कृतं वर्तते।

२१.५.१९९१ तारिकायां स्वराजनेतृधर्मं पालयन् पेरम्बूदूरनाम्नि स्थाने निर्वाचन- प्रचारार्थं गतः श्रीराजीवगान्धी यया निर्ममतया अदृष्टश्रुतपूर्वया च रीत्या कैश्चिन्नृशंसैर्मारितस्तेन को नाम न स्तब्धः को वा च न शोकाभिभूतः? सौम्यमूर्तेः श्रीगान्धिनो विरोधिनोऽपि अनया हत्यया दुःखिता एव स्युः। यत्र देशे अहिंसैव वास्तविकी हेतिर्मन्यते- तत्राद्यत्वे हिंसाया उन्मुक्तं ताण्डवं वीक्ष्य लज्जा दुःखं चानुभूयेते। जातस्य मरणं ध्रुवमस्ति किन्तु यदि अहिंसामार्गोऽस्माभिःपालितोऽभविष्यत्तदा महात्मा गान्धी, श्रीमतीन्दिरा गान्धी, राजीव गान्धी, दीनदयाल उपाध्यायः, जनरलवैद्यः-एतादृशा जना अस्मन्मार्गदर्शनाय अधिकदिनानि यावत्सुलभा अभविष्यन्! यः कोऽप्यस्मिन् देशे अस्थाने हिंसाकर्म प्रेरयति स नूनमेव देशस्य भारतीयसंस्कृतेश्च शत्रुरस्ति। उपर्युक्ते रचनात्रये श्रीराजीवगान्धिनो हत्याया निन्दया साकं तत्र शोको व्यज्यते। **'ब्रूहि जगन्नाथस्वामिन्'** इतीयं रचना मया पुरीनगर्यां ६. ६. १९९१ तारिकायां श्रीजगन्नाथ-संस्कृत-विश्वविद्यालयेन डॉ. भीमरावआम्बेडकर-जन्मशताब्दीमुपलक्ष्य समायोजिते संस्कृत-कविसम्मेलने पठिता । इयं रचनामया उत्कलएक्सप्रेसनाम्नि रेलयाने ५.६.१९९१ तारिकायां प्रारभ्य ६.६.१९९१ तारिकायां पुर्यां पूरिता। अत्र 'माला भूता व्याली' 'प्रणतिर्भूता प्रहृतिः'- इति शब्दैः श्रीराजीवगान्धिनो हत्यायाः पूर्वं महिलया कृतस्य माल्यार्पणस्य चरणस्पर्शस्य च भयानकत्वं कपटपूर्णत्वं च संकेत्येते। **'अशनिपातः'** इतीयं रचना डॉ. कृष्णकान्त शुक्ल-महाभागैः २२-२४.५.१९९१ तारिकामध्ये प्रणीता । अत्र अनुष्टुब्-वियोगिनी-वृत्तयोः हिंसकानां निन्दया साकं विधिरप्याक्षिप्तः कविना । राजीवगान्धिनो व्यक्तित्वस्य प्रकाशनं देशस्य वर्तमानदुर्दशायाश्च व्यञ्जनं अस्या रचनाया भावतत्त्वम्। प्रसादिकता चाद्यन्तमनुस्यूतात्र। डॉ. प्रकाशपाण्डे-महाभागेन २२.५.१९९१ तारिकायां मुक्तच्छन्दसि ग्रथिता 'राजीवहत्या' रचना या कवेः शोकं व्यमक्ति। 'भारतीपरिदेवनम्' इतीदं शतककाव्यम् 'अभिराज' डॉ. राजेन्द्र मिश्र- महाभागैः २४.५.१९९१ तारिकायां प्रणीतम्। कविनेयं रचना 'राष्ट्रनायकराजीवास्तङ्गमनवृत्तश्रवणप्रस्फुटितहृदयेनाविरलाश्रुक्लिन्ननयनेन' सता कृता। यथैतः पूर्वं 'देववाणी- हुङ्कारशतके' देववाणीमुखेन तेन स्व भावाः व्यक्तीकारितास्तथैवात्र 'भारती', मुखेन स्व शोकस्य व्यक्तिः कारिता । एतेनायं शोको न केवलं कवेरपितु सर्वस्या भारतभूमेरेवास्ति ।

श्रीरामकीर्तिमहाकाव्यस्य प्रणेतारो डॉ. सत्यव्रतशास्त्रिमहाभागा अन्तर-राष्ट्रियरामायणसम्मेलनार्थमस्य (१९९१) वर्षस्य अप्रैल मासे बैङ्काकनगरमुपेताः। तत एव तैरस्मत्सकाशे सम्मेलनविषयकं सुदीर्घं 'वृत्तपत्रं' प्रहितम् । अनुष्टुबुपजातिवसन्ततिलकावृत्तोपनिबद्धं पत्रमिदं सम्मेलने यद्यद् वृत्तं तत्सरलसरसशैल्यामस्मत्पुरो दधाति। पाठकानामप्यनेन ज्ञानवर्धनं भवतु

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

काव्यमयस्यास्य च रसं तेऽप्यास्वादयितुं शक्नुयुरिति धिया तदत्र प्रकाश्यते। संस्कृते छन्दोबद्धपत्राणां (वृत्तपत्राणां) महती परम्परास्ति। मन्यं तस्या अध्ययनं शोधार्थिनां कृते रोचक विषयः स्यात्।

श्री ताराशंकरशर्मणां **'कालिदासःशिरोमणिः'** इति रचनायां कालिदासस्य प्रसिद्धा विशेषताः अनुष्टुबुपजातिमालिनीवृत्तेषु ग्रथिताः।

प्रो. परमानन्दशास्त्रिप्रणीतं **'दोहादशकम्'** (ग्रीष्मवर्णना) ग्रीष्मस्य वर्णनं नवनवोपमानविधानेन करोति। अपभ्रंश-काव्यस्य प्रमुखं दोहाख्यं वृत्तं संस्कृतेऽपि सुगमतया प्रयोक्तुं शक्यते इति श्रीभट्टमथुरानाथशास्त्रि- श्रीब्रह्मानन्दशुक्ल-शान्तप्रकाश सत्यदासादिभिरनेकैः कविभि स्वरचनाभिः प्रकटीकृतम्। अस्मिन्नेव क्रमे 'दोहादशकम्' अपि स्व विच्छित्तिं विकिरति।

प्रो. शास्त्रिणां **'दाडिममेकं शतं रोगिणः'** इति शीर्षकं व्यङ्ग्यगानं समूहगानमस्ति यद् गायकदलेन द्विधा विभज्य रागबद्धं कर्तुं शक्यते। अत्र शासनासन्दिकाराधनैकव्रतिनां साम्प्रतिकनेतृणां चरितमुपवर्णितम्। निर्वाचनवेलायां ते पादयोः प्रणिपत्य मुहुः घोणाघर्षणं कृत्वा कथं मतं याचन्ते अनन्तरञ्च किं किमकार्यं नाचरन्तीति न कस्याप्यपोहितम्। तेषां स्वभावस्यात्र सम्यग् व्यञ्जना भवति। अत्रैव 'एक अनार सौ बीमार' 'कोढ में खाज' 'जिसकी लाठी उसी की भैंस' 'जाने किस करवट से ऊँट बैठे' इति हिन्दीभाषाया लोकोक्तीनां 'दाडिमेकं शतं रोगिणः' 'कुष्ठे कण्डूरिव' 'शक्तिर्यस्य महिष्यपि तस्य' 'केन पार्श्वेन्नोष्ट्र उपविशेत्'- इति संस्कृतरूपान्तरणं कृतम् येन लोकभाषायाः संस्कृतस्योपरि प्रभावः सूच्यते।

संस्कृतस्य काव्यशास्त्रमतिगम्भीरं स्पष्टं चास्ति। तस्याध्ययनं न केवलं संस्कृतकक्षास्वेव भवति अपितु हिन्दी एम. ए. आदि कक्षास्वपि भवति। अस्मन्मित्रवर्य्येण डॉ. सुन्दरलालकथूरियामहाभागेन तत्र बहु साधना कृता। अनेन रससिद्धान्तमधिक्षिपन्तो लेखका सयुक्तिकं धर्षिताः। अस्य पञ्चाशद्वर्षपूर्तावस्माभिः संक्षिप्तलेखेन तस्य रससिद्धान्ताधिवक्तृत्वस्य. सूचना पाठकेभ्यो दीयते। विस्तृतपरिचयार्थं त्वस्य ग्रन्था एव मनीषिभिरवलोकनीयाः।

'भवतामभिमतम्' इत्यत्र डॉ. हरिदत्तशर्मणः पत्रं प्रकाश्यते। अस्मिन्नङ्के लेखकानां संकेताअसूचनापि दीयन्ते। ये पाठका लेखकैस्साकं विचारविमर्शं कर्तुमिच्छेयुस्तेषां कृतेऽनया सूचनया सौविध्यं भवेदेव।

देववाणी-परिषद्वार्ताग्रां संस्कृत-जगद्वार्तायां च संस्कृत-जगतः केचित् गतिविधयो दीयन्ते।

आर ६ वाणी-विहारः,
नयी दिल्ली-११००५९
१५. ७. १९९१

विदुषामाश्रवः

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ब्रूहि जगन्नाथस्वामिन्!

रमाकान्त शुक्लः

(१)

किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्!
किं वा भवितान्यद् ब्रूहि जगन्नाथस्वामिन्!

(२)

माला भूता व्याली जीवनलीलान्तकरी
प्रणतिर्भूता प्रहृतिर्जनविश्वासान्तकरी
कुसुमानि कुर्वते कालदूततां निःशकम्
अनृतं सत्यं तर्जयति जगन्नाथस्वामिन्!
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्!

(३)

ये शुभ्रकञ्चुका अवलोक्यन्ते नेतारः
प्रायशः प्रजातन्त्रस्य सन्ति ते हन्तारः
पूजादीपा गृहदाहकारिणो दीप्यन्ते
रक्षकाः सन्ति भक्षका जगन्नाथस्वामिन्!
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्!

(४)

जीवनं विश्वसम्पद्बुधजनैः पुरा कथितं
दृश्यते भीषितं पदे पदे मथितं क्वथितम्
अवहेल्यन्ते सज्जनाः दुर्जनैः पदे-पदे
दूयते मनस्ते किं न जगन्नाथस्वामिन्?
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/S

(५)

या विश्वबन्धुता साभिमानमुद्घुष्टासीत्
महिमानमहिंसा या च जगति भजमानासीत्
यः सत्यपरिश्रमजयो गीयते स्मास्माभिः
क्वासौ विलीयते ब्रूहि जगन्नाथस्वामिन्!
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्!

(६)

दीनाश्च नाद्य नारायणतां गमिता लोके
नार्यश्च नैव पूज्यन्ते तव भक्तैर्लोके
किं किं दर्शयसि प्रभो जगद्बीभत्सतां
कुरु कृपां सपदि संसृतौ जगन्नाथस्वामिन्!
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्!

(७)

अमृतं विषायते, भारायते तथा ज्ञानं
वरदानं शापायते तमिस्रायते दिनम्
स्रोतो मरुभूमीयति सेवा लुण्ठना मता
वार्ता युद्धीयति कथं जगन्नाथस्वामिन्!
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्!

(८)

हे विश्वरूप! नैजं रूपं किं नो पश्यसि
हे दीनदयालो! दीनजनान् किं नो पश्यसि?
हे सर्वव्यापक! किं सहसे सर्वस्य शुचं
कुरु नः सत्पथगानाशु जगन्नाथस्वामिन्!
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्!

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अशनिपातः

डॉ.कृष्णकान्त शुक्लः

धर्मग्लानिविनाशायाधर्मस्योन्मूलनाय च।
असतां सर्वनाशाय, सतां संरक्षणाय च॥1॥
नानारूपेषु सत्त्वेषु, दिव्यासु च विभूतिषु।
भगवानवतरत्यत्र देशेऽस्माकं पुनः पुनः॥2॥
केयं विडम्बना घोरा यद्दिव्या योगमूर्तयः।
मूर्तिमद्भिरधर्मैर्हि विलोप्यन्ते मुहुर्मुहुः॥3॥
पुनरावृत्तिमायाता सैव गाथा पुरातनी।
यस्याः स्मरणमात्रेण हृदयं परिवेपते॥4॥
अहो! कृतघ्नताऽऽस्माकं या हन्त्युपकारिणः।
आश्रयाशा वयं जाताः पिशाचा इव रक्तपाः॥5॥
एष राजीवगान्धी च कथामात्रवपुः कृतः।
कयापि कृत्यया काल्या धरणीभारभूतया॥6॥
जवाहरस्य दौहित्र इन्दिरायाः सुतस्तथा।
गौरवं देशभूमेर्हा! सहसैव व्यलुप्यत॥7॥
मालिकां जननीकण्ठे समासज्य विशेषतः।
मञ्चं गच्छन् हतः क्रूरं पेरुम्बूदूरपत्तने* ॥8॥
विषमाऽपरिहार्यतामयी विधिलीला सुतरां बलीयसी।
शुभमप्यशुभं यया भवेदशुभं वा शुभतामियात्तथा॥9॥
चरमे निमिषे हि किं भवेदिति को वेत्ति जनो विशेषतः।
हृदये क्रियते किमप्यहो! फलमन्यत्प्रददाति वै विधिः॥10॥
जगतामुपकारका हि ये प्रसभं तान् हरतीह दुर्विधिः।
धरणीहृदयस्य शल्यका फलिता बिभ्रति कामपि श्रियम्॥11॥

---

* श्रिया विहीनं सञ्जातं पत्तनं तद्यतः परम्।
अतः श्रीरहितं प्रोक्तं पेरुम्बूदूरपत्तनम्॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

निजगन्धविशेषसम्पदा विहिताशेषजगत्प्रसादनाः।
कुसुमावलयोऽल्पजीवनाः परिजीवन्ति चिरं च कण्टकाः॥12॥
अयि दैव! तवास्ति को नयो मृदुलां तां विनिहंसि वल्लरीम्।
सततं परिपीडनापरां परिपुष्णासि भृशं च कण्टकीम्॥13॥
अनुरञ्जितलोकमानसः स हि राजीवपरागनिर्झरः।
करुणारहितेन हा विधे! पलमात्रेण चिराय शोषितः॥14॥
स हि दिव्यगतिस्तपोधनो निजदेशोन्नतये कृतश्रमः।
विचचार भुवं सदागतिर्जनतातापनिवारणे क्षमः॥15॥
कृतवान्न दुरुक्तकीर्तनं, जनतन्त्रं न कदाप्यदूषयत्।
गतवान् स यमेव नीवृतं, तरसा तं स्वगुणैर्व्यभूषयत्॥16॥
निजदेशपरायणो युवा, कपटाचारविचारवर्जितः।
जननीपरमः प्रतापवानथ गङ्गाचरणेषु भक्तिमान्॥17॥
भरतावनिसंस्कृतिप्रियः सरलः, सौम्यविचारदर्शनः।
कुटिले नृपनीतिचत्वरेऽसदृशो मार्गनिरूपकः सदा॥18॥
कुटिलैरभिसन्धिसाधनैर्घृणितैः साधुनिबर्हणैः परैः।
स विकासविधानपण्डितः परिमुष्टश्छलतो नृपुङ्गवः॥19॥
प्रथिता भुवनेषु शर्मदा द्रविडानां परमा मनोरमा।
बत! सा खलु दक्षिणा दिशा निजनाम्नस्तु चकार सत्यताम्॥20॥
तदलौकिकभावभाविता ननु मन्ये किल मृत्युदेवता।
प्रथमं चरणाववन्दयत्तदनु प्राणमकर्षयच्च सा॥21॥
नवनीतसमानकोमलं क्व वपुः, क्वाथ विनाशसम्भरः?
मृदुतां खरतां च दारुणां विषमां तां बत! कोऽनुमोदयेत्?॥22॥
हृदयं परिवेपते मुहुः, परिमोहं समुपैति चेतना।
धरणी किल कम्पते भृशं, श्वसितैर्द्यौर्विषमं विषीदति॥23॥
क्व भविष्यति साम्प्रतं हहा! गुणमूर्तिः समुदारदर्शनः।
जनतापरिपालनक्षमो ननु राजीवसमानमानवः?॥24॥
कविते! भव मौनमाश्रिता विगता दिव्यविभूतिरीदृशी।
असमञ्जसकारिणा हृता विधिना पुण्यपरम्परा हि सा॥25॥

रचनातिथिः 22 तथा 24 मई, 1991

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राजीव-हत्त्या

डॉ. प्रकाश पांडे

हा मृत्युना विकरालेन मुषितो राजीवः,
उत्पाटितं राष्ट्रकमलं हा हत्त्यया भीषणतमया---

रत्नमपहृतं हा विश्वराजकारणसागरतः
मत्तहस्तिना दुष्टजनकृतहत्त्यया यस्याः दुष्टतायाः

न विद्यते स्पष्टं किमपि वदनमपि,

हा दीर्णो देशः! हा दीर्णा धरणिः!
हा दीर्णोऽस्मत्सदृशकोटिकोटिजनहृद्देशः
हा हस्तेन दैवहतकेन
क्षितिजमेव भारतराजकीयतायाः समुत्पाटितम्...

गगनमेव विहितं तरणिविहीनम्
तत्रैव समर्पितं रसायनं द्रवशङ्कुरिव यथा स्फोटे
यस्य केवलो दाहः, आलोकस्तु नास्त्येव हन्त...

हन्त हा मृत्युना समुत्पाटितमस्मद्राष्ट्रराजीवम्
क्षोभेण च संप्लोषितं सकलमपि जीवनम्,

यस्य कृते न किमपि संजीवनम्,
यस्याधरे वु केवलो विषमयचषकः---

हा हन्त दारूणा हत्त्या!
(२२ मे १९९१, बुधवासरः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भारतीपरिदेवनम्

'अभिराज' डॉ.राजेन्द्रमिश्रः

विलोक्य निहतं पुत्रं राजीवं भग्नमानसा।
तुषाराश्रुपरीताङ्गी भारती[1] परिदेवते!!1

विहाय स्थविरामम्बां स्वजनद्रोहधर्षिताम्।
नेत्रान्धयष्टिकल्पस्त्वं क्वोपयातोऽसि पुत्रक!!2

गुणाधार गुणग्राहिन् गुणग्रामविभूषित!
इन्दिराश्रय राजीव! राजीवप्रियदर्शन!!3

शीलार्जवसदाचारविनयप्रेममण्डित!
स्वराष्ट्राभ्युदयाकाङ्क्षिन् सर्वसेवासमाहित!!4

दीनहीनजनालम्ब दुःखदारिद्र्यमोचन!
सद्गुणामृतशीतांशो निर्धनोदयभास्कर!!5

देवोपमतनो सौम्य सुस्मिताधरपाटल!
घनगम्भीरसंराव स्निग्धामंत्रितलोचन!!6

मत्स्यन्यायान्धतामिस्राच्छादिते मद्गृहाङ्गणे!
अकस्मादुदितोऽसि त्वं लोकतन्त्रप्रभाकर!!7

हा हतास्मि निराधारा निरालम्बा निराकुला!
यदद्य त्वयका हीना विधिनाऽपुत्रका कृता!!8

अकालजलदाच्छन्नं त्वामपश्यदिदं जगत्!
तमस्सिन्धुनिमग्नं हा नारकं दुःखमश्नुते!!9

---

1. भारती भूमिरित्यर्थः। भारतमाता यथा चासौ कथ्यते।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

किमुत्तरं प्रदास्यामि त्वत्प्रसूमिन्दिरामहम्!
कृत्वा त्वां मामकोत्संगे या जहौ धरणीमिमाम्!!10
रक्षितुं त्वामशक्ताऽहं कालुष्यमलिनानना!
आत्मानमपि सन्नंष्टुं द्रुतं पुत्रक! कामये!!11
युगान्तो भवतादद्य लयं यातु महीतलम्!
भारती भूमिरद्यैव निमज्जेत्प्रलयाम्बुधौ!!12
कालसंवर्तकाः मेघाः प्रहिता मातरिश्वभिः!
लोकं कवलितं कुर्युर्जगन्नाम क्षयं व्रजेत्।।13
याऽहमाथर्वणे वेदे ऋषिभिस्तत्त्वदर्शिभिः।
मातेति[2] सत्वरं घुष्टा पृथिवीपुत्रमानिभिः।।14
या चाहं देवतारूपा रम्योद्गीथैरुपस्तुता।
पृथिवीसूक्तमंत्रैस्तैर्विश्वभूमिमहीयसी।।15
गीतकानि जगुर्देवा यस्या मे भक्तिभाविताः।
कीर्तिभाञ्जि यशोभाञ्जि प्रशस्तानि त्रिविष्टपे।।16
यस्या मे धूलितल्पेषु क्रीडितुं शिशुलीलया।
परब्रह्म स्वयं नित्योत्कण्ठ आसीन्निरञ्जनः।।17
मत्स्यकूर्मवराहाद्यैः स्वरूपैरागतो हरिः।
मां सम्भावयामास कतिधा न युगे-युगे।।18
साहं पूततमा धात्री रत्नगर्भा वसुन्धरा।
भरतानां लसत्कीर्त्या भारतीति प्रकीर्तिता।।19
अद्य कृच्छ्रं महत्पापं कौलीनञ्चायशस्करम्।
बिभर्मि कल्मषं हन्त स्वजनैरेव सञ्चितम्।।20
क्व यामि विवशा दीना हिमवत्सिन्धुबन्धना।
दामभिस्सरितां गाढं संयता च पदे-पदे।।21

---

2. माता भूमिः पुत्रोऽहं पृथिव्याः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

न वेनेन तथा तप्ता रावणेन न धर्षिता।
न कंसेन तथा क्लिष्टा यथा सम्प्रति दुर्जनैः।।22
ऊर्ध्वबाहुर्विरौम्येषा न च कश्चिच्छृणोति मे।
कोऽपि वारयते नो मां नरराक्षसपीडिताम्।।23
यत्रागत्य चरित्रं स्वं सकाशादग्रजन्मनाम्।
अशिक्षन्त पुरा काले पृथिव्यां सर्वमानवाः।।24
तस्मिन्नु भारते वर्षे सङ्कुला अद्य लम्पटाः।
बण्डभण्डदुराचारा दुश्चरित्राः प्रवञ्चकाः।।25
एकस्य द्युमणेः स्थाने खद्योता भूरिसंख्यकाः।
शासनं कुर्वते हन्त नो तथापि तमःक्षयः।।26
लोकतंत्रसुरापानघूर्णिताक्षा मदोद्धताः।
आत्मानमिन्द्रं मन्यन्ते सदाचारविवर्जिताः।।27
लेखनीमपि सन्धर्तुं ये क्षमा न कुबुद्धयः।
ते च मंत्रिपदारुढाः शासति प्राज्ञमण्डलम्।।28
कुण्ठिता रसना येषां सामान्येऽपि वचःक्रमे।
त्रयीरहस्यं व्याख्यान्ति तेऽद्य संसदिसम्मताः।।29
वेदशास्त्रपुराणानां प्रामाण्येऽश्रद्धयान्विताः।
स्मृतिकाराः स्वयं जाता नव्यास्ते मनुमानिनः।।30
विना श्रमं विना योग्यां विना गुणं विना तपः।
काष्ठाधिरूढांस्तान् दृष्ट्वा निग्रहानुग्रहक्षमान्।।31
सर्वेऽपि युवका नव्यास्तदाचरितवर्त्मभिः।
अभ्युदयं समीहन्ते मेषभेकपराक्रमाः।।32
य एव कुरुते नित्यं समाजे घोरकल्कनम्।
सतां विपश्चितां नृणां जीवनं संकटान्वितम्।।33
वार्तां लपति दुर्वाक्यैर्वृद्धान् हसति कैतवैः।
रहस्यभेदोत्कोचाभ्यां प्रसादयति रक्षिणः।।34

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यात्रां करोति यानेषु यस्सदा भृतकं विना।
ताम्बूलवीटिकामत्ति विना मूल्यं सबान्धवः।।35
गूढमन्त्रं यमालोक्य पितरौ च भयान्वितौ।
लालटिकत्वमापद्य तच्चित्तमनुगच्छतः।।36
कण्ठेकालं यमालोक्य साध्वसादधिकारिणः।
मुक्त्वाऽऽसन्दीं पुरस्सृत्य वचः काञ्जेति तन्वते।।37
विषवाचा दुराचारैस्सततं लोकशातनैः।
स्वयम्भूर्नव्यनेताऽसौ चक्रवर्तित्वमश्नुते।।38
प्रथमे वसस्येवासौ नृशंसं लोमहर्षणम्।
हत्यापहारषड्यन्त्रबलात्कारादिविक्रमम्।।39
सम्यक् प्रदर्शयन्स्वैरं जायते लोकनायकः।
समाजं भीषयन् स्वीयैर्नव्यनव्यैः कुकर्मभिः।।40
अवार्यवीर्यं यं दृष्ट्वा स्थविरा दूरदर्शिनः।
उद्घोषयन्ति तद्भाग्यं नूनं मन्त्री भवेदिति।।41
दुर्गुणैः पापवृत्तैर्यैर्नेता भवति यौवने।
तैरेव महितः पश्चान्मन्त्री भवति शासने।।42
शैले-शैले मणिः कामं स्यान्न मुक्ता गजे-गजे।
वर्तते किन्तु नेताऽसौ ग्रामे-ग्रामे गृहे-गृहे।।43
मूर्खोऽप्यसौ महाविद्वान् क्लीबोऽपि सर्वशक्तिमान्।
निर्गुणोऽपि सतां पूज्यस्त्याज्यो निन्द्योऽपि सम्मतः।।44
अद्य यद् दृश्यते राष्ट्रे भ्रष्टाचरणताण्डवम्।
अमीषामेव नेतॄणां तत्सर्वं वृत्तमङ्गलम्।।45
विरोधिनां सभाभङ्गे मत-पेटक-हारणे।
सौम्याधिकारिणां स्थानान्तरणे स्वार्थपूरणे।।46
दस्युडिण्डिकलुण्ठाकखण्डवृत्तादिपोषणे।
भ्रातृभ्रातृव्यबन्धूनां लोकशोकसमुन्नये।।47

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यस्मिन् कस्मिन्नपि क्लिष्टे ऋतसत्यप्रवञ्चिते।
सामञ्जस्यहरेऽन्याय्ये कार्ये दर्शितशक्तयः।।48
स्वैरं चरन्ति वैधेयाः श्वेतखद्दरधारिणः।
हृदि बुद्धौ च कालुष्यसन्दोहं दधतस्सदा।।49
हिन्द्या वक्तुं क्षमन्ते नो नैव जानन्ति संस्कृतम्।
विदेशे प्रायशो गत्वा हासयन्ति स्वगौरवम्।।50
सचिवैः प्रतिभादक्षैश्चिन्तितं लिखितं तथा।
वक्तव्यं वाचयन्त्येते संसदादिषु केवलम्।।51
सहस्रशो हि भूपाला जनवाञ्छासुरद्रुमाः।
अमात्याश्चापि धीमन्तो लोककल्याणचिन्तकाः।।52
गृहाङ्गणे मया दृष्टा योगक्षेमप्रकल्पकाः।
स्वीयैश्चरित्रसौरभ्यैर्लोकामोदनतत्पराः।।53
तथाप्येतादृशाः पूर्वं चञ्चाकल्पा नृवायसाः।
सञ्जाता न मदुत्सङ्गे शाठ्याजीवाः कदाचन।।54
लोकतन्त्रमिदं नूनं शोकतन्त्रं प्रतीयते।
अधिकारतृषाऽदम्या येन सृष्टा जने-जने।।55
राजनीतिरियं ब्राह्मी मायाशक्तिरिवाधुना।
भ्रामयत्यातुरान् स्वैरं पापपङ्के निपातिनी।।56
स्वैरिणीव पथभ्रष्टा यत्र यत्र गता सकृत्।
तत्तद्गृहं द्रुतं नष्टं शीलचारित्र्यवञ्चितम्।।57
विश्वविद्यालयेष्वद्य कान्दिशीका हतप्रभाः।
मूढाः प्रतिष्ठिता यत्तत् राजनीतेर्नु कौशलम्।।58
राजसेवासु राजन्ते यद्बृहस्पतिविग्रहाः।
केचिद्धुरन्धरास्तच्च राजनीतेर्नु कौशलम्।। 59।।
विपरीतौषधै रुग्णान् ये कृतान्तसहोदराः।
प्रायशो घ्नन्ति तच्चापि राजनीतेर्नु कौशलम्।।60

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कर्णिकानां प्रवेशोऽपि परीक्षोत्तरणं विना।
कार्यालये न जायेत तत्रापि वाञ्छिताऽर्हता।।61
मुक्तद्वारेऽप्रतीहारे राजनीतिमहालये।
प्रवेष्टुं किन्तु लोकानां योग्यता कापि नो मता।।62
रावणे द्रावणे दक्षो य एव स्यात्स्वनीवृति।
अनियंत्रितवाङ् नेता सोऽत्रागत्य महीयते।।63
न परीक्षा न वा शुल्कः साक्षात्कारोऽपि न क्वचित्।
राजनीतौ प्रवेशाय केवलं कीर्तिरिष्यते।।64
यथा-यथाऽतिचाराणां गाथा सीमातिलङ्घिनी।
राजधानीं समासाद्य विस्मापयति नायकान्।।65
तथा-तथाऽस्य डिम्भस्य शासनागमयोग्यता।
अश्मरेखेव दुर्मृष्या सुस्थिरा चोपजायते।।66
सकृन्मंत्रिपदं प्राप्य सन्दिहाननिजायतिः।
वातगत्याऽर्जयत्येव लक्षकोटिमितं धनम्।।67
उत्सवोद्घाटिनी हस्ते कर्तरी भाषणं मुखे।
आश्वासनं मृदूद्गारे हृदये काञ्चनो मृगः।।68
बुद्धावज्ञानकालुष्यं चरिते कृकलासता।
जठरे वाडवज्वाला पादयोश्च शनैश्चरः।।69
स एति च स वा नैति विदूरे ऽसौ स चान्तिके।
राष्ट्रं व्याप्य समाजञ्च सर्वत्रैवाधितिष्ठति।।70
मान्यो धन्यो वदान्यो वा कुलीनो गुणवानपि।
दर्शनीयस्स वक्ता च कलौ नेता य उच्यते।।71
एभिरेवास्म्यहं विद्धा सततं नग्नलुञ्चितैः।
एभिरेवाद्य कौलीनं भजेऽहं भूरि भूतले।।72
याऽहं बहुमता नित्यं विश्वबन्धुत्वकाङ्क्षिणी।
स्वीयवेश्मनि साऽद्याऽहं बन्धुद्रोहैः खलीक्रिये।।73

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विश्वशान्तिप्रयासेषु याऽहमासं महीयसी।
अशान्ता स्वयमद्याहं कलहैः स्वकुटुम्बिनाम्।।74
सिद्धसिन्धुपवित्राऽम्भोऽभिषिक्ताऽहं समर्चने।
अद्य रक्ताभिषिक्ताऽस्मि डाकिनीव महाशना।।75
मामुपहसत्याकाशः काञ्चनातीतसाक्षिकः।
क्वासं पुरा क्व चाद्यास्मि हतभाग्याऽयशस्विनी।।76
संस्कृतिर्भारतीया या विश्वाध्ययनपात्रताम्।
नित्यं गता क्व लुप्ताऽसौ विश्ववाराऽदिमाऽनघा।।77
भेदेऽप्यभेदं पश्यन्ती दृष्टिर्मे तत्त्वदर्शिनी।
कथमद्य कलौ काले विन्दते दिवसान्धताम्।।78
सैवाहं सागरश्यामसीमा तीर्थव्रजान्विता।
हिमवद्विन्ध्यसम्भिन्ना सिद्धसिन्धुजलामला।।79
वेदशास्त्रपुराणानां सनातनवचोऽमृतैः।
अनारताभिषिक्ताहं पाविता च तपोधनैः।।80
अभिन्ना नित्यकूटस्था धराऽहं सा चिरन्तनी।
भिन्नस्वभावाः सञ्जातास्सन्ततयस्तथापि मे।।81
प्रविज्ञा योगिनो मान्या ऋषिकल्पा विपश्चितः।
प्रेक्षावन्तस्सदाचारा नयज्ञा नयकोविदाः।।82
शिल्पिनो भिषजश्शल्यक्रियादक्षा विशारदाः।
यान्त्रिकाः कवयो नैके साधकाः क्रान्तदृष्टयः।।83
अद्यापि किन्न वर्तन्ते राज्ये-राज्ये समन्ततः?
भर्त्सिताः किन्तु तिष्ठन्ति भर्त्सिते नु गुणाग्रहे।।84
राजनीतिकृतं सर्वं मानसाफल्यसद्यशः।
अन्यथा जीवनं व्यर्थं व्यर्थं एव परिश्रमः।।85
राजनीतिकृपादृष्ट्या भावितोऽथ कृतार्थितः।
पद्मभूषणतां याति त्वरितः शैवलोच्चयः।।86

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

न गुणोऽभ्युदये हेतुर्न तपस्या न पाटवम्।
इदानीं राजधान्येव समर्था भाग्यनिर्णये।।87

विपर्यस्तमहो सर्वं प्राक्तनं लोकमङ्गलम्।
अध्यात्ममण्डिते राष्ट्रे प्रभवत्यद्य वैभवम्।।88

नचिकेता यमं यत्र रथरामादिवैभवम्।
व्युपेक्ष्य याचतेऽखिन्नो रहस्यं ज्ञानमात्मनः।।89

मोहग्रस्ता नु तत्रैव नचिकेतःपितामहाः।
कृमिकल्पाः प्रमोदन्ते पूतिशासनकर्दमे।।90

न तेषामिह वैराग्यं नो पराजयपीडनम्।
नापमानकृतं दुःखं नात्मवञ्चनजा त्रपा।।91

एकां लज्जां परित्यज्य त्रैलोक्यजयतत्पराः।
दृश्यन्ते मम सत्पुत्रा गौरवाय ममाधुना।।92

नात्मानं मन्यते कोऽपि कस्मादपि लघुक्रमम्।
न श्रद्दधाति पूर्वेषु मर्षयत्यवरान्न वा।।93

प्रतीयते नु यः कोऽपि पथि दुर्धर्षकण्टकम्।
येन केनाप्युपायेन क्रियते तस्य शोधनम्।।94

राष्ट्राभ्युदयलीनोऽपि तुच्छस्वार्थं निहन्ति यः।
मारणं ह्येव तस्यैकं समाधानमुपस्थितम्।।95

हतो राष्ट्रपिता वन्द्यो हतो दीनदयालुकः।
हतो भाभा हतश्शास्त्री हता हा प्रियदर्शिनी।।96

साम्प्रतं निहतः पापै राष्ट्रगौरवविग्रहः।
आत्मजः प्रियदर्शिन्या राजीवः प्रियदर्शनः।।97

भाग्योदयदिनारम्भे हन्त बालविभाकरः।
संग्रस्तः सैंहिकेयेन किं भविष्यति साम्प्रतम्।।98

प्रसरिष्यति सर्वत्र मत्स्यन्यायो भयङ्करः।
मरिष्यन्ति जनाः सर्वे बन्धवो बन्धुभिर्हताः।।99

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यथा भोगविलासान्धा मद्यपा यदुवंशिनः।
शत्रुवज्जघ्नुरन्योऽन्यं तथा पश्याम्यहं पुनः।।100

विपत्तिवारणं राज्यं प्रवेशद्वाररक्षकम्।
अद्य पञ्चनदं दग्धं दृश्यते कलहानले।।101

साम्प्रदायिकविद्वेषो वर्णसंघर्षयोजना।
स्वार्थान्धनेतृभिः पुष्टं सर्वमद्य महीयते।।102

अग्निं सन्दीप्य नेतारः स्वयं तिष्ठन्ति दूरतः।
ज्वलन्ति केवलं मुग्धा अनाथं जायते कुलम्।।103

हा हा दैव! गृहं नष्टं प्रणष्टा संस्कृतिर्मम।
प्रणष्टं प्रेम बन्धुत्वं प्रणष्टा शान्तिरात्मिकी।।104

किं करोमि सहायं कं यामि को नु शृणोति मे।
नावातरति मद्भूमावीश्वरोऽपि भयान्वितः।।105

विशोधने खलानां तु सोऽप्यशक्तः प्रतीयते।
तस्माप्रतिज्ञां विस्मृत्य भारतं नायियासति।।106

किंस्वरूपमिदं राष्ट्रं भाविकाले भविष्यति।
अहं वेद्मि विधिर्वेत्ति राजेन्द्रो वेत्ति वा न वा।।107

।।इति देवभूमिस्थहिमाचलप्रदेशविश्वविद्यालयीयसंस्कृतविभागाध्यक्षेण श्रीमद्दुर्गाप्रसादाभिराजीसूनुना त्रिवेणीकविनाऽभिराजराजेन्द्रेण राष्ट्रनायकराजीवास्तङ्गमनवृत्तश्रवणप्रस्फुटितहृदयेनाविरलाश्रुक्लिन्ननयनेन हृदग्निविरचितं

भारतीपरिदेवनाख्यं

शोकशतकं

समाप्तम्।।

रचनातिथिः 24.5.1991 अपराह्णे त्रिवादने

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वृत्तपत्रम्

डॉ. सत्यव्रतशास्त्री
थाइदेशीयबैङ्काकनगरस्थे
शिल्पाकरविश्वविद्यालये
संस्कृत-विभागेऽभ्यागताचार्यः

Address for correspondence:
82, Soi 1, Sukhumvit,
BANGKOK 10110

26.4.1991

प्रिया बन्धुवर्याः,

सस्नेहाशिषः।

(अनुष्टुब्वृत्तम्)

मासस्याप्रैलसञ्ज्ञस्य द्वितीयेऽह्नि समागतः।
बैङ्काकनगरं रम्यं थाइदेशनिमन्त्रणात् ॥1॥

दिनेऽस्मिन्नेव षट्त्रिंशद्धायना समजायत।
थाइराजस्य दुहिता महाचक्रीति विश्रुता ॥2॥

अभिलक्ष्य तदेवात्र थाइसंस्कृतिपोषकाः।
आयोजयन्महोत्साहादन्तरराष्ट्रियोत्सवम् ॥3॥

रुचिं रामायणे राजकुमार्या अभिलक्ष्य ते।
उत्सवं तद्विषयकं कल्पयाञ्चक्रिरे मुदा ॥4॥

रामायणस्य पुण्यस्य यत्र यत्र प्रवर्तते।
प्रचारस्ते सनिर्बन्धं देशं तं तं न्यमन्त्रयन् ॥5॥

स्वस्मिन् स्वस्मिन्यथा देशे स्वरूपं प्रविलोक्यते।
रामायणस्य तत्तेऽत्र दर्शयेयुरतिस्फुटम् ॥6॥

एतदर्थं बुधा नैके षड् देशेभ्यो निमन्त्रिताः।
रामायणं स्वदेशीयं त उपस्थापयन्त्विति ॥7॥

सङ्घाः कुशीलवानां च कुशलानां निमन्त्रिताः।
रामायणप्रयोगाय स्वस्वशैल्यनुसारतः ॥8॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्राह्णे प्रवर्तते चर्चा रामायणकथाविदाम्।
रामायणकथां यत्र ते स्वदेश्यां विवृण्वते ॥9॥
तन्मर्मोद्घाटकांल्लेखान्प्रयत्नलिखितान्हि ते।
एकैकशो वाचयन्ति बुधैरन्यैरभिष्टुताः ॥10॥
प्रत्येकं दिवसे तावत्तृतीये लेखवाचनम्।
भवत्विति क्रमः कश्चिदधिकारिभिराश्रितः ॥11॥
अपराह्णे प्रयोगं स्वं सोदाहरणकं शुभम्।
व्याख्यान्त्यबुधबोधार्थं नानादेशकुशीलवाः ॥12॥
सायं च ते स्वद्देशीयं प्रयोगकुशला भृशम्।
रामायणं स्थिता रङ्गे कौशलेन प्रयुञ्जते ॥13॥
परीतोषश्च मोदश्च येन सञ्जायते महान्।
सामाजिकानां सर्वेषां कश्चिद्वाचामगोचरः ॥14॥
म्यांमारो भारतंवर्षं लाओसो मलयेशिया।
हिन्देश्या थाइदेशोऽत्र देशषट्को निमन्त्रितः ॥15॥
मुदे पराया अस्त्येव तत्तज्जनसमागमः।
दृढं रामकथासूत्रं तेषां मर्माणि सीव्यति ॥16॥
परस्परेण सम्बन्धस्तेषामतिहितावहः।
चर्चाप्रसङ्गे तेऽन्योन्यं बुध्यन्ते विषयान् बहून् ॥17॥
स्थिता एकत्र ते गेंहे नानादिग्भ्यः समागताः।
मित्रभावेन सग्धिं च सपीतिं चापि कुर्वते ॥18॥
प्रवर्तयन्तस्तत्रापि रामगाथाश्रितां कथाम्।
प्रदर्शयन्ति ते स्वस्य ज्ञानस्योपार्जने रुचिम् ॥19॥
पुमांस एव नैवात्र योषितोऽपि समागताः।
सर्वेऽपि कुशलास्तात! नृत्ये चाभिनये तथा ॥20॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वशास्त्रमनुरुध्यैव स्वां कलां दर्शयन्ति ते।
नहि तत्र विपर्यासः सूक्ष्मोऽपि परिलक्ष्यते ॥21॥
प्रयोगे रामगाथायाः कौशलेन कुशीलवाः।
प्रवृत्तिमन्तो रङ्गस्थान् रञ्जयन्ति जनान्मुहुः ॥22॥
प्रायोऽभिनेयं ते वस्तु नैव वाचा विवृण्वते।
तत्ते त्वभिनयेनैव प्रस्तुवन्ति पुरो नृणाम् ॥23॥
गाथका अपरे तावत् स्थितास्तेभ्यः पृथक् क्वचित्।
गायन्ति बहुगीतानि वस्तु यानि विवृण्वते ॥24॥
तिष्ठन्ति सह तैश्चापि वादका वाद्यकोविदाः।
ये गीतकाले वाद्यानि वादयन्ति पृथक् पृथक् ॥25॥
कांस्यतालञ्च भेरीं च तन्त्रीर्नैकविधास्तथा।
तूर्याणि च मृदङ्गांश्च स्वस्मिन् देशे सुविश्रुतान् ॥26॥
नानाकृतीन् विचित्रास्ते नानास्वरमनोहरान्।
वादयन्ति महोत्साहात् कुशलाः स्वस्य कर्मणि ॥27॥
पात्राणां प्रस्तुतौ रामगाथायाः पद्धतिं पृथक्।
समाश्रयन्ति कुशलास्तत्तद्देशकुशीलवाः ॥28॥
क्वचिच्छद्ममुखैस्तावत्तत्तदाकृतिसूचकैः।
आवृत्य स्वं मुखं पात्रप्रस्तुतिं ते प्रकुर्वते ॥29॥
क्वचिच्चोढ्वा कराभ्यां ते कृत्तचर्ममयाकृतीः।
तत्तत्पात्रगतं रूपं प्रस्तुवन्ति पुरो नृणाम् ॥30॥

(उपजातिवृत्तम्)

प्रवर्तमानस्य पुरेऽतिरम्ये
बैङ्काकनाम्ना प्रथिते पृथिव्याम्।
सम्मेलनस्यान्तरराष्ट्रियस्य
चर्चामहं कर्तुमभिप्रवर्ते ॥31॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आग्नेयदेशेषु महान् प्रचारः
स्वदेशवद्दाशरथेः कथायाः।
प्रयुञ्जते तामतिकौशलेन
तस्यां जनाः स्वां रुचिमादधानाः ॥32॥

कथं प्रयोगो भवतीतरेषु
देशेषु तस्या इति बोद्धुकामाः।
सम्मेलनस्यातिविशालरूप-
स्यायोजनेऽत्रत्यजना मनोऽद्धुः ॥33॥

निमन्त्रयामासुरतोऽत्र ते षड्-
देशेभ्य आनन्दपरा अनेकान्।
कुशीलवान् रामकथासुविज्ञान्
रसानिवास्यां भुवि संस्थितान् षट् ॥34॥

स्वस्यां कलायां निपुणाः स्वशक्त्या
विवृण्वते रामकथां स्वशैल्या।
इमे ततो जायत एव कश्चिद्
हर्षस्य वर्षो जनमानसेषु ॥35॥

रामायणं तेऽपि रसात्कदाचित्
प्रयुञ्जते पुत्तलिकामुखेन।
रुच्यैस्तथा छद्ममुखैः कदाचि-
न्नृत्यैरथो वा विविधैः सुरम्यैः ॥36॥

आलोकमालोकमिदं समस्तं
सामाजिकस्तृप्यति नैव कश्चित्।
तृप्तिर्भवेच्छ्रेयसि नैव कस्या-
पीत्यत्र सन्देहलवो न कश्चित् ॥37॥

कुशीलवा एव निमन्त्रिता नो
सन्त्यत्र नाना विबुधा अपीति।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्मेलनस्यास्य विशिष्टताऽस्ति
प्रख्यापयेद्या महिमानमस्य ॥38॥
विद्वज्जनास्ते विशदं क्रमेण
व्याख्यान्ति रामस्य कथां स्वदेश्याम्।
भवन्ति तेषां प्रतिपादनानि
ज्ञानस्य वृद्धेर्जननानि भूयः ॥39॥
सर्वत्र रामस्य कथैव यद्य-
प्यास्ते तथाऽप्यत्र महान् विभेदः।
संलक्ष्यते तत्प्रतिपादनायां
रूपं पृथग् या प्रददाति तस्यै ॥40॥
दृष्टान्तरूपेण समासबुद्ध्या
भेदाः प्रदर्श्यन्त इहातिमुख्याः।
बोधो भवेद्येन सुधीजनानां
भिन्ना कथं रामकथाऽन्यदेश्या ॥41॥
देशान्तरे रामकथाप्रसङ्गे
कांश्चित्प्रसङ्गाननुपवर्णयामः।
स्वरूपतो वा क्रमतोऽथवा ये
स्वदेश्यरामायणतोऽतिभिन्नाः ॥42॥
फलक् फलाम् इत्यभिधानभाजि
लाओसदेशे प्रथिते पुराणे।
रामायणे वर्णित इत्थमस्ति
मायाविमारीचवधप्रसङ्गः ॥43॥
कृत्वा यदा हेममृगस्य रूपं
रामाश्रमाभ्याशमुपैति यावत्।
मारीचनामाऽसुरपाश एष
तावत्स सीताक्षिपथं प्रयाति ॥44॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विलोक्य तं विस्मितमानसा सा
नेतुं तमाह स्वपतिं विमुग्धा।
असम्भवं हेममृगस्य जन्मे-
त्यवोचदेषोऽवरजं च विद्वान् ॥45॥
तद्वाक्यमस्या अपि कर्णमापद्
यत्क्रोधमस्या ज्वलयाम्बभूव।
स्वेच्छाविघातात्कुपिता स्वभर्तु-
स्तूणीरतोऽसौ शरमाचकर्ष ॥46॥
वक्षःस्थलं विध्यति यावदेषा
तेनातिघोरेण शरेण तावत्।
चुक्रोश रामः सुतरां भयार्तः
शरं च तस्याः करतोऽपनिन्ये ॥47॥
अत्याहितं भोः किमिति त्वयैवं
चिकीर्षितं चेति वचोऽभ्युवाच।
तवाग्रहश्चेदयमेव ताव-
न्मृगं त्वदर्थं समुपानयामि ॥48॥
उक्त्वैवमेतां रघुवंशनाथो
मृगस्य शीघ्रं खलु पृष्ठतोऽभूत्।
कालेन चासौ कियताऽपि तस्मिन्
बाणं प्रवीरो विमुमोच घोरम् ॥49॥
क्षतो भवंस्तेन स आर्तवाचं
हा लक्ष्मणेत्येवमुवाच दुष्टः।
उवाच सम्बोध्य विदेहजां च
हा नाम सीते इति चापि वाचम् ॥50॥
आकर्ण्य तां तत्क्षणमेव ताव-
च्छ्रीरामरमार्गानुगतस्तरस्वी।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीलक्ष्मणस्तत्स्थलमाससाद
यत्राऽऽस्त तद्भ्रातृवरः प्रियोऽस्य ॥51॥

विलोक्य मारीचमयं श्वसन्तं
बाणेन तावत्प्रजहार वीरः।
रामस्तदाऽन्यं विमुमोच बाणं
तस्मिन् स्वके राक्षसरूपमाप्ते ॥52॥

एवं स विद्धः प्रखरैः शरैस्त्रिः
प्राणान् मुमोचासुरवंशजातः।
रामो निवृत्तः सहलक्ष्मणश्च
विदेहजाशून्यकुटीरकं स्वम् ॥53॥

हिन्देशियायामिदमेव तावत्
किञ्चिद्भिदाऽऽख्यानवरं प्रसिद्धम्।
तत्रास्ति मारीचवधः शरेण
सौमित्रिणाऽस्तेन सुदारुणेन ॥54॥

रामे हि मारीचमनु प्रयाते
सौमित्रिरेनं द्रुतमन्वगच्छत्।
आलोक्य मारीचमसौ मुमोच
प्राणान्तकं बाणमथो अमुष्मिन् ॥55॥

तत्रैव काचित्खलु कुम्भकर्ण-
कथाप्रसङ्गेऽपि भिदाऽस्ति लक्ष्या।
प्रस्थानतोऽसौ समराङ्गणार्थं
पूर्वं स्वभार्यां समया प्रयाति ॥56॥

सा चाङ्गवस्त्रं प्रददाति तस्मै
मुखं कराभ्यां च वृणोति नैजम्।
दीना विवर्णा च कथञ्चिदेवा-
भ्युपैति पत्युर्गमनं रणार्थम् ॥57॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवञ्च तत्रासुरयोषितोऽपि
स्थिताः समावृत्य विदेहजाताम्।
लङ्कापुरेऽशोकवनस्थले नो
बीभत्सरूपं दधतेंऽशतोऽपि ॥58॥

ता अप्सरोवत्सकलाः सुवेशाः
सुभूषणाः कोमलकान्तरूपाः।
हिन्देशियारामकथाप्रसङ्गे
सामाजिकानां पुरतो विभान्ति ॥59॥

बीभत्सरूपा नहि दर्शनीयाः
स्त्रियः समुद्वेगकरं भवेत्तत्।
सामाजिकानामिति तत्र कश्चिद्
विलक्षणः सम्प्रथते प्रवादः ॥60॥

एवञ्च सीताहरणाद्दशास्यः
प्रागव्रजद्रामकुटीं ततश्च।
सुप्तेषु रामादिषु गुल्मकादीन्
दण्डेन सन्ताडितवान् बलेन ॥61॥

एवं व्यधादेष परीक्षणार्थं
शक्तेर्निजायाः कुशलोऽपि युद्धे।
अल्पोऽपि शत्रुर्न भवेदुपेक्ष्य
इत्येवमात्मन्यधि सम्प्रधार्य ॥62॥

रामायणे कम्बुजदेशगेऽपि
लक्ष्यो विशेषो विदुषामवश्यम्।
तथा हि तत्रास्त्युपवर्णितं य-
न्न शक्तिमानप्युपसत्तुमासीत् ॥63॥

शक्तो दशास्यो जनकस्य पुत्री-
मत्युष्णतां चान्वभवत्तदारात्।

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यदा यदा तामुपसत्तुमैच्छत्
तदा तदा सोऽन्वभवत्तथैव ||64||
इच्छाभिपूर्तौ दनुजस्य तस्याः
सतीत्वतेजोऽभवदन्तरायः।
सामीप्यमस्या न कथञ्चिदेव
शशाक सम्प्राप्तुमतो दनूजः ||65||
रामायणस्यैव कथाप्रसङ्गे
विवक्षितो नो विषयोऽपरोऽपि।
विपश्चितां येन भवेदवश्यं
ज्ञानस्य वृद्धिः सुतरामभीष्टा ||66||
फलक् फलाम् इत्यभिधां दधानो
विनिर्मितो वर्षशतद्वयात् प्राक्।
लाओसदेशे किल विंशनाख्ये
ग्रन्थः पुरे दृष्टिपथं प्रयाति ||67||
प्राकाश्यमद्यापि न सम्प्रयातो
विलक्षणस्तिष्ठति मातृकास्थः।
ग्रन्थालये राष्ट्रिय एष नैव
ज्ञातोऽन्यदेशस्थविदां कथञ्चित् ||68||
ग्रन्थोऽस्त्ययं देवगिरा निबद्धों-
शतस्तथा पालिगिरा च दिव्यः।
तद्वर्ण्यवस्तु प्रविजानते भो
लाओसदेश्या न कथञ्चनापि ||69||
जानन्ति ते पालिगिरं परन्तु
जानन्ति नो देवगिरं ययाऽस्य।
ग्रन्थस्य भूयान् रचितोऽस्ति भागो
यो रामगाथां विवृणोति दिव्याम् ||70||
देशस्य तस्यास्त्यधुना न दीर्घा

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विंशन्नभिख्या खलु राजधानी।
पुरी पुराऽऽसीदपरैव लम्प्र-
बानाभिधा तत्सदमास्थिता या ॥71॥
नैकानि देवायतनानि तत्र
नैकास्तथा सौगतिका विहाराः।
नैकानि हर्म्याणि च शोभनानि
येष्वङ्किता रामकथाऽतिचित्रा ॥72॥
परश्शतान्यद्भुतरूपभाञ्जि
चित्राणि तत्राक्षिरसायनानि।
आलोकमालोकमपारहर्षः
सञ्जायते चेतसि कोविदानाम् ॥73॥
अद्यापि नेमानि मनोहराणि
चित्रीकृतानीति विचित्रमेतत्।
विलक्षणोऽयं विधिरत्र देशे
देशान्तराज्ञातचरो विभाति ॥74॥
हिन्देशियानामनि सन्ति चैवं
प्रम्बान्समाख्येषु सुरालयेषु।
नैकत्र चान्यत्र सुखावहानि
चित्राणि रामायणसम्मतानि ॥75॥
तद्देशभागस्थजना अजस्रं
प्रयुञ्जते रामकथां विचित्राम्।
परम्पराप्राप्तपथेन गुर्वीं
रुचिं दधाना हृदयेन तत्र ॥76॥
शिलासु वा भित्तिषु वा कृतानि
कृतानि वा दारुमयालयेषु।
ककाविनाभिख्यलघुस्वरूप-
काव्येषु वाऽथो उपवर्णितानि ॥77॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आलोकमालोकमुपैति लोको
भक्त्यानतो विस्मयपारवश्यम्।
अहो! महान् रामकथाप्रभावो-
ऽस्त्यत्रेति वाचञ्च मुहुः स वक्ति ॥78॥

पुराऽभिलेखो लिखितोऽत्र देशे
पुरातनोऽस्त्यष्टमवर्षशत्याम्।
रामायणस्यास्ति तु यत्र चर्चा
स एव तावत् प्रथमं प्रमाणम् ॥79॥

देशेऽत्र रामायणसंस्तवस्य
ततः परस्तात्प्रसृताऽत्र धारा।
सुपावना व्योमतरङ्गिणीव
मुदावहा रामकथोत्तमस्य ॥80॥

आसीत् पुरा वाक्पतेराजनामा
यथार्थनामा कविधुर्य एकः।
यः प्राकृतेनारचयत् स्वकाव्यं
श्रीरामगाथामभिलक्ष्य रम्याम् ॥81॥

अवर्णयत्तत्र स रावणस्य
वधं दनूजस्य चकार चापि।
नाम स्वकाव्यस्य स रावणेति-
पूर्वं वधेत्यन्तगतं विपश्चित् ॥82॥

गाथैतदीयैव जनैर्गृहीता
हिन्देशियावासिभिरात्मदेशे।
द्वीपद्वयेऽस्या हि यवे च पूर्वं
बाल्यां च भाषान्तरसङ्क्रमोऽभूत् ॥83॥

द्वीपद्वये ऽत्रैव विशिष्टरूपः
संलक्ष्यते रामकथाप्रचारः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नैकाभिरत्राभिनयन्त्यभिज्ञाः
शैलीभिरेतां रसिकैस्समीड्याः ॥84॥

बाल्यामिमे प्रस्तुवतेऽतिरम्या-
मिमामहो! छद्ममुखावृतास्याः।
कुशीलवाः सम्प्रति नृत्यनाट्य-
रूपेण वायाङभिधेन दक्षाः ॥85॥

यवे पुनर्द्वीपवरेऽपरे तु
प्रयुञ्जते पुत्तलिकामुखेन।
नाट्येन छद्मास्ययुतेन तावद्
रम्येण वायाङभिधानभाजा ॥86॥

प्रयुज्यते रामकथैकवारं
मासे जकार्ताभिधराजधान्याम्॥
आराम एकत्र तमन्मिनीति-
ख्याते रसश्चाप्यनुभूयतेऽस्याः ॥88॥

देशे तु तावन्मलयेशियाख्ये
प्रवर्तते रामकथाप्रचारः।
भागेषु त्रिष्वेव न चापरत्र
केडाहकलन्तानमलक्ककेषु ॥89॥

द्वीपाद्यवाख्यात्प्रथिमानमाप्ता-
ऽतिपावनी रामकथाऽत्र देशे।
छायायुतं नाट्यमपोष्यतात्र
तद्देशयात्रागतसार्थवाहैः ॥90॥

देशेऽत्र वायाङ्कुलितेतिसञ्ज्ञा
नाट्यस्य तस्य प्रथिमानमाप्ता।
आहिण्डमाना नटनर्तका यां
प्रयुञ्जते ग्राम्यजनेऽधुनाऽपि ॥91॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विनिर्मितास्तत्र भवन्ति चर्म-
मंय्यो ध्रुवं पुत्तलिका अनेकाः।
ता एव तावत् खलु नर्तयन्ति
गीतैश्च ते रामकथां वदन्ति ॥92॥
रामायणस्यात्र हिकायतश्री-
रामेति संज्ञा प्रथिताऽस्ति देशे।
इस्लामधर्मश्च तथाऽऽर्यधर्मो
धर्माविमौ द्वाविह सङ्गतौ स्तः ॥93॥
वैचित्र्यमेतन्मलयेशियायाः
सर्वाञ्जनान् स्मेरमुखान् करोति।
नान्यत्र देशे परिलक्ष्यते भो-
येतादृशो भूषणभूष्यभावः ॥94॥
तदीयरामायणमाह तुष्टाद्
अल्लात आसाद्य वरं दशास्यः।
अजेयतां प्राप न हीश्वराच्च
तत्रास्त्यहो! कीर्तित ईश्वरोऽल्लाः ॥95॥
ब्रह्मेति पूर्वं परिकीर्तितस्या-
धुना च म्यांमारभिधानकस्य।
देशस्य तावद्रमणीयगाथां
रामायणीं सम्प्रति चर्चयामः ॥96॥
तत्रापि दृग्गोचरतामुपैति
काचिद्भिदा रामकथान्तरेभ्यः।
तामेव तावद् रुचिरैः प्रसङ्गै-
र्द्वित्रैः समासेन निरूपयामः ॥97॥
ऋषिः सरामः सहलक्ष्मणश्चा-
योध्यापुरात्पुण्यनिजाश्रमाय।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रतिष्ठमानः समुपैति विश्वा-
मित्राभिधानोऽर्ध्वपथे तडाकम् ॥98॥
नेदं शुभं नात्र कदाचिदेव
निमज्ज्यतामित्यभिधाय रामम्।
स लक्ष्मणञ्चापि ययौ महर्षिः
पूजादि निर्वर्तयितुं यतात्मा ॥99॥
अत्रान्तरे तत्र ऋषी कुतश्चि-
त्समागतौ द्वौ निषिषेधतुस्तौ।
बालौ प्रवेष्टुं सरसि प्रमाथि-
न्यनिष्टसम्भावनया प्रणुन्नौ ॥100॥
स्वे अङ्गवस्त्रे क्रमशः सरोऽम्भ-
स्युभौ ऋषी चिक्षिपतुः क्रमेण।
क्षणाच्च ते संज्वलिते अदृश्ये
बभूवतुश्चेत्यतिचित्रमासीत् ॥101॥
मायासरस्यां प्रविलोक्य दृश्यं
रोमारुञ्चकार्येतदतीव भीतौ।
नहि प्रवेष्टुं मन आदधीतां
द्वयोस्तयोस्ताविति बुद्धिरासीत् ॥102॥
ऋष्योस्तयोस्ताववमत्य विश्वा-
मित्रस्य वाक्यं च[1] प्रविष्टवन्तौ।
तस्यां सरस्यां तत उत्थितौ च
क्षणेन तावद्युवतामवाप्तौ ॥103॥
किरीटिनौ कुण्डलिनौ सुवेशौ
स्वं स्वं च वर्णं प्रविधारयन्तौ।

---

1. द्वे प्रे वा इत्याश्रित्य प्रयोगः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हरीतिमा सम्प्रबभूव रामे
सुवर्णवर्णोऽथ च लक्ष्मणोऽभूत् ॥104॥
कथानकं चापरमत्र देशे
नूत्नं समालक्ष्यत एवमेव।
मनोविनोदाय सुधीजनानां
भवेत्तदप्यत्र न संशयोऽस्ति ॥105॥
स्वयंवरार्थं जनकः सुताया
निमन्त्रयामास नृपाननेकान्।
तस्मिन्प्रसङ्गे भृगुनन्दनेऽपि
सम्प्रापयामास निमन्त्रणं सः ॥106॥
देशस्य कस्यापि बभूव राजा
रामः प्रतापी भुवि जामदग्न्यः।
ऋषिर्नहीति प्रतिकूलरूपा-
ऽऽस्ते ब्रह्मदेशीयकथा विचित्रा ॥107॥
सम्प्रेषितं भूमिपतौ बभूव
निमन्त्रणं स्वं मिथिलाधिपेन।
यदा तदाऽयं क्वचिदद्रिशृङ्गे
चर्तुं तपो ऽभूत्समभिप्रवृत्तः ॥108॥
निमन्त्रणार्थं प्रहिते स्वपत्रे
सीताकृतिं तज्जनकोऽङ्कयद् या।
अशोभयत्पत्रमवर्णयच्च
सीतास्वरूपं परिणेतुमिच्छून् ॥109॥
आसाद्य पत्रं जनकेन सृष्टं
रामस्तपस्वी किल जामदग्न्यः।
साक्षात् तपोविघ्नमिवाकलय्य
दूरीचकारैतदनादरेण ॥110॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तद्वायुवेगेन हृतं तदा सल्-
लङ्कापुरीं नीतमभूज्जवेन।
विधेर्वशात्तत्पतितं च हस्ते
तच्छासितू रावणनामकस्य ||111||

आलोक्य सीताकृतिमेष लुब्धः
स्वयंवरार्थं समभिप्रतस्थे।
कालेन रम्यां मिथिलाभिधा
स राजधानीं जनकस्य चाप ||112||

आप्त्वा च तां चापलसम्प्रणुन्नः
स रुद्रचापोद्धरणे प्रवृत्तः।
उत्थापने तस्य बंभूव शक्तो
ज्यारोपणे नैव तु यत्नतोऽपि ||113||

उत्थापयन्तं प्रविलोक्य चापं
विदेहपुत्रीं भयमाविवेश।
दुष्टस्य हस्ते खलु मा स्म पप्तं
दुःखाय मे तत्सुतरां भवेन्नु ||114||

शङ्काग्रहग्राहनिपीड्यमाना
मृद्वी प्रकृत्या विमनायिताऽभूत्।
नेत्रे कराभ्यां पिदधे च तन्वी
सा सान्त्व्यमानांऽपि सखीजनेन ||115||

जाते दशास्ये विफलप्रयत्ने
चापं सुमित्रातनयोऽजिघृक्षत्।
उत्थापने चास्य बभूव शक्तो
ज्यारोपणे नैव तु यत्नतोऽपि ||116||

ततोऽनु रामो ननु हेलयैव
धनुस्तदुत्थाप्य चकार सज्यम्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विदेहपुत्र्या भृशमाश्वसत्या
स्मेरास्यया सस्पृहमीक्ष्यमाणः ॥117॥

रामस्य सुग्रीवकपेरकस्मात्
समागमं चापि विचित्ररूपम्।
सन्धिं प्रियं वर्णयति द्वयोश्च
म्यांमाररामायणमन्यथैव ॥118॥

आहिण्डमानो विपिनान्तरेषु
विदेहजान्वेषणसम्प्रयुक्तः।
कस्मिंश्चिदह्नि श्रमकर्शितः सन्
निद्रावशं दाशरथिर्जगाम ॥119॥

शीर्षोपधानं किल तस्य तत्र
बभौ सुमित्रातनयाङ्क एव।
निद्रावशं यातवतोऽग्रजस्य
सर्वात्मनाऽसौ कुशलं निदध्यौ ॥120॥

अत्रान्तरे तत्र समापपात
घोरा कुतश्चिद्वनमक्षिका हा।
या पृष्ठमांसं प्रविदार्य सद्यः
पपौ सुमित्रातनयस्य रक्तम् ॥121॥

पीडामसह्यामनुभूतवान-
प्येषोऽतिधीरो विचचाल नैव।
न विव्यथे वा न च वा चकम्पे
सर्वं तदाश्चर्यकरं बभूव ॥122॥

तद्वृश्चमालोक्य विचित्ररूपं
न दृष्टपूर्वं क्वचनापि लोके।
स्वराजधान्या अपसारितः सन्
भ्रात्रा भृशं क्रोधवशं गतेन ॥123॥

तस्यैव शाखामधिरुह्य तिष्ठन्

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वृक्षस्य यस्यास्त तले शयानः।
सीतापतिर्वानरयूथमुख्यो
सुग्रीवराजो व्यचिचिन्तदित्थम् ॥124॥
अहो! अधन्यः सुतरामहं भो!
भ्राताऽपि ये द्रुह्यति मह्यमेव।
भ्राता त्विह भ्रातरमात्मनोऽपि
प्राणैः परित्रातुमभिप्रवृत्तः ॥125॥
एवं तदा चिन्तयतोऽस्य तत्र
स्थूलाश्रुबिन्दुप्रकरः पपात।
विनिद्रितो येन ककुत्स्थवंश्यः
शाखाधिरूढं कपिमालुलोके ॥126॥
अदृष्टपूर्वं प्रविलोक्य तं प्रा-
गनिष्टरूपं प्रवितर्कयन् सः।
स्वं कार्मुकं हस्तगतं चकार
तं वानरं दण्डयितुं महात्मा ॥127॥
आलोक्य तत्तत्क्षणमेव भीतः
शाखामृगः पादपमूलमेत्य।
आमूलचूलं प्रविकम्पमानो
रामस्य यातः किल पादमूलम् ॥128॥
बद्धाञ्जलिः स प्रणनाम वाक्यै-
स्तुष्टाव तं सान्त्वपरैस्तथा च।
निवेदयामास च कृत्स्नवृत्तं
रोषं तदीयं परिहर्तुकामः ॥129॥
भ्रात्रोर्निरीक्ष्य प्रकटां प्रगाढां
परस्परस्नेहपरम्परां वाम्।
भ्रात्रा मदीयेन ममावमानं

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कृतं समालोच्य च मेऽन्तरङ्गम् ॥130॥

दुःखातिभाराद् द्रवितं तथाऽभूद् यथाऽश्रुबिन्दुप्रकरोऽपतन्मे।
नान्योऽत्र हेतुः परिकल्पनीय-श्चित्तद्रवान्मे सुतरामसह्यात् ॥131॥

सुग्रीव एवं निजवृत्तजातं
तस्मै यथावत्समुदाजहार।
भ्राताऽस्य वाली कृतवान् पुरा यत्
तस्मिन्, स्वदेशाच्च बहिश्चकार ॥132॥

आकर्ण्य गाथां करुणां महात्मा सीताधिनाथः करुणार्द्रचेताः।
आश्वासयत्सान्त्वपरैर्वचोभिः साह्यं च तं प्रत्यशृणोत्प्रवीरः133

तथैव तं प्रत्यशृणोत् स्वसाह्यं विदेहजान्वेषणकर्मणि द्राक्।
सुग्रीवनामा कपियूथमुख्यः सन्धिस्तयोरेवमभूदभीष्टः ॥134॥

(वसन्ततिलकावृत्तम्)

रामायणस्य विविधा रुचिराः प्रसङ्गा
देशान्तरेष्वनुभवं सुधियां प्रयान्तु।
एतद्धियाऽऽकलनमत्र निदर्शनाय
केषाञ्चिदेव कृतमस्ति समासबुद्ध्या ॥135॥

नद्यो यथा विविधदिग्भ्य उपस्रवन्ति
वारानिधिं च सलिलेन समेधयन्ति।
देशान्तरेषु विततानि कथानकानि
पुष्णन्ति रामचरितं महितं तथैव ॥136॥

रामायणं विविधदेशनिवासिलोका
आत्मीयमित्यनुभवन्ति तदेकचित्ताः।
किं स्यात्ततः प्रियतरं जगतीतले यद्
रामाभिरामचरिते रमते जनौघः ॥137॥

डॉ. रमाकान्तशुक्लमहाभागाः
देववाणी-परिषन्महासचिवाः
'अर्वाचीनसंस्कृतं' - सम्पादकाश्च
6, वाणीविहारः, नवदिल्ली 110059

स्नेहाधीनः
सत्यव्रतशास्त्री

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कालिदासः शिरोमणिः

प्रो0 ताराशंकर शर्मा

वाणीविलासंसारे प्रदीप्तकवितारके।
चन्द्र इव यशो लेभे कालिदासः महाकविः।।1।।
कवयो बहवस्तत्र कालिदासो शिरोमणिः।
शरीरेऽवयवा नाना मूर्धा यथा हि शोभते।।2।
कविताकामिनीकान्तः सौन्दर्यसमुपासकः।
सर्वार्थान् दर्शयामास तल्लावण्यप्रसाधने।।3।
कालिदासस्य काव्येषु सदोपमार्थगौरवम्।
सत्पदानाञ्च लालित्यं त्रिवेणीसंगमो यथा।।4।
सिद्धहस्तप्रयोगेषु सर्वश्लाघ्या मनोहरा।
उपमायाः परा शोभा बाहुल्येन विलोक्यते।।5।
उपमायां प्रवीणेन रचितं काव्यसप्तकम्।
अनुपमं परं सर्वैः समाख्यातं मुहुर्मुहुः।।6।
साहित्यजगदाकाशे काव्यसप्तकभासनम्।
तथैवास्ति मनोहारि सप्तर्षिमण्डलं यथा।।7।
रघुवंशं [illegible] कुमार[illegible]।।8।
ऋतुसंहारमप्येतत् [illegible]त्यैव चमत्कृतम्।
रूपकद्वयमप्यस्ति कविताकामिनी[illegible]नम्।।9।।
सारस्वतं स्वादु सुधाभिषिक्तं सत्सूक्तिसाहित्यसमुद्रसारम्।
संगृह्य काव्यं कविकालिदासः कृते कृतीनां कलशीकरोति।।10।।
नवरसपरिपूर्णं शब्दवाच्यप्रतीतं
स्वकृतिषु कमनीयं काव्यकेलिप्रकर्षम्।
ध्वनयति सकलं यो भारतीभासमानः
कविकुलगुरुवर्य्यः कालिदासो गुरुर्मे।।11।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दोहादशकम् (ग्रीष्मवर्णना)

प्रो. परमानन्दः शास्त्री

श्वशुरालये यथा वधूर्यौतकलोभिजनेन
जगती तथैव तापिता खरकरेण तपनेन। 1.
स्वच्छदाचरणं यथा दुर्विनीतधर्मस्य
अत्याचारो वर्धते जगति तथा धर्मस्य। 2.
पदगञ्चारं सर्वथा यज्जनस्य जहर्ति
मध्याह्नोऽपि निर्जीयमिव मौनं भृशं बिभर्ति। 3.
शुष्यति कूपसरोमुखं रिक्तो नलो जलेन
अनिलोऽप्यनलो जायते घर्मसर्गबलेन। 4.
अत्रिदृगो ज्योती रविर्गगने तथा चकास्ति
त्रिदशेन्द्रोऽपि सहस्रदृग् द्रष्टुं शक्तो नास्ति। 5.
भवति वासरो वृश्चिको यामोरगीव भाति
दष्टः संसारस्तथा नोच्छ्वासोऽप्यायाति। 6.
दत्तकपाटा वसतयः रथ्याः शून्या भान्ति
आतङ्की ग्रीष्मो भ्रमति नरा न बहिरायन्ति। 7.
आत्मनीव विष्टं भिया ग्लानिमरण्यमुपेति
किं निदाघवातोऽथवा दावानलोऽयमेति। 8.
छिद्रेषु प्रसभं विशति पत्रदलान्न बिभेति
आक्राम्यन्निव तरुलते च्छायामातप एति। 9.
शिरसि मरीचिस्रक् कृता गले पिपासा दाम
वध्यस्थली भूः प्राणिनां वधिको ग्रीष्मो नाम। 10.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दाडिममेकं शतं रोगिणः

डॉ. परमानन्दः शास्त्री,

कुर्स्येका बहवोऽभिलाषिणः, दाडिममेकं शतं रोगिणः।
सर्वेऽप्येते बहूद्योगिनः, नैको योगी, समे भोगिनः।
(कुष्ठे कण्डूरियं कोटिशो जना अंशदाडिमनियोगिनः)
मह्यं दत्त, दत्त रे मह्यं वोऽहं रक्षिष्यामि।
बर्बरी मस्जिदमपि, भूयो यदि दाडिममाप्स्यामि।
युष्माकं कारणान्मुखबलं पतितो रोगी जातः।
रक्षत रक्षत, दत्त दाडिमं मताधिकारेणातः।
बहुसंख्यका अल्पिता भेदाद्बहुता वस्तुप्रतिष्ठा?
म्रिये दाडिमाभावात्किमहं विफला किं मे निष्ठा?
भवत्कृपातो हरिष्यतेऽयमस्थिरताया दोषः
स्थायिसर्वकारोऽस्ति पुनर्मे निर्वाचनोद्घोषः।
भवदनुसारं न्ययालयनिर्णयोऽपि मया विधूतः
पुनरप्यन्य एव युष्माभिः सिहासन आहूतः।
मम हृदि सर्पो लुठति क्षम्यताम्, मम पक्षे निजमतं पात्यताम्,
शपथं कुर्वे श्रुती स्पृशामि यत्कथयिष्यथ तदाचरामि।
अपेक्षितादधिकं दास्यामि भवदञ्चलं नैव हास्यामि।
कुर्स्येका बहवो विरोधिनः, दाडिममेक शतं रोगिणः।
(कुष्ठे कण्डूरियं कोटिशो जना अंशदाडिमनियोगिनः),
अपरोऽभ्यधाद्, वाक्दूकोऽयं दृष्टो मम त्वाचारः।
विहितं सर्वकारबलिदानं भवतां कृत उपचारः।
जयचन्द्रस्य भवामि वंशजो वर्षसपादं ज्ञातः।
शिरसिं नये पञ्चाम्बुजमानं कूटनीतिनिष्णातः।
पिच्छिलवर्गसखो, बोफोर्से छिद्राणां बहुदर्शी

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राजास्म्यहं जन्मना पुङ्गवपण्डितकृतराजर्षिः।
कमण्डलोर्न बिभेमि मनागपि, मण्डलमहिमा ज्ञातः।
आशीर्वदति स शाहीमामः वन्दे सायं प्रातः।
सामाजिकन्यायस्य विक्रयः, केवल 'मत' मूल्येन विनिमयः
उद्देशोऽयं घोषोऽयं मे ऋद्धवोटनिधिपरितोषो मे।
जने पत्रकारे रोषो मे दग्धाश्छात्राः को दोषो मे?
कुर्व्यैका बहवोऽभिलाषिणः, दाडिममेकं शतं रोगिणः।
सर्वे दृष्टा महोद्योगिनः यती न कश्चित् समे भोगिनः।
(कुष्ठे कण्डूरियं कोटिशो जना एकदाडिमनियोगिनः)
'भारतमाता ग्रामवासिनी' पश्यत वक्ति तृतीयः।
लुंण्टाकी नागरिका वृत्तिर्ग्राम्यगुणस्त्ववनीयः।
पञ्चतारकावसथेष्वर्ध गुल्कं धोतीवन्तः,
बेंकर्णानाम[1] परावृत्तिः प्रत्यर्पयिता मत्तः।
ग्रामेष्वस्तु नगरसौविध्यं यद् यद् दृश्यं प्रायः।
योग्यपितुर्योग्यस्य सुतस्य च 'डिज्नीलेण्ड' उपायः।
विधुशेखरस्य देवी वाञ्छत्यर्धाङ्गादप्यधिकम्
निर्वचनीयमियद् दाम्पत्यं जातं नैर्वाचनिकम्।
मण्डलनिन्दा कमण्डलुगर्हा, 'हम अजगरा'[2] एकत्र मतार्हाः।
अखण्डताया अधरे रागः हृदये क्षेत्रजातिसंभागः,
शक्तिर्यस्य महिष्यपि तस्य जयो 'महम'[3] रचनाशक्तस्य।
कुर्व्यैका नैके स्पर्धिनः दाडिममेकं शतं रोगिणः।

1- बेंक + ऋणानाम्, अपरावृत्तिः = परावर्तनस्याभावः, अपरा आवृत्तिश्च, बैंकाद् भूयोऽपि ऋणं गृहीत्वा न प्रत्यर्पणीयमिति भावः,

2- हरिजन-मुस्लिम-अहीर-जाट-गूजर-राजपूतेति शब्दानामाद्याक्षरं गृहीत्वा निर्मित पदमेतेषां समवायसूचकम्।

3- वार्तापत्रेषु बहुशश्चर्चितं हरियाणाविधानसभाया एकं निर्वाचनक्षेत्रम्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

महाग्रन्थयो महोद्योगिनः कोऽपि न नकुलो महाभोगिनः।
(कुष्ठे कण्डूरियं कोटिशो जना दाडिमस्याभियोजिनः)
कमलशोभिरथरूढस्तुर्यो भारतास्मितारावः।
'एकविधिः समता मानवता तुष्टीकरणाभावः।
अखण्डता देशस्य सुरक्षा हिन्दुगौरवोत्थानम्
नापि मित्रता नापि शत्रुता प्रशासनं निष्पक्षम्,
अवसरमेकं दत्वा लोकः पश्यतु तत् प्रत्यक्षम्'
आह जनं पूर्वाग्रहमधुना त्यक्त्वा कुरूपकारम्।
सर्वेषां तु पौरुषं दृष्टम् इदमस्माकं वारम्।
रामराज्यमस्माभिः कार्यं नहि गन्तव्यं वर्त्मानार्यम्
देशोऽयं यहि हिन्दुस्थानं हिन्दुः किं लभतां नो मानम्।
'संगच्छध्वम्' इत्यपि घोषः हिन्दूनां सन्दर्भे दोषः?
शतं रोगिणो दाडिमेकं पश्यति लोको मूल्योद्रेकम्
दिने दिने सोद्घोषविक्रयः अन्ते कस्य भविष्यति विजयः।
जिघृक्षति कश्चित् करप्रसारं धावति कोऽपि चक्रसञ्चारम्।
हस्तकूटदात्रै[4]रपि कश्चित् कमलदलेनैवेच्छति कश्चित्।
केऽपि समधियः सन्धिं याताः संविभज्य प्राप्तुं निष्क्रान्ताः।
केन पार्श्वेनोष्ट्र उपविशेत् संसदि कः कतिबीजः प्रविशेत्
भरतवाक्यमिदमेव 'कुतश्चिद् रक्तबीज आविशेन्न कश्चित्'
शतं रोगिणो दाडिममेकम् पश्यति लोको मूल्योद्रेकम् ।

4- हथौड़ा इति भाषायाम्, दात्रम्= दाँती दराँती हंसिया इति भाषायाम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रससिद्धान्तस्य अधिवक्ता डॉ. सुन्दरलाल कथूरिया

1 जुलाई 1991 तारिकायां रससिद्धान्तस्य अधिवक्तुः किञ्च अष्टादश ग्रन्थानां प्रणेतुः डॉ. सुन्दरलालकथूरिया-महाभागस्य पञ्चाशद्वर्षपूर्तिमुपलक्ष्य दिल्ल्यामेकोऽभिनन्दनसमारोहः समायोज्यत। अस्मिन्नवसरे तस्य व्यक्तित्वं कर्तृत्वञ्चावलम्ब्य नैकैर्विद्वद्भिः स्व लेखाः प्रस्तुताः। नैकासु साहित्यिकपत्रिकासु तद्विषयिणी सामग्री अपि प्राकाश्यत।

देववाणी - परिषदः कृते डॉ. कथूरियामहाभागः नास्त्यपरिचितः। अस्या नैकासु गोष्ठीषु प्रभविष्णुवक्तृरूपेणायं विदुषां सम्मानभाजनमस्ति। '**रस सिद्धान्त और नाटक**' इति शीर्षकोऽस्य ग्रन्थः परिषदा प्रकाशितः।

नैकैः पुरस्कारैस्सभाजितस्य डॉ. कथूरिया-महाभागस्य यद्यपि विविध-ग्रन्थानां लेखकत्वेन, 'साहित्य-सङ्गम' नाम्न्याः साहित्यिकसंस्थायाः संस्थापकत्वेन, अन्यैस्तैस्तैर्विशेषैः साहित्यिकजगति यशो वर्धते तथापि रससिद्धान्तस्य अधिवक्तृरूपेणायं विशेषतो भासते।

रससिद्धान्तो नाम भारतीयकाव्यशास्त्रस्य सुप्रतिष्ठितः सिद्धान्तः। नन्दिकेश्वर-भरत-प्रवर्तितस्यास्य सिद्धान्तस्य लोल्लट-शंकुक-भट्टनायक-भट्टतोत-अभिनवगुप्त-मम्मट-धनञ्जय -विश्वनाथ-पण्डितराजजगन्नाथ-प्रभृतिभिः संस्कृताचार्यैः विकासः कृतः। हिन्दीभाषायामपि रसचिन्तनं जातम्। आधुनिकयुगे रससिद्धान्तस्याख्यानं पुनराख्यानं मूल्याङ्कनं च कृतवत्सु विद्वत्सु आचार्यरामचन्द्रशुक्ल - डॉ. श्यामसुन्दरदास - डॉ. गुलाबराय - पं. बलदेव उपाध्याय - पं. रामदहिन मिश्र - श्री लक्ष्मी नारायण 'सुधांशु' - डॉ. नगेन्द्र - डॉ. आनन्दप्रकाशदीक्षितप्रभृतयः सन्ति।

डॉ. नगेन्द्रस्य 'रससिद्धान्त'- नामको ग्रन्थो रसविषये प्रभूतां सामग्रीं समीक्ष्य प्रस्तौति। एतदनन्तरं समायाति डॉ. कथूरिया-प्रणीतो 'रससिद्धान्त : आक्षेप और समाधान' नामको ग्रन्थः, यस्य प्रथमं संस्करणं 1972 ईशवीयेऽब्दे द्वितीयं च 1990 तमेशवीयेऽब्दे प्रकाशितं जातम्। अस्मिन् ग्रन्थे पूर्वाचार्यैः, आधुनिकैः प्रगतिवादिभिः प्र...

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रससिद्धान्ते कृतानामाक्षेपाणां सतर्कं समाधानं लेखकेन प्रदत्तम्। क्वचित् पूर्वग्रन्थेषु उपलब्धं समाधानं दत्तम् क्वचिच्च स्वप्रतिभया समाधानं प्रस्तुतम्। सरल - स्पष्ट शब्देषु तेन, समाजशास्त्रीयसमीक्षादृशा, मनोवैज्ञानिकदृशा च प्रगतिवादिभिः प्रयोगवादिभिः अन्यैश्च नव्यैर्लेखकैः रससिद्धान्तं प्रति कृतानामाक्षेपाणां दृढतयोत्तरं ददता स्वमतमित्थं प्रकाशितम् - " 'रससिद्धान्त' के विरुद्ध अद्यावधि जो भी आक्षेप किये गये हैं, वे अकाट्य नहीं हैं और न उनसे रस-सिद्धान्त को किसी प्रकार की क्षति पहुँची है। 'रससिद्धान्त' ही एक ऐसा मौलिक काव्य-सिद्धान्त है, जो सांस्कृतिक और मानवीय भूमिका पर अधिष्ठित होने के साथ अत्यन्त व्यापक, सार्वभौम और सार्वकालीन है। यह सिद्धान्त सर्जनात्मक साहित्य की विभिन्न विधाओं के सम्यक् मूल्यांकन में सक्षम है। साथ ही, इसमें मानवीय और सांस्कृतिक, वैयक्तिक और सामाजिक, भौतिक और आध्यात्मिक तथा नीतिवादी और आनन्दवादी मूल्यों का अद्भुत समाहार भी है।" (रससिद्धान्तः आक्षेप और समाधान, द्वितीय संस्करण पृ. 149) अयं ग्रन्थः विदुषो लेखकस्य स्पष्टदृष्टेर्निदर्शनं, विद्वद्भिर्मननीयश्च विद्यते।

डॉ. कथूरिया महाभागः स्वायुषोऽर्धशतीं सारस्वतसाधनया तेजस्विनीं विदधद्विदुषामभिनन्दनीयोऽस्ति संवृत्तः। अग्रेऽप्यस्य सारस्वत-सपर्या निर्विघ्नं प्रचलतादिति परमेश्वरं प्रार्थयामः।

(- रमाकान्त शुक्लः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषद्वार्ता

1 भाति मे भारतम्-दूरदर्शन --धारावाहिकस्यास्य अन्येषामपि दश भागानां ध्वन्यङ्कनं सम्पन्नम्। रूपाङ्कनपि अधिकांशतः सम्पन्नम्। इदानीं सम्पादननेव प्राधान्येनावशिष्यते। आगासे शीघ्रमेव कार्यक्रमोऽयं निष्पन्नतां गच्छेत्।

संस्कृत-जगद्वार्ता

(1) आगराविश्वविद्यालय-संस्कृतप्रध्यापकपरिषदः वार्षिकाधिवेशनम्-20.4.1991 तारिकायां कासगंजनगरे (उ. प्र.) कोठीवाल आढतिया- कालेजे समायोज्यत यस्याध्यक्ष्यं प्राचार्येण डॉ. सुबोधमिश्रेण, मुख्यातिथित्वं ला. ब. शा. के. सं. विद्यापीठकुलपतिना डॉ. मण्डनमिश्रेण विशिष्टातिथित्वं च देववाणीपरिषन्महासचिवेन डॉ. रमाकान्तशुक्लेन कृतम्। अस्मिन्नवसरे परिषदोऽध्यक्षस्य डॉ. श्रीनिवासमिश्रस्याभिनन्दनमक्रियत। शोधपत्रपाठः काव्यपाठश्चापि आयोज्याताम्। डॉ. चन्द्रशेखरद्विवेदिना संचालनं कृतम्। अधिवेशने पञ्चाशत्प्रायैर्विद्वद्भिः सहभागित्वं निर्व्यूढम्।

(2) जगन्नाथसंस्कृतविश्वविद्यालयेन पुरीनगर्यां 'सामाजिकन्यायः अस्य च प्राचीनभारतीयाधारभूमिः' इति विषयमवलम्ब्यैका राष्ट्रियचर्चासंगोष्ठी 5-7.6 .1991 तारिकास्वायोजिता। 6.7.91 तारिकायां प्रार्थनाभवने कविसंगोष्ठी जाता यस्या आध्यक्ष्यं श्रीश्रीसुन्दरराजेन, सम्मान्यातिथित्वं डॉ. रामकरणशर्मणा, सञ्चालनं श्री सदानन्ददीक्षितेन, उद्घाटनं च डॉ. भास्कराचार्यत्रिपाठिना कृतम्! डॉ. राजेन्द्र मिश्र-डॉ. रमाकान्त शुक्ल-डॉ. व्रजकिशोर नायक- डॉ. सूर्यमणि रथ-डॉ. हरेकृष्ण शतपथी-प्रकृतिभिः स्वरचनाः प्रस्तुताः। संगोष्ठी-निर्देष्टा डॉ. केशवचन्द्रदाशः स्वकाव्येन माल्यार्पणेन च कवीनामभिनन्दनमकरोत्।

(3.) मध्यप्रदेश संस्कृत अकादेमी जगदलपुरे 24-25 तारिकयोः 'वाक् संगोष्ठीं' समायोजितवती यत्र विद्वद्भिः हलबी-भतरी-संस्कृतभाषाणामन्तःसम्बन्धमधिकृत्य विचारः कृतः। आकांक्षाहोटलस्य सभागृहे आयोजितायाः अस्या गोष्ठ्या उद्घाटनं जिलासत्रन्यायाधीशेन श्री एस. एल. गुप्तेन कृतम्! पं. सुन्दरलालत्रिपाठिना मुख्यातिथित्वं निर्व्यूढम्। शोधपत्रवाचनगोष्ठ्या आध्यक्ष्यं डॉ. रमाकान्तशुक्लेन कृतम् यत्र श्रीशीतांशुरथ-कु0 योगिता त्रिपाठी-डॉ. इलाघोष- श्री अशोक वक्त- श्री जोगेन्द्रमहापात्र 'जोगि'- डॉ. रामकुमार बेहर- पं. सुन्दलाल त्रिपाठिभिः शोधपत्राणि प्रस्तुतानि।

अकादम्या सहयोगेन 26.6.91 तारिकायां रायपुरे दूधाधारी श्रीवैष्णवमठे तथा च 27.6.91 तारिकायां बिलासपुरे श्रीनिवाससंस्कृतविद्यालये संस्कृत-कविगोष्ठ्यावायोजिते अभूताम् यत्र डॉ. भास्कराचार्य त्रिपाठी- डॉ. पुष्पा दीक्षित-डॉ. रमाकान्तशुक्लादिभिः काव्यपाठः कृतः। रायपुरे मुख्यातिथिना रायपुर-पुलिसाधीक्षकेण श्रीआनन्दकुमारेण संस्कृतस्य वैशिष्ट्यं प्रतिपादयता कविगोष्ठ्या उद्घाटनं कृतम्। कविगोष्ठ्या आयोजकैः राजेश्रीमहन्तवैष्णवदासमहाभागैः संस्कृतकवीनां श्रीफलोत्तरीय-समर्पणेनाभिनन्दनं कृतं तथा च संस्कृत-विश्वविद्यालयस्थापनार्थं सर्वसम्भवः सहयोगः प्रतिज्ञापितः। शासकीय

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृतमहाविद्यालयप्राचार्येण डॉ. कृष्णदत्तसारस्वतेन गोष्ठी सञ्चालिता।

25.6.1991 तारिकायाम् अम्बिकापुरे रामगिरि (रामगढ़) पर्वतस्य प्राचीन नाट्यशालायाम् 'आषाढस्य प्रथमदिवसे'-आयोजनं जातम्। अस्मिन्नवसरे वृक्षारोपणम्, काव्यपाठः अन्ये च सांस्कृतिकाः कार्यक्रमा आयोजन्त। गौरवमण्डितस्यायोजनस्य कतिपयैः शब्दैः प्रकाशनमसम्भावि।

(4.) **दिल्ली संस्कृत अकादमी** 14.6.1991 तारिकायां ग्रन्थत्रयस्य लोकार्पणमनुष्ठितवती यत्र दिल्लीप्रशासनशिक्षायुक्तेन श्रीनरेन्द्रप्रसादेन श्रीश्यामविमलस्य 'व्यामोहः', डॉ. क्षेमचन्द्रस्य 'एकांकिनाटकद्वयम्' श्रीब्रह्मदेव शास्त्रिणश्च 'सावित्री' लोकायार्प्यन्त। समारोहस्याध्यक्ष्यं श्री के. पी. ए. मेननेन सञ्चालनं च अकादमीसचिवेन कविरत्न श्रीकृष्णसेमवालेन कृतम्।

अकादम्या 'संस्कृत-मञ्जरी' नाम्नी त्रैमासिका पत्रिकापि प्रवर्तिता यस्या लोकार्पणं दिल्ल्या उपराज्यपालेन श्रीमार्कण्डेयसिंहेन राजनिवासे 25.6.1991 तारिकायां कृतम्। अस्मिन्नवसरे डॉ. सत्यव्रतशास्त्रि-श्री के. पी. ए. मेनन- डॉ. पुष्पेन्द्र कुमार शर्म- डॉ. श्रीधरवासिष्ठैरभिभाषितम्। लोकार्पणस्याध्यक्ष्यं दिल्लीप्रशासनवित्तायुक्तेन श्रीसेवारामशर्मणा कृतम्। पत्रिकासम्पादकेन किञ्च अकादेमीसचिवेन कविरत्नश्रीकृष्णसेमवालेन सञ्चालनं कृतम्।

(आनन्दवर्धनः)

मानवता

डॉ. जीत सिंहः 'खोखरः

मानवता कुत्र गता, उत्पतिता रजः इव।
नहि भ्रातः न कुत्रापि, खलु मानवता गता ॥१॥
चण्डीगढ़-महामार्गे, मानवता मया दृष्टा।
सुरागः चालकस्तत्र, गर्ते अपातयत् बसम् ॥२॥
न केवलं बसं किन्तु, नरोऽपि तेन आहतः।
अवरुद्धं गतागतम्, यान-सुपंक्तयः जाताः ॥३॥
अधो गत्वा स्वयानेभ्यः, पथिका अपि समागताः।
कुर्वन्तिस्म हि चीत्कारं, उत्थापयंत त्वरा नरम् ॥४॥
चीत्कारे शक्तिरेवासीत्, अग्रे आयाति कोऽपि न।
महामार्गे मया दृष्टा, 'उक्ति'-मानवता एषा ॥५॥
नो नो मानवता मृता, साम्प्रतमपि भारते।
सुमहत्-जनसंमर्दे, समये च महाघोषे ॥६॥
नलदशकटी तत्र, सहसा हि समागता।
नलकेनाहतः दृष्टः, पारं कृत्वा हि संकुलम् ॥७॥
आहतं नरमुत्थाप्य, स्थापयित्वा स्ववाहने।
शाकटिकेन जीर्णेन, मानवता सुरक्षिता ॥८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

डॉ. हरिदत्त शर्मा
संस्कृत-विभागः,
इलाहाबाद विश्वविद्यालयः,
इलाहाबाद

१००, एलनगंज
इलाहाबाद- २११००२
दिनाङ्क-५ जून, १९९१

मान्या मित्रवर्या रमाकान्तशुक्लमहोदयाः !

सामोदं समधिगतं देववाणी-परिषद्-दिल्ली-समुपायनीभूतम् अर्वाचीनसंस्कृतस्य त्रयोदशवर्षीय-प्रथम-द्वितीयरूपम् अङ्कद्वयम्। अर्वाचीन-संस्कृतपत्रिका अद्यैव जूनमासस्य पञ्चमतारिकायां द्वादशवर्षीया जाता, कैशोर्यावस्थायां विद्यमाना सा अपूर्वां काञ्चित् कमनीयतां वहति। प्रथमेऽङ्के १९९० खिष्टाब्दं यावत् प्रकाशितानां लेखानां रचनानाञ्च सूचिकां प्रकाश्य सिंहावलोकनकलया परमोपयोगि कार्यं कृतं भवद्भिः, येन आधुनिक-संस्कृत-साहित्यं विषयीकृत्य अध्ययन-लेखनानुसन्धानपरा परमलाभान्विता भविष्यन्ति। 'केचित् काव्यानुवादाः' इति शीर्षकेण प्रकाशितो भवन्निबन्धोऽपि हिन्दीभाषातः संस्कृतरूपान्तरीकरणस्य नैपुण्यं दर्शयति। पुनस्तत्रैव रवीन्द्रनाथठाकुरकृतपद्यस्य अनुवादोऽपि प्रकाशितः। कैलाशनाथद्विवेदिविरचितं 'शाकुन्तलीयम्' रमणीयम्, वीरेन्द्रकुमार- झाकृतं पद्यजातम् उद्बोधनपरम्, बाबूरामशर्मकृतं हास्य-व्यङ्ग्यपरं रचनाद्वयं चाह्लादजनकम्।

द्वितीयाङ्के तु आरम्भे इच्छारामद्विवेदस्य सामयिकी रचना निर्वाचन-नाट्य-नायकीभूतानां नेतृणां यथार्थं चरित्रोद्घाटनं करोति। रामप्रकाशवर्णिविरचिता कविता भारतस्य साम्प्रतिकीं दुर्दशाम् उद्घाटयति, ओम्प्रकाशठाकुरस्य च रचना राष्ट्रीय-सौहार्द-सङ्घटनाय प्रेरयति। उमाकान्तशुक्लमहोदयाः प्रायेण प्रतिवर्षं लालित्यललितैः पद्यैः सहृज्जनेभ्यः दीपावली-शुभेच्छां प्रेषयन्ति, तस्यैव मनोरमं रूपमस्मिन्नङ्के दर्शितम् । शैलेन्द्रनाथपाठकस्य रचनानां विषयवैविध्यं प्रशस्यम्। प्रयागीयाणां सम्प्रति शिमलास्थ-हिमाचलप्रदेश-विश्वविद्यालयस्य संस्कृत- विभागे आचार्याध्यक्षपदमलङ्कुर्वाणानाम् अभिराजराजेन्द्रमिश्राणां पुनरेका हृद्यभावसङ्कुला गलज्जलिका वल्गुभावं पाययित्वा आकण्ठं परितृप्तानस्मादृशान् सहृदयान् कृतवती, द्वितीया अधिक्षेपमयी रचना मनः आन्दोलितवती, तृतीया हास्यपरा च हृदयं हर्षितवती। पुनः भवत्कृता धिक्कृतिपरा 'किं जीवनं ते' इति कविता नैकान् जनान् नैकाः स्थितीश्च प्रदर्श्य सफलतया जीवनस्य व्यर्थतां प्रकाशितवती। भवत्प्रकाशिता वार्ताऽपि पाठकेभ्यः प्रभूताः संस्कृतविषयिणीः सूचनाः प्रददाति। महती संस्कृतसेवा साध्यते भवद्भिरर्वाचीनसंस्कृतपत्रिकाप्रकाशनेन। अतोऽस्याः कैशोर्यकालं सम्यगतिवाह्य नवयौवन-पथपुरःसरतामभिलषामीति शम्।

भावत्कः
हरिदत्त शर्मा

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लेखक-संकेताः- 1. डा. हरिदत्त शर्मा, प्रवक्ता, संस्कृत-विभागः, इलाहाबाद विश्वविद्यालयः, आवासः-100 एलनगंज, इलाहाबादः-211002, 2. डा. रमाकान्त शुक्लः, आवासः- आर 6, वाणी-विहारः, नयी दिल्ली-110059, 3. डा. कृष्णकान्त शुक्लः, संस्कृत-विभागाध्यक्षः, बरेली कालेजः, बरेली 243005. आवास -1,2 ए, बी.डी.ए. कालोनी, पीलीभीत रोड, बरेली, 4. डा. राजेन्द्र मिश्रः, आचार्यः अध्यक्षश्च, संस्कृत-विभागः, हिमाचल प्रदेश विश्वविद्यालयः, शिमला, ५. डा. [illegible] शास्त्री, आचार्यः, संस्कृत-विभागः, दिल्ली विश्वविद्यालयः, दिल्ली 110007, स्थायी आवासः- 'सुरभिः' 3/54 रूपनगर, दिल्ली-110007 प्रवास-संकेतः (रचनाकाले) 82, Soi 1, Sukhumvit, BANGKOK 10110, [illegible] प्रो. परमानन्द शास्त्री, [illegible]-सदनम् मन्दिरमार्गः, अलीगढम् (उ. प्र.), ७. श्री ताराशंकर शर्मा, आचार्योऽध्यक्षश्च साहित्य-विभागः, राजकीय संस्कृत कालेजः, उदयपुरम्-313001 ८. डॉ. प्रकाश पाण्डे, आवास: [illegible] वर्धा रोड नागपुरम्। ९. डा. [illegible] ज्ञातसिंह [illegible]:-राजकीय संस्कृत महाविद्यालयः नाभा (पंजाब) आवासः- 560 निकट धोबीघाट नाभा-147201, १०. आनन्दवर्धन शुक्लः, आर 6, वाणी-विहारः, नयी दिल्ली-110059

'देववाणी-परिषद्, दिल्ली'-कृते डॉ. रमाकान्त शुक्लेन, देववाणी प्रिन्टर्स, उत्तम नगर, नयी दिल्ली- ११००५९ इति मुद्रणालये मुद्रापयित्वा, ६, वाणी-विहारः, नयी दिल्ली-११००५९ तः प्रकाशितम् अर्वाचीनसंस्कृतम् (१३/३) प्रकाशन-तिथिः १५.१०.१९९१ प्रधान सम्पादकः डॉ. रमाकान्त शुक्लः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	—	२०००-००	प्रतिपृष्ठम्
अन्यपृष्ठानाम्	—	१०००-००	प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	—	५००-००	

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं 'अर्वाचीनसंस्कृतम्' (Arvacheenasanskritam/*Arvācīnasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)।

'देववाणी-परिषद्, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१३/३)-प्रधानसम्पादकः डा रमाकान्त शुक्लः। प्रकाशनतिथिः १५.७.१९९१।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० ५०.००
२.	श्रीनेहरूवृत्तम् (आचार्य रमेशचन्द्र शुक्लः)	रु० १५.००
३.	श्रीपादसप्ततिः(श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ५०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० १८.००
१४.	संस्कृतसाहित्य में राष्ट्रिय भावना(डा०हरिनारायणदीक्षित)	रु० १५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्रः)	रु० १५.००
१६.	गान्धिसूक्तिसप्तशती (,, ,,)	रु० १५.००
१७.	सुगमरामायणम् (डा० रमेशचन्द्र शुक्लः)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	सूक्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	पुरश्चिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नाट्यसप्तकम् (,, ,,)	रु० ६०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः)	रु० १२.००
२९	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० १०.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३३.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
३४.	ऋतम (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

त्रयोदशवर्षे चतुर्थोऽङ्कः

१५ अक्टूबर:, १९९१

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११००५९

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कल की दुनिया
बापू की दृष्टि में



"कल की दुनिया अहिंसा पर आधारित होगी, होनी भी चाहिए। यह बुनियादी नियम है। बाकी सब कुछ अपने आप होता चला जायेगा।

व्यक्ति, समूह और राष्ट्र सब को अहिंसा और प्रेम का मार्ग ही अपनाना पडेगा।

यदि ऐसा हुआ तो आने वाले कल की दुनिया में न गरीबी होगी, न युद्ध होंगे, न उलट-फेर होंगे, न ही रक्तपात होगा।"

प्रगति के पथ पर – शांति के साथ

davp 91/387

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

परामर्शदातृ-मण्डलम्

१. आचार्य डा. रमेशचन्द्र शुक्लः
२. आचार्य श्री श्रीनिवास रथः
३. डा. कृष्णकान्त शुक्लः
४. डा. राजेन्द्र मिश्रः
५. डा. उमाकान्त शुक्लः
६. डा. विष्णुकान्त शुक्लः

अर्वाचीनसंस्कृतम् (१३/४)

(R.N. 34554/79)

(१५ अक्टूबर १९९१ई)

विषय-सूची

	विषयः	लेखकः	पृष्ठांकः
१.	सम्पादकीयम्	सम्पादकः	२
२.	धन्वन्तरिं तमीडे	डा. रमाकान्त शुक्लः	३
३.	हनूमत्पञ्चाशत्कर्त्रे शुभाशीर्वादः	पुष्पगिरिजगद्गुरुशङ्कराचार्याः	४
४.	Foreword	न्यायमूर्तिश्रीरङ्गनाथमिश्रः	५
५.	आमुखम्	श्री श्रीसुन्दरराजः	७
६.	श्रीहनूमत्पञ्चाशत्	श्री श्रीसुन्दरराजः	११
७.	शरणागति-षोडशी	श्री श्रीसुन्दरराजः	२९
८.	अकालमृत्युः	डॉ0 इला घोष	३५
९.	क्षणिकाः	आचार्यगणपतिशुक्लः	३६
१०.	देववाणी-परिषद्वार्ता	आनन्दवर्धनः	३७
११.	संस्कृत-जगद्वार्ता	रमाशुक्ला	३७
१२.	लेखक-संकेताः		३८

अर्वाचीनसंस्कृतम् (पंजी. सं. ३४५५४/७९)

१. प्रकाशनस्थानम्-नयी दिल्ली।

२. प्रकाशनकालावधिः-त्रैमासिकम्।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च डॉ. रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९।

डा. रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

डॉ. रमाकान्त शुक्लः
प्रकाशकः, सम्पादकः

१५.१०.१९९१

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य त्रयोदशवर्षीये स्तुतिप्रधानेऽस्मिंश्चतुर्थेऽङ्के सर्वप्रथमं **'धन्वंतरिं तमीडे'** इति शीर्षका रचना प्रकाश्यते। इयं रचनां मया नेपालदेशे काठमाण्डूनगरे १३-१५.९.१९९१ तारिकासु आयोजितस्य 'द्वितीय अन्तरराष्ट्रीयायुर्वेद-सम्मेलनस्य' उद्घाटनाधिवेशने सर्वप्रथमं पठितासीत्। अन्तरराष्ट्रीयआयुर्वेद - संस्थानस्याध्यक्षवर्य्यैर्वैद्यराजपण्डितश्रीजगदीशप्रसादशर्मभि--स्तदात्मजैः कविराज-वेदव्रतशर्मभिश्चाहं काञ्चिद् धन्वन्तरिस्तुतिं तत्र पठनार्थमाज्ञप्तः। मया ८.९.१९९१ तारिकायामियं रचना प्रणीय तत्सकाशे प्रेषिता। तैश्च द्रागेव सम्मेलनस्य स्मारिकायामपीयं मुद्रापिता ; विश्वस्यायुर्वेदविदां हस्तेषु च प्रापिता। अत्रेयमिति कृत्वा प्रकाश्यते येनापरेषामपि संस्कृतानुरागिणां करकमलेषु प्राप्नुयात्।

इतः परम् उडीसासर्वकारस्य विकासायुक्तैः एम. एस-सी., आइ. ए. एस. इत्युपाधिभूषितैः कविवर्यैः श्रीश्रीसुन्दरराजमहाभागैः प्रणीते **'श्रीहनूमत्पञ्चाशत्'-'शरणागतिषोडशी'**ति रचने प्रकाश्येते। श्रीहनूमत्पञ्चाशतमधीत्य पुष्पगिरिशङ्कराचार्यपादैः कवये स्वाशीर्वादो वितीर्णः भारतीयसर्वोच्चन्यायालयस्य प्रधानन्यायाधीशैः न्यायमूर्तिश्रीरङ्गनाथमिश्रमहाभागैश्च प्राग्वाचिकं लिखितन्। पुनश्च स्तुतिद्वयस्य रचनायाः पूर्वपीठिकाऽपि रचनाकर्त्रा प्रदत्ता। एतत्त्रितयमपि स्तुत्यादौ दीयते।

श्रीहनूमत्पञ्चाशतो वैशिष्ट्यमिदं यदत्र स्रग्धरावृत्तेन अतुलितबलधामा, हेमशैलाभदेहः, दनुजवनकृशानुः, ज्ञानिनामग्रगण्यः, सकलगुणनिधानं, वानराणामधीशः, रघुपतिवरदूतः, वातजातः श्रीहनूमान् सभक्तिभावं स्तूयते। केनापि रोगेणाक्रान्तः कविः एतद्रचनया द्रागेव स्वास्थ्यं लेभे इति तेनाहं स्वमुखेन सूचितः। भगवता श्रीहनूमता रचनायामपि साहाय्यं कृतमिति कवेरनुभवः। अस्य 'प्रूफ' पठने सहायतां कुर्वाणा मद्धर्मपत्नी अपि स्वास्थ्यं लेभे। वस्तुतः भक्तिरसपरीतानां रचनानां कवन-श्रवण-पठन-मननादिभिः प्राणिनां कल्याणं भवत्येव।

'शरणागति-षोडशी' 'श्रीमन्नारायणैदं कृपणमशरणं पाहि मां त्वां प्रपन्नम्' -इति मुकुटालङ्कृता स्तुतिर्वर्तते यत्र प्रतिश्लोकं भगवतः प्रपन्नार्तिहरत्वं गीयते। अत्रापि वृत्तं स्रग्धरा एव रारार्ष्टि।

ये सहृदयाः अनयोः कृत्योरास्वादमनुवादमुखेन काम्यन्ते तेषां कृते आङ्ग्लभाषानुवादोऽपि कविना प्रदत्तः। अग्रिमे मासे धन्वन्तरिजयन्ती हनुमज्जयन्ती च मानयिष्येते; मन्ये उभयावसरे इमा रचना सहृदयानां मोदाय श्रेयसे च सेत्स्यन्ति। श्रीसुन्दरराजमहाभागा अस्माभिर्भूयो भूयो नमस्यन्तेऽभिनन्द्यन्ते च। एतेषां रचनाभिः समृद्धमर्वाचीनसंस्कृतं स्वात्मानं धन्यं मन्यते।

डॉ. इलाघोषकृता 'अकालमृत्युः' आचार्यगणपतिशुक्ल प्रणीता 'क्षणिका' चेति द्वे रचने कारुण्यं चिन्तां च व्यङ्क्तः।

अनेनाङ्केन साकमर्वाचीनसंस्कृतं त्रयोदशवर्षाणि पूरयति। पाठकाः क्वचिज्जातास्त्रुटीः संशोधयितुं सादरमभ्यर्थ्यन्ते।

आर ६ वाणी विहारः
नयी दिल्ली ११००५९
१५.१०.१९९१

विदुषामाश्रवः
रमाकान्त शुक्लः (प्रधानसम्पादकः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

धन्वन्तरिं तमीडे

डॉ. रमाकान्तशुक्लः

(१)

आविर्बभूव योऽब्धेरमृतं घटे दधानः ।
पातुं जनानपथ्याद् धन्वन्तरिं तमीडे ।।

(२)

विष्णुस्वरूप आयुर्वेदस्य योऽस्ति कर्ता ।
भगवन्तमम्बुजाक्षं धन्वन्तरिं तमीडे ।।

(३)

आद्यं शरीरमास्ते धर्मस्य साधनं यत् ।
तद्रक्षितुं दिशति यो धन्वन्तरिं तमीडे ।।

(४)

चरकाय सुश्रुताय प्रथिताय वाग्भटाय ।
यः प्रेरणां प्रदत्ते धन्वन्तरिं तमीडे ।।

(५)

अद्यापि यस्य भक्ता अष्टाङ्गमाचरन्तः ।
स्वस्थं जगद्विदधते धन्वन्तरिं तमीडे ।।

(६)

'सर्वे भवन्तु सुखिनः, सर्वे निरामयाः स्युः'
इति देशना यदीया धन्वन्तरिं तमीडे ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीहनूमत्पञ्चाशत्कर्त्रे

पुष्पगिरि-जगद्गुरुश्रीशङ्कराचार्याणां

शुभाशीर्वादः

श्रीसुन्दरराजः उन्नतप्रभुतायाम् वर्तमानः अपि भगवदनुग्रहेण मातापित्रोराशीर्वादमहिम्ना गुर्वनुग्रहेण च समधिगतामरवाणी परिचितिः उभयश्रीर्विराजते ।

सुन्दरहनुमदुपासकोऽयं विद्याविनीतः सहृदयः सरसकविताश्रीः विराजते । "हनुमत्पंचाशत्" नामकं हनुमत्स्तोत्रं रचयन् अयं सरसकविः अद्य सार्थकनामा संजातः।

अत्र स्तोत्रनायकः सुन्दरः । कविता सुन्दर-रमणीया । कविरपि सुन्दरः । भावोऽपि सुन्दरसुमधुरमधुरः । स्तोत्रस्यास्य पठिती अपि सुन्दरो भवितेति कवेराशयोऽपि सुन्दरतमः ।

सर्वं सुन्दरं सुन्दरतमम् ॥

सुन्दरकाण्डाधिनायकस्य सुन्दरहनूमतः महावीर्याणि स्तोत्रेऽस्मिन् प्रस्तुतानि । यथोचितं वर्णितानि च । तानि न केवलं साहितीमर्यादामेव, अपितु, उपासनासम्प्रदायादिकमपि परिपुष्णन्ति ॥

शब्दार्थालंकारैः अलंकृतमिदम् विलसतु ।

"बुद्धिर्बलं दशो धैर्यं । निर्भयत्वमरोगता ।

अजाड्यम् वाक्पटुत्वं च । हनुमत्स्मरणाद् भवेत् ॥"

इति प्राचीनतममिदं वृद्धानुशासनं स्तोत्रस्यास्य पठनेन सिद्ध्येदित्याशास्महे। शुभं भवतु ।

पुष्पगिरिः

४.६.१९९१

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

RANGANATH MISRA
CHIEF JUSTICE

SUPREME COURT OF INDIA
NEW DELHI

22nd April,1991

FOREWORD

Anjaneya is the emblem of *bhakti* in its fullest grandeur. He tore open his chest to show to the world that the Master's name was engraved within.

Indian mythology is replete with the supernatural deeds of Maruti. In childhood he had once leapt on to the rising sun mistaking him to be a ripe fruit; he ransacked the golden city of Ravana when he was infuriated by his master being disgraced; he lifted the whole mountain when he had been asked to pick up the herb for Lakshman's treatment.

Hanuman is the Indra-in-waiting. He is perhaps the only exception-himself a *dasa* of the Lord-being held in great esteem and veneration and worshipped as a god. Temples to him have been raised in every nook and corner of this country and abroad too.

Ashukavi Sundararajan is known to me for years. My eldest brother who is no more and the author were very friendly and Sanskrit was their bond. I had occasion to see his revered father both in Orissa and at Thanjavur-his abode. The author's father is a great Sanskrit scholar and a poet of eminence. In Sundararajan the element is in-born perhaps in his genes. He does not labour to compose from within thoughts gush out in beautiful verses-like mother Ganges springing out of Gangotri, the Himalayan point of origin.

Hanumat Panchasat is the collection of fifty verses which bring out every aspect of *Pavani*. The métre is a very special one, meant for the bhakta to sing the hymns of praise and ask for the boon.

Hanuman Chalisa has been in large circulation in this country. Perhaps soon the Panchasat will also get into wide circulation. *Bhakti* does not require language for expression but expression helps bhakti to get into convenient form for delievery at the ultimate point.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

The author has several divine experiences which are assuring evidence of he himself being a *bhakta*. May the benefits indicated in the ultimate verses be showered on all those who read, hear and disseminate the praises of Anjaneya !

Sd.

(Ranganath Misra)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अखिलभुवनजन्मस्थेमभङ्गादिलीलस्य भगवतः श्रीमन्नारायणस्य लीलाः देवैरपि दुर्विज्ञेयाः अतिसीमितबोधशक्तयः केवलं मनुष्यभूताः वयं कथं वा ताः अवेतुं शक्नुयाम ? तस्य लीलास्वियमन्यतमा यत् भक्तंमन्येन क्षुद्रकविना निमित्तभूतेन मया स स्वेनानन्यस्य स्वस्मिन्ननन्य-साधारणभक्तिभावभरितस्य पवननन्दनस्य स्तोत्रमिदं स्वस्मै स्वप्रीतये स्वयमेयं कारितवान्।

कथमिदं जातमिति ज्ञातुं भावुकाः अवश्यं कुतुकाः स्युः । द्वित्रवर्षेभ्यः प्राक् केनाप्यपरिच्छिन्नेन रोगेणाक्रम्यमाणोऽहमतीव अस्वस्थोऽभूवम्। बहुधा प्रयतमानैः बहुभिरपि भिषग्भिः न रोगस्य निदानमवगतम्। तेषां चिकित्साऽपि ततः फलप्रदा नाभूत्। वर्धमानरोगव्यथो ऽप्यहं भगवति श्रीमन्नारायणे समर्पितभरः तस्यैव संकल्पेन लोकानां सर्गस्थितिप्रलयाः संभवन्तीति जानानः तत एव मद्रक्षणभरो मद्रक्षणफलमपि तस्यैव धुरो न ममेति दृढमतिः तिष्ठानि।

एकदा कश्चन योगी महापुरुषः परिपक्वमतिः तेजस्वी ज्ञानशीलवयोवृद्धः श्रीसीतालक्ष्मणहनुमत्समेतश्रीरघुनन्दनपरब्रह्मणि न्यस्तात्मा तदनन्यः परमवैष्णवो भुवनेश्वरमागतो मम मित्रस्य कस्यचन सदने कंचित्कालमतिष्ठत। तस्य दर्शनं प्राप्तुं मित्रेण चोदितस्सन् रुग्णोऽप्यहं गतवान् । प्रणिपतनपरोऽहं प्रसादसुमुखेन तेन सृष्टो मार्जितोऽनुगृहीतश्च। क्षीयमाणरोगवेगेन मयाऽप्यनुपदमगवतं यत् भक्तपराधीनः प्रभुः सुविदितमदस्वस्थावस्थः देशिकादेशकांक्षित्वं स्वं प्रकटयन् तस्य महात्मनः प्रार्थनया मम रक्षायै कृतसंकल्पः। अल्पेनैव समयेन कमपि श्रीहनूमद्भक्तं स एव साक्षात् श्रीहनूमन्तमिव मत्सकाशं प्रेषितवान्। स च श्रीमान् आञ्जनेयोपासकः अञ्जसा मां रोगशान्तये श्रीमारुतिपूजादिकमन्वष्ठापयत्। मयाऽपिकालक्रमेण रोगनिवृत्तिः उल्लाघत्वं, यथापूर्वं स्वास्थ्यमपि प्राप्यन्त। परमकारुणिकस्य परब्रह्मणः श्रीमन्नारायणस्य तथा तदादेशवशेन मां परित्रातवतो वायुपुत्रस्य प्रतिपदं अञ्जलिं तथा स्तवनमन्तरेण अन्यत् किं वा प्रत्युपकर्तुं मया शक्येत।

मम पितृपादाः आशुकविसार्वभौमाः विल्लूर श्रीनिवासराघवाचार्यस्वामिनः एकदा मामुक्तवन्तः यत् वत्स! कविः कश्चित् यदा किमपि वृत्तमवलम्ब्य रचितैः पद्यैः भगवन्तं स्तौति तदा वृत्तफलानुसारेण अप्रार्थितेनापि भगवता तस्मै अनुगृह्यते । एतादृशं खलु वृत्तस्य माहात्म्यम्। स्रग्धरावृत्तेन स्तुतौ कृतायां स्तोतुः रोगनिवारणं सेत्स्यतीति।

पुरा कुष्ठरोगपीडितो मयूरकविः स्रग्धरावृत्तविरचितश्लोकशतयुतेन सूर्यशतकाभिधेन स्तोत्रेण भगवन्तं भास्वन्तं संस्तुत्य रोगमुक्तो बभूवेति विदितचरमेव सर्वेषाम्। ''आरोग्यं भास्करादिच्छेत्'' इति वचनं तेन सत्यापितम् । विपत्रस्थाधिदैवाधिपीडानिवारणाय कवितार्किकसिंहाः श्रीनिगमान्तमहादेशिकाः स्रग्धरावृत्ते गरुडपञ्चाशदाख्यां स्तुतिं विरचितवन्त इति विद्वांसो विदन्त्येव। तथा दाक्षिणात्यः परमवैष्णवः श्रीकूरनारायणनामको मुनिः आमयनिवृत्तये [illegible]

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीसुदर्शनस्य स्तुतिमेकां स्रग्धरावृत्ते श्लोकशतेन विरचय्योल्लाघभूतः। तच्च स्तोत्रं श्रीसुदर्शनशतकमिति प्रथितम् । श्रीसुदर्शनशतकस्य सर्वरिपुनाशकत्वे महती शक्तिरस्तीति मम तातपादैः उपपादितम्। एकदा दक्षिणापथे श्रीराजगोपालस्वामिसनाथे विल्लूरनाम्नि अस्मद्ग्रामे यदा मम पितामहपादाः जीविताः आसन् तथा श्रीसुदर्शनशतकपठनेनैकमाश्चर्यमघटतेति तातपादैरुक्तम् । ते तदा बालकभूताः पितामहपादानां सविधे अतिष्ठन्। ग्रामे पितामहपादानां प्रतिपन्थिनः केऽपि तान् विनाशयितुं कमपि तान्त्रिकमाहूय तन्त्रप्रयोगेन अस्मद्गृहोपरि पुरीषवर्षमश्मवर्षञ्च अकारयन्। अकस्मात् पतन्तीं अश्मपुरीषवृष्टिं दृष्ट्वा अनाकुलाः पितामहपादाः पार्श्वस्थितान् पितृपादानूचुः "वत्स ! मा भैषीः। त्वं धीरस्थिरो भूत्वा श्रीसुदर्शनं ध्यायन् श्रीसुदर्शनशतकं पठ। अहमपि ध्याननिष्ठो भवामि। पश्य किं भवतीति।" श्रीसुर्दशनशतकपाठः प्राचलत्। अचिरेणैव वृष्टिरशाम्यत्। स च तान्त्रिको धावन् आगत्य पितामहपादानां पादयोः "त्राहि त्राहि" इति क्रन्दन्नेव पतितः। केन चोदितः किमकरोदिति च सर्वं स्वयमाचख्यौ। एतादृशी खलु शक्तिरपूर्वा श्रीसुदर्शनशतकस्य।

क्षुद्रस्य जन्तोः मम. कृते रोगनिवारणाय महती खलु कृपा दर्शिता भगवता तदादेशवशंवदेन पवनतनयेन च। केवलमात्मसमर्पणं विना किं प्रत्युपकर्तुं वा उपहारयितुं वा शक्यते। इदमेव मनसि विवर्तयन् विचिन्तयन्नपि अहं एवं निरधारयं यत् ममेव प्रपन्नानां अन्येषामपि पूजा- स्तोत्रादिकेन प्रीतः वातात्मजः यथा रोगापनयनं करिष्यति तथा प्रयतितव्यम् । स्रग्धरावृत्ते रोगनिवारणाय श्रीमन्तं हनुमन्तं प्रार्थयितुं न किमपि स्तोत्रं एतदवधि विरचितमिति पश्यता मया श्रीहनूमत्पञ्चाशदियं विरचिता।

श्रीहनूमत्पञ्चाशतमिमां पठन् यः कोऽपि भक्त्या तदनुग्रहं प्रार्थयेत, तस्य रोगप्रशमनं पूर्ववत् स्वास्थ्यं च सिद्धयेत्। तद्वीक्षया स्तुत्यामस्यां रोगनिर्मूलनशक्तिः निक्षिप्तेति निश्चप्रचं वक्तुं शक्यते। अत एव फलश्रुतौ मया घुष्टम् ;

एतां पञ्चाशतं यः पठति हनुमतः प्रश्रितो वा शृणोति
भक्त्या तात्पर्यमस्य प्रवचनविधिना श्रावयत्यन्यभक्तान्।
तद्दृष्ट्या कुष्ठयक्ष्मोदरहृदयशिरःकर्कटादीन् स रोगान्
उल्लंघ्योल्लाघभूतः सुखमनुभविता शश्वदुल्लासशीलः।।५७।।

अस्मिन् स्तोत्रे श्रीमता मारुतिना श्रीरामार्थे कृतानि आश्चर्यमयानि कृत्यानि वर्णितानि। तस्य वाक्कौशलं, वीर्यं, तेजः, शौर्यं, कार्यसिद्धिपरत्वं राजतन्त्रकौशलं, कर्तव्यपरायणत्वं, स्वामिभक्तिः, ब्रह्मचर्यं, नयो, विनयः, कथाकारत्वं, इत्यादीनां गुणानामपि पृथक् पृथक् वर्णनं कृतम्। श्रीहनुमतः विचित्रैः कृत्यैः श्रीमद्रामायणमेव स्वादीयो भवति इत्यभिप्रायं प्रकटयता मया तृतीयश्लोके तृतीयपादे "स्वादीयस्सद्यदीयैः प्रभुचरितमहो भाति कृत्यैर्विचित्रैः" इति कथितम्।

सप्तविंशे श्लोके अक्षवधं वर्णयता मया क्षकारस्य प्राचुर्येण अनुप्रासः कृतः। अक्षः क्षकारस्य अभावं सूचयति। तस्य अभावः अर्थात् तस्य वधः क्षकारस्य प्राचुर्यं जनयिष्यति चेत् तत् युक्तमेव ननु। तत एव अक्षवधवर्णनश्लोकः क्षकारपूर्णः कृतो

Devavani Parishad New Delhi

 CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यथा,

"अक्षं दक्षं समक्षं क्षतिकरविशिखान् लक्षयित्वा क्षिपन्तं
वक्षस्यक्ष्णोः क्षणाय क्षयमयमनयन् सक्षमस्स क्षमोऽपि।
रक्षो दक्षं विपक्षक्षपण इदमुपेक्ष्यं नहीत्यक्षिणोत्तं
क्षिप्रं क्षिप्त्वाऽन्तरिक्षात्क्षितिमधि हनुमान् विक्षताद्रक्षतान्नः।।

श्रीरामपरवर्तिकालेऽपि चिरञ्जीविना श्रीहनुमता श्रीकृष्णेन कृतं युद्ध, श्रीभीमं प्रति कृतोऽनुग्रहः, कुरुक्षेत्रे श्रीपार्थस्य रथाग्रे ध्वजे स्थित्वा श्रीगीताचार्यतः गीता-श्रवणं,श्रीतुलसीदासेन हिन्दीरामायण (रामचरितमानस) प्रणयनम्, इत्यादीनि च वर्णितानि।

श्रीरामायणमहामालारत्नभूतो हनुमान् श्रीरामायणपारायणकाले प्रथममेव अधोदत्तैः श्लोकैः संस्तुत्य प्रणम्यते इति सर्वे जानन्ति।

"गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ।।
अञ्जनानन्दनं वीरं जानकीशोकनाशनम्।
कपीशमक्षहन्तारं वन्दे लंकाभयंकरम्।।
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि।।
उल्लङ्घ्य सिन्धोस्सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः।
आदाय तेनैव ददाह लंकां नमामि तं प्राञ्जलिराञ्जनेयम्।।
आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम्।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम्।।
यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम्।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम्।।"

अत एव तस्य स्तोत्रे रामायणकथा विशेषेण वर्तिता। तेन प्रीतो मारुतिः पठतां शृण्वतामपि सर्वाभीष्टसिद्धिं रोगनिवृत्तिमपि दास्यतीति दासस्य मे न कोऽपि सन्देहः। सुन्दरकाण्डाधिनायकः खलु स कपि। अतः एव मयोक्तमन्ते,

"सुन्दरराजग्रन्थितं सुन्दरकाण्डाधिनायकस्तोत्रम्।
सुन्दरमेतत्पठिता नन्दति पुरुषः सदा स्वस्थः।।

इतिः अनेन स्तोत्रेण स्वदासविषयमधिकृत्य कृतेन भगवान् श्रीसीतालक्ष्मणसमेतो रघुनन्दनोऽपि प्रीयेत। श्रीहनूमदुपासकाश्च

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हनुमतस्स्तुतिरित्येनामाद्रियेरन्। पण्डितजनोऽपि दोषानलक्षयन् स्तोत्रेणानेन नन्दिष्यतीति विश्वसिमि। सर्वं शुभमस्तु। सर्वेषां सज्जनानां समस्तकल्याणप्राप्तिरस्तु। विशिष्य परमप्रीतेन पवनतनयेन तेन स्वयं प्रीतेन श्रीसीतालक्ष्मणसमेतश्रीरघुनन्दनपरब्रह्मणा च सर्वत्र मंगलं भूयात्।

(२)

अनेन ग्रन्थेन साकं अन्यदपि मया विरचितं ''शरणागतिषोडशि '' नामकं स्तोत्रकाव्यमेकं मुद्रितम्। भगवति श्रीमन्नारायणे न्यस्तभाराः न्यासविद्यावेदिनः शरणागतरक्षणे तस्य तत्परत्वं जानन्तः श्रीमद्भगवद्गीतायां शरणव्रज्याविषये तेनैव श्रीमन्तमर्जुनं प्रति कृतस्य अन्तिमोपदेशस्य सूक्ष्मं तात्पर्यमपि अवगतवन्तः अनेकानि पुराणेतिहासाख्यानकानि तस्य प्रपन्नरक्षणव्रतं प्रतिपादयन्ति उद्धृत्य मया दर्शितानि अवश्यं रस्येयुरिति अभिप्रैमि। भगवतः प्रहरणादियोगः निरर्थकः तद्धारणं तु प्रपन्नरक्षणायैवेति श्रीमता निगमान्तदेशिकेन स्वरचिते अभीतिस्तवे एवमाख्यायि-

''अपार्थ इति निश्चितः प्रहरणादियोगस्तव
स्वयं वहसि निर्भयस्तदपि रंगपृथ्वीधर।
स्वरक्षणमिवाभवत्प्रणतरक्षणं तावकं
यदात्थ परमार्थविन्नियतमन्तरात्मेति ते।।''

अतः कामक्रोधमोहमदमात्सर्यादिपञ्चमहापातककृद्भ्यः प्रपन्नान् रक्षितुं, क्रमेण शार्ङ्गनन्दककौमोदकिपाञ्चजन्यसुदर्शनानि पञ्चायुधानि स बिभर्ति इति मया चतुर्दशे श्लोके उत्प्रेक्षा कृता। श्रीमता निगमान्तदेशिकेनैव श्रीयतिराजसप्ततौ श्रीमतः रामानुजस्य श्रीविशिष्टाद्वैतप्रसारणाय बाल्ये यौवने तथा वार्धक्येऽपि यादवप्रकाशचोलराजादिभ्यः उत्पन्नं भयं दूरीकुर्वद्भिः श्रीमुरारेः पञ्चायुधैरेव संवर्धनमभूदिति च उत्प्रेक्षितम्, यथा

''अपृथक् प्रतिपन्नयन्मयत्वैः ववृधे पञ्चभिरायुधैर्मुरारेः।''

एतत्स्तोत्रं श्रीमन्नारायणभक्तिप्रवणानां हृद्यं भविष्यतीति विश्वसिमि। तत्र दोषमपश्यन्तः मामुदारधिया ते अनुगृह्णीयुरित्यपि दृढं विश्वसिमि।

इति

श्री भगवद्भक्तचरणरेणुपरमाणुः

भुवनेश्वरम्

सुन्दरराजः।

१.५.१९९१

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥ श्रीहनूमत्पञ्चाशत् ॥

(श्री श्रीसुन्दरराजः)

SRIHANŪMAT PANCAŚAT

(Shri S. Sundararajan)

श्रीमान् धीमान् हनूमानसमसमधिकः कीर्तिमान् भक्तिमान् श्री-
रामे श्रीराम रामेत्यनवरतरतो नामसंकीर्तने यः ।
सीमातीतोऽभिरामो विलसति महिमा यस्य रोमाञ्चकारी
क्षेमस्तोमं स कामं गमयतु नमतः श्रीसमीरात्मजो नः ॥ १ ॥

May Shri Hanuman, the son of Wind God who is glorious, wise and famous and who is without an equal or superior and who is devoted to Lord Shri Rama and is always engaged in chanting the name of Lord as "Shri Rama, Rama" and whose boundless and enchanting greatness causes goose flesh, give plenty of well-being to those who worship him.

ओमित्युक्त्वा नमोऽतस्तदनु भगवतेऽप्याञ्जनेयाय चाथ
शब्दं चान्ते चतुर्थ्या 'स महदिति बलं यस्य' जातं समस्य ।
इत्थं सृष्टं तमष्टादशपरिगणितैरक्षरैरक्षहन्तुः
मन्त्रं सर्वेष्टसिद्ध्यै हुतवहदयिता चूडमाम्रेडयामः ॥ २॥

Beginning with "*OM*" following it by "*Namaḥ*" and then edding "*Bhagavate Āñjaneyāya*" alongwith the addition of "*Swaha*", the Wife of Fire God, at the end, the eighteen lettered Mantra of Shri Hanuman, the slayer of Aksha is formed, which we repeatedly chant to get all that we desire.

वीरो यः केसरीति त्रिभुवनविदितस्तस्य राज्ञोऽञ्जनायाम्
पत्न्यां श्रीरामहेतोस्समजनि तनयो मारुतस्यौरसो यः ।
स्वादीयस्तद्यदीयैः प्रभुचरितमहो भाति कृत्यैर्विचित्रैः
सद्यो नुद्यादवद्यं कलिबलकलितं केसरिक्षेत्रजो नः ॥ ३ ॥

May the Kshetraja son of Kesari, the warrior king wellknown

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

in the three worlds, having been born of his wife Anjana through Wind God for the assistance of Lord Rama, whose wonderful exploits add spice to the story of the Lord himself, remove all the faults in us arising through the influence of "Kali" immediately.

अत्रस्तो जातमात्रः फलमिति कलयन् मित्रमाहर्तुकामः
पुत्रो वायोः पुराऽग्र्यं वियति कृतरयः पुप्लुवे यः प्लवङ्गः ।
स त्रायाद् वृत्रजेत्रा तदनुकृतहनुर्वज्रपातेन डिम्भः
पित्रा संस्तम्भ्य लोकान् वरममरगणाल्लम्भितो जृम्भितेन ।। ४ ।।

Mey the monkaey son of Vayu, who fearlessly jumped into the sky immediately after his birth to catch hold of Sun thinking that it was a fruit and who was struck by Lord Indra with his thunderbolt on the cheek and thereby got an elongated cheek and who was the recipient of several boons from Gods, thanks to his angry father, who stopped blowing, and created a breathing problem for all the worlds, protect us by his growth.

एकस्सन्नद्वितीयः श्रुतिषु तिसृषु यः पण्डितश्चातुरास्य-
प्रीत्या पञ्चत्वहीनस्स पवनतनयः षड्गुणस्सप्तसप्तेः ।
शिष्योऽष्टांगी नवव्याकरणचरणमती रामभक्तः परं नः
दिश्यादायुस्सुदीर्घं दशलपनरिपुर्भाग्यमारोग्यभोग्यम् ।। ५ ।।

May, the son of Pawan (Wind God), who is ONE without a SECOND, who is well versed in the THREE Vedas, blessed by the FOUR faced Brahma as deathless (i.e.), without panchatva or becomming Five and endowed with the SIX divine qualities, who is the disciple of SEVEN Horsed (Sun God) and who practises the EIGHT pronged yoga and well versed in the NINE grammers and who is the enemy of TEN headed Ravana and who is devoted to Lord Rama, give us long life and prosperity to be enjoyed with good health.

सुग्रीवेणावलोक्याग्रजभयचकितेनात्मना पञ्चमेन
तूणीबाणासनेद्धौ विपिनमुपगतौ रामरामानुजौ तौ ।
शंकातंकाकुलेन प्रणिधिरिव तयोरन्तिकं प्रेषितो यः
शंकातंकापनोदं कलयतु कुशलो भिक्षुवेषो हनूमान् ।। ६ ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

May Shri Hanuman, doning the attire of a mendicant, who was sent by Sugreeva, when he was living with his four associates in the Rusyamuk hill range, in fear of his elder brother (Vali) to meet Lord Rama and Laxmana carrying bow and arrow in the forests creating fear and suspicion in his mind, remove all fear and suspicion in us.

गत्वा सौमित्रिरामावथ विपिंनपथं तौ कथं वा किमर्थं
आयातावित्यनेकैरयममरगिरा मध्यमेन स्वरेण ।
सम्यक्शब्दप्रयोगोच्चरणविधियुतेनाद्रुतं चाविलम्बम्
प्रश्नैः पृष्टैः प्रतुष्टं रघुपतिमतनोद्वाग्मितां यस्स दत्ताम् ॥ ७ ॥

May He who asked Lord Rama and Laxmana questons like how and why they happened to come to the forest in a level-pitiched voice in Sanskrit with proper pronunciation of words and a delivery which was neither too fast nor too slow and who through these questions pleased Lord Rama, bestow oratorical skill on us.

कञ्जाक्षौ रञ्जयन्तौ वनभुवमभितो मञ्जुलां व्यञ्जयन्तौ
संजानन् देवतुल्यौ रघुकुलतिलकौ कुञ्जरो यः कपीनाम् ।
युञ्जानस्तेन मैत्रीं व्यधित रविसुतेनाञ्जसा सञ्जयाय
युञ्जन् संजायतां नस्सहृदयसुहृदो रञ्जनायाञ्जनेयः ॥ ८ ॥

May Shri Anjaneya, the giant among monkeys who discerned that the lotus-eyed and charming brothers, who were moving in the forest were divine beings and brought about their union with Sugreeva immediately for the latter's success, provide us with good friends for our enjoyment.

वाली कालस्य यातो वशमिति महतो नैष शोकस्य कालः
पुत्रो राज्येऽभिषेच्यस्तव झटिति ततो मा चिरं राज्ञि रोदीः ।
तारामेवं वचोभिर्मृदुमधुरपदैस्सान्त्वयामास यस्सः
कर्तव्यं दुःखमध्ये कपिरिह कृपया तारयेत् कारयन्नः ॥ ९ ॥

May the Monkey, who consoled Tara with his soft and sweet words, advising her not to endlessly mourn the death of Vali as it was necessary to immediately coronate the prince (Angada) for which the queen mother should not wait for long, make us do our

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

duty even in the midst of sorrow.

वर्षान्ते वानराणां दिशि दिशि पृतनां मैथिलीमार्गणार्थं
मर्षी स्याः प्रेषयेयेत्यथ समयमिमं रामचन्द्रेण कृत्वा ।
हर्षी विस्मृत्य भोगे लगति रविज इत्यस्य बुद्धिं स्खलन्तीं
कर्षन् साचिव्यकारी कलयतु हनुमान् नस्स मोहव्यपोहम् ॥ १० ॥

May Shri Hanuman, who diverted the mind of Sugreeva, who was immersed in worldly pleasures and was forgetting the promise made by him to Lord Rama, that once the rainy season ended, he would send the army of monkeys in all directions to search for Sita and that he should wait till then, remove our mental illusions.

विश्वेषां शेवधिस्सन् दशवदनवधं कर्तुमत्रावतीर्णः
विश्वासं वायुपुत्रे नयविनयवति प्राप्य रामोऽङ्गुलीयम् ।
विश्वासाय प्रियायाः रविसुतवचसा सोऽर्पयामास यस्मिन्
निश्श्वासे निर्गमिष्यत्यपि भवतु स नः कश्चनाश्वासहेतुः ॥ ११ ॥

May the son of Vayu (the Wind God) in whom Lord Rama, Himself, being the protector of the worlds and an incarnate in the world to slay the tenheaded Ravana, placed His faith and deposited His ring for consoling His beloved, be the source of solace for us at the time when we breathe our last.

सीतान्वेषाय विष्टान् बिलमथ तिमिरेणावृतं विन्ध्यशैले
भीतान्निष्क्रान्त्यशक्तान् सदयमनुचरांस्तारयिष्यन् गुहायाः ।
सूनुर्वायोर्वचोभिर्मयदुहितृसखीं सूनृतैर्योऽन्वनैषीत्
जातेभ्यस्संकटेभ्यो भवतु स भगवान् याचितो मोचनाय ॥ १२ ॥

May the wise Hanuman, who took pity on fellow monkeys in the dark cave in Vindhya mountain, which they had entered in search of Sita and from where they could not come out and were, therefore, afraid and who with a wiew to pull them out beseeched the companion of Maya's daughter (Swayamprabha, with truthfulwords, protect us in times of crisis, when we seek his protection.

सुग्रीवाज्ञा-विरोधं कलयति युवराज्यंगदे वालिपुत्रे

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तेनानीके कपीनामपि च विचलिते यस्स्वयं वायुपुत्रः ।
साम्ना भेदेन रामानुजविशिखभिया भेदयित्वाथ धर्म्ये
कर्तव्येऽचूचुदत्तद्दिशतु स हनुमान् नैपुणं राजतन्त्रे ॥ १३ ॥

May Shri Hanuman, the son of Vayu (the Wind God) who saw the rebellion in the army of monkeys caused by Prince Angada, the son of Vali, who was critical of Surgeeva and effectively quelled it using "Sama", "Bheda" and by instilling fear of the arrows of Laxmana in the monkeys, give us practical sagacity.

तुंगं माहेन्द्रशृंगं घनवनशिशिरं धातुभिर्नैकरंगं
त्वंगत् पादाभिघातैः श्वसितमिव दधन्निष्पतद्भिर्भुजंगैः ।
भंगाद् ग्राव्णां क्षरद्भिर्वमदिव रुधिरं धातुरागैर्विधाय
पिङ्गाक्षो जृंभमाणो जलनिधितरणे तारणं नस्तनोतु ॥ १४ ॥

May the Monkey, who swelled at the time of crossing the ocean and stood on the tall peak of Mahendra Parvat, cool with dense forests and colourful with mineral rocks, stamping on it and making it take a deep breath as it were through the hissing of snakes, exiting from it and vomitting blood as it were through the fall of coloured and broken mineral rocks, help us in crossing over (the Sansara).

ध्यात्वा श्रीरामपादौ क्षणमचलवदास्थाय माहेन्द्रमौलौ
बद्ध्वा रामांगुलीयं दृढमथ वसने प्रस्थितो वायुसूनुः ।
पारावारस्य पारं परमुरुतरसा यातुकामस्सकामं
पारावारस्य पारं गमयतु नमतो घोरसंसारनाम्नः ॥ १५ ॥

May the son of Vayu (the Wind God), who jumped to cross the ocean with great speed after meditating on the feet of Lord Rama, standing still for a moment on the top of the Mahendra Parvat and after tying the ring of Rama firmly on to his clothe, help us, who worship him to reach the other shore of the fierce ocean called "Sansara".

अद्रेस्तद्रूपधारी गगनमुपगतोऽह्नाय तीर्त्वा समुद्रं
क्षुद्राकारः प्रविष्टो दशमुखनगरी रौद्ररक्षः प्रतिष्ठाम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

निद्राहीनां निरन्नां पतिविरहकृशां रामभद्रस्य पत्नीं
मुद्रादानप्रतीतामतनुत हनुमान् यस्स भद्राणि दिश्यात् ॥ १६॥

May Shri Hanuman who stood on the top of Mahendra Parvat and sprang into the sky and quickly crossed the ocean and entered the abode of the cruel demons in the capital of Ravana, taking a tiny form and also met the sleepless and fasting wife of Lord Rama, emaciated through separation from her husband and reassured her with the ring of Lord Rama, give us plenty of good tidings.

गत्योत्पत्यातिवर्त्य स्वपितरमपि चरद् व्योम्नि वायोरपत्यं
प्रीत्या दृष्टं प्लवंगैर्जलनिधितरणे चारणैश्च प्रणत्या ।
भीत्या दैत्यैर्विनीत्या सुरवरनिवहैर्योगिभिश्च प्रसत्त्या
स्तुत्या तन्नः प्रसन्नं कुभिषगविषयं शातयेद्वातरोगम् ॥ १७ ॥

May the son of Vayu (the Wind God) who got into the sky and moved at a speed greater than his father and who was seen by the fellow monkeys with affection, spies with respect, demons with awe, Gods with humility and the Yogis with grace, remove all diseases caused by wind in us which can not be comprehended by earthly doctors, after being pleased by our invocation.

तातस्याथाधमर्णं गिरिवरमुरसाऽऽहत्य मैनाकमब्धौ
छायाग्राहेण विघ्नं पथि स विदधतीं सिंहिकां सूदयित्वा ।
नागानां प्रीणयित्वा सविनति सुरसां मातरं वातजातः
पारं यातोऽन्तरायान् पथि स निपतितानन्तरा हन्तु नन्तुः ॥ १८ ॥

May the son of Wind God, who reached the other shore of the ocean after hitting the Mainaka mountain, the associate of his father in the sea with his chest thinking him to be a obstacle in his way and slaying Simhika, the demoness who was creating hindrance on the way, by catching his shadow and after appeasing Surasa, the mother of serpents with his humility, remove all obstacles coming in the way of anyone who worships him.

लङ्कासंरक्षिणी सा रजनिचरपतेः राजधान्येव मूर्ता
मूर्च्छाकारिप्रहारं कमपि वितरता निर्जिता येन सद्यः ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लङ्कामासन्ननाशां फलितमभिहितं ब्रह्मणा प्राह यस्मै
भज्ज्यात् प्राभञ्जनिर्नः सकलमविकलं विद्विषां दुर्गवर्गम् ।। १९ ।।

May the son of Pawan (the Wind God) who vanquished the demoness "Lanka", the protectress of the capital of Ravana with a mighty slap and who informed her that Lanka was going to be destroyed according to the prescience given by Lord Brahma, which was going to bear fruit, destroy all the forts of our enemies without any trace.

रामां रामस्य चिन्वन्निशिचरनगरे सद्मनो सद्म गत्वा
वामास्ता रावणेन प्रसभमपहृताः स्थापिताश्चावरोधे ।
श्यामायामे तृतीये विगलितवसनाः कामिनीरप्यवेक्ष्य
कामं कामस्य नायाद्वशमनिलसुतो नस्स पायादपायात् ।। २० ।।

May the son of Anil (the Wind God), who while searching for the wife of Rama in the capital of the demons, by jumping from house to house, saw the beautiful damsels brought and kept captive in his harem by Ravana lying nude in the late night hours and who inspite of all this did not fall a prey to lust, protect us in all dangers.

युद्धे क्रुद्धेन जित्वा बलजितमथ तं रावणेनापहृत्य
बद्धानीतावरुद्धास्सुरपुरवनिता वीक्ष्य शुद्धान्तरंगे ।
अद्धा शुद्धान्तरंगः क इह स भवितान्यत्र गांगेयभीष्मात्
बुद्धिश्रेष्ठाज्जनेयादुत कथित इति त्रायतां वायुपुत्रः ।। २१ ।।

May the son of Wind God, who after seeing the celestial women brought and kept captive by Ravana in his harem after vanquishing Indra, the slayer of Bala in the war, still remained unruffled and who therefore got the praise that apart from Bhisma-the Gangaputra and the wise Ajaneya who else could be unperturbed in such situations, protect us.

हीनां रामेण सीतामुपवसनकृशां शिंशपावृक्षमूले
दीनां वीक्ष्यैकवेणीं मलिनपटधरां तर्जितां राक्षसीभिः ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लीनः पर्णेषु रामं प्रभुमथ मनसा तं प्रशंसन् जगाम
यो नः श्रीतत्त्ववेत्ता प्रदिशतु परमं तस्य तत्त्वस्य बोधम् ॥ २२ ॥

May he, who after seeing poor Sita separated from Rama sitting under the Simsapa tree, emaciated by fasting and wearing a dirty saree and with a single plait and being threatened by the demonesses, himself sitting concealed in the leaves of the tree, thought of Lord Rama at once and was full of praise for Him and got the knowledge of Sri Tattwa,bestow that knowledge on us.

मासौ द्वावेव कृत्वा समयमपगते रावणे तर्जयित्वा
त्रासं याऽऽसाद्य वेण्युद्ग्रथनकरणतो मैथिली मर्तुकामा ।
प्राणे प्रत्यायिताऽभूत् प्रभुचरितमथोद्गीय वायोस्सुतेन
प्रीतिस्फीतः कपिस्सः प्रणिपतनपरान् प्रीणयन् प्राणयेन्नः ॥ २३ ॥

May the monkey who reassured Sita by singing the story of Rama when she was crestfallen after Ravana gave her an ultimatum of two months and threatened her and when because of the fear she was going to commit suicide by tying her own fleece around her neck, enliven us, through welling affection towards us.

राक्षस्या स्वप्नदृष्टं रघुपतिविजयं वर्णयन्त्या प्रसन्ना
ताभिर्नोक्ताऽपि सीता भवशरणमिहेत्यास तासां तथा सा ।
अव्याजेनानुकम्पामपचरणपरेऽप्यादधानामतोऽम्बां
व्याजापेक्षं स जानन् प्रभुमतिशयिनीं पातु नः पावमानिः ॥ २४ ॥

May the offspring of Wind God who knew that Mother Goddess was greater than the Lord Himself as the Lord needed as excuse to give us his blessings while the ever compassionate Mother gave It without waiting even for an excuse, as it was clear from the refuge she offered to the demonesses, even when they did not seek for it as she was pleased with the narration of the dream by one of them (Trijata) about the victory of her husband over Ravana, protect us in all respects.

रामस्सौमित्रिणा मे परमथ विरहात् क्व क्व यातश्च किं किम्
चक्रे सुग्रीवसख्यं कथमगमदिति ब्रूहि सर्व कपे त्वम् ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं भूयश्च भूयो जनकतनयया चोद्यमानेन येन

संश्रा व्याऽऽश्वासिताऽभूदनयमपनयत्वाञ्जनेयस्स्वयं नः ॥ २५ ॥

May Shri Anjaneya, who on being questioned by Sita, who wanted to know where all Rama and Laxmana went after her separation and how they secured the friendship of Sugreeva, narrated the facts and reassured her, remove all immodesty from us.

मत्तुल्या मद्विशिष्टा अपि बहुकपयः सन्ति सैन्ये कपीनां

मत्तो न्यूनो न कश्चित्तव पतिरिह तै रावणं जेष्यतीति ।

प्रोच्य प्रत्याययिष्यन्निव च रिपुबलं तत्समक्षं हनिष्यन्

रक्षोऽशीतिं तमक्षं सचिवसुतगणं योऽवधीत् सोऽवतान्नः ॥२६॥

May he who told Sita that there were many monkeys who were equal to him or greater than him in the army of monkeys and there was no monkey inferior to him in might in the army and that her husband would easily vnquish Ravana and who with a view to demonstrate his might to her satisfaction killed the eighty demons, prince Aksha and the sons of Ministers in front of her, protect us.

अक्षं दक्षं समक्षं क्षतिकरविशिखान् लक्षयित्वा क्षिपन्तम्

वक्षस्यक्ष्णोः क्षणाय क्षयमयमनयन् स क्षमस्स क्षमोऽपि ।

रक्षो दक्षं विपक्षक्षपण इदमुपेक्ष्यं न हीत्यक्षिणोद्यः

क्षिप्रं क्षिप्त्वान्तरिक्षात् क्षितिमधि हनुमान् विक्षताद्रक्षतान्नः ॥२७॥

May Shri Hanuman, who seeing the skill of Aksha, in front of him, aiming his killer arrows at his chest and eyes, did not for a moment slay him out of infinite patience, though capable and after seeing that if Aksha was neglected, he was capable of destroying his enemies, lifted him and threw him on the earth from the sky and killed him, protect us from any injury or loss.

इच्छन् ब्रह्मास्त्रबन्धं त्रुटयितुमधुना रावणः पारयामि

गच्छन्नेवागतोऽहं किमपि तव हितं रावण व्याजिहीर्षुः ।

स्वच्छन्दं स्वच्छमेवं तमयमभिदधत् पुच्छपीठाधिरूढः

पुच्छेनेच्छाविहारः प्रहरतु हनुमान् क्षात्रवान् शात्रवान्नः ॥ २८ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

May Shri Hanuman who told Ravana that he had just come to see him before going back and that he could break the bondage of "Brahmastra" effected by Indrajeet then and there and that he had come only to advise him about what was good for him, himself sitting on a pedestal constructed by coiling his own tail, destroy all the enemies with his valour and with the free lash of his tail.

वाले तैलेन सिक्ते पिचुपटवलिते दीपिते यातुधानैः
ज्वालामालाकुलोग्निर्न जनकसुतया शापितो यं तताप ।
लंकायां राक्षसेन्द्रानुजगृहरहितं येन दग्धं समस्तं
दिग्धां स्निग्धो विदग्धः पवनज इह नो ज्ञानदुग्धेन मुग्धान् ॥२९॥

May the wise son of Wind God whom the raging fire in his tail, which was lit by the demons, tying cotton clothes and drenching it with oil, did not burn because of the request of Sita and who burnt everything in Lanka except the house of Vibhisana, nourish us, foolish beings, with the milk of wisdom, out of his affection.

लंकां लांगूलदग्धां निशिचररुदितैराकुलामाकलय्य
प्रत्यावृत्याम्बुराशेस्तटमधि हनुमान् वानराणामनीकम् ।
निष्पन्दं जातकौतूहलमवहितधि श्रावयामास सर्वां
आमूलात् स्वां कथां यः प्रदिशतु स कथाकारपारीणतां नः ॥३०॥

May Shri Hanuman, who returned to the army of monkeys on the other shore of the Ocean after burning Lanka and creating a stampade among the demons of Lanka and narrated his exploits from the beginning and kept the army spellbound, confer us with the skill of story telling.

दृष्टा सीतेति सा त्वामिदमवददिति श्रोत्रपीयूषमुक्त्वा
रामात् सर्वस्वभूतं रघुकुलतिलकाद्यः परिष्वंगमाप ।
विक्रान्तं यं समर्थं कपिमतिमुदिता मैथिली प्राज्ञमूचे
शृण्वन् रामायणं यो विचरति भुवनेऽद्यापि स त्रायतां नः ॥३१॥

May he, who after informing that Sita was seen and she conveyed this message to you, obtained from Lord Rama the scion of the dynasty of Raghu an embrace which was his all in return and whom Sita after being pleased called as an able,

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

efficient and intelligent person and who is even now roaming the world hearing Ramayan, may protect us.

य: शत्रो: रावणस्य स्वयमयमनुजोऽदेशकालागतोऽत्र
निग्राह्यो ग्राह्यतां न व्रजति कथमपीतीतरेषूचिवत्सु ।
धर्मात्मा देशकालागत इति वचनैर्हेतुमद्भिर्य ऊचे
चित्तं रामस्य जानन्नवतु स हनुमान् धर्मवित् कर्मभिर्न: ।। ३२ ।।

May Shri Hanuman, the knower of Dharma who knew the mind of Rama and said that Vibeeshana, who was personified Dharma had come at the right time and place while the others said he was the brother himself of Ravana and having come to join them at the wrong time and place should actually be punished and not accepted, protect us with his deeds.

कैलासं कम्पयित्वा वरमथ तपसा शम्भुमाराध्य लब्ध्वा
दम्भोलिं जम्भशत्रो: शलभमिव न यो लक्षते वक्षसि स्म ।
मुष्टिं तस्य प्रपात्योरसि दशगिरसस्तेन सद्योऽपनुद्यात्
साधु त्वं श्लाघनीयो रिपुरिति कथितो मारुतिर्भीरुतां न: ।। ३३।।

May Shri Maruti, who after giving a fist blow on the chest of the ten headed Ravana who had received boons by doing penance and devotion to Lord Siva after shaking up Mt. Kailasa, and who did not care for the blow by thunder bolt of Lord Indra on his chest, was told by Ravana that he was a praiseworthy enemy, may remove our cowardice

सानीकं जानकीशं रणभुवि पतितं मेघनादास्त्रविद्धं
ग्लानिं भूयो भजन्तं पतितमवरजं वीक्ष्य संजीवयिष्यन् ।
योनिं दिव्यौषधीनां हिमगिरिशिखराद्यस्स आनीतवान्न:
हानिं दात्रीं निहन्यात् तनुरुजमगदंकारभूतो हनूमान् ।। ३४ ।।

May Shri Hanuman, who after seeing the consort of Janaki along with his army felled in the battlefield by the astras of Meghanada, himself being more worried about his younger brother who was similarly felled, went and brought the hillock from Himalaya which is the origin of all celestial herbs with a view to bring them both back to life, remove all harmful pain from our

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

body acting as a physician.

वैकुण्ठे शेषनामा भुजगपरिवृढः श्रीपतेर्धूर्वहो यः
जातो रामावतारे दशरथतनयः प्राप्य रामानुजत्वम् ।
धृत्वा शक्त्याऽऽहतं तं युधि दशशिरसा दुर्वहं धूर्वहत्वं
व्यानग्यो वायुसूनुर्लघुमिह वहताल्लीलयाऽस्मद् धुरं सः ॥३५॥

May the son of Vayu, (the Wind God) who lifted Laxmana from the battle field after he was hurt by the shakiti of the ten headed Ravana, Lakshmana himself heing none other than the King of serpents called Adisesha who carries Sriman Narayana in Sri Vakuntha and who was born as son of Dasaratha during the Avatar of Rama, as his younger brother and thereby demonstrated the impossible feat of carrying the heaviest of weights, may carry our small weight also in a playful manner.

कुम्भादीन् यातुधानानथ युधि निधनं लम्भयन् योऽनिलस्य
डिम्भो गम्भीररूपो विधृतरघुवरो रक्षसां दम्भभेत्ता ।
अम्भोराशिं स तीर्त्वौषधिमुपहरन् जृम्भयां स्वान् बभूव
शम्भोरेवावतारोऽयमिति निगदितस्स्तम्भयेत् संभ्रमं नः ॥ ३६ ॥

May the off spring of Anil (the Wind God), who is desceribed as the incarnation of Rudra and who helped his colleagues in the war by killing demons like Kumbha and thereby destroyed the pride of demons, and who carried Lord Rama and who crossed the ocean and brought herbs, remove all our confusion.

मायासीतां समक्षं मघवजिदसिना दारितां मारिताञ्च
पुत्रो निध्याय वायोरथ रघुपतये दुःखमाख्यातुकामः ।
यो गच्छन् राक्षसेन्द्रावरजवचनतो वञ्चितं स्वं व्यजानात्
मायाव्याली स धुन्वन् स्वयमपनयताज्जायमानं भयं नः ॥ ३७ ॥

May the son of Vayu (the Wind God), who after seeing (Maya) Sita killed by Indrajit by cutting her with his sword in front of his eyes went to give the sad tidings to Lord Rama and learnt on the way from Vibishana that he was deceived, allay the fear generated in our minds by removing the snake of illusion.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मैथिल्या विप्रलम्भे रविसुतवचसा प्रेषयामास रामो
दूतं वातस्य जातं स जनकतनयां ज्ञातुमम्भोधिपारम्।
व्यापाद्यायोधने तं दशवदनमथ प्रेषयन्नाशुवार्तां
देव्यै दूतं पुनर्यं व्यधित स तनुतां संनुतः शं नतेभ्यः।। ३८ ।।

May the son of Wind God, who was earlier sent during his separation from Maithili by Lord Rama as prompted by Sugriva, as His emissary to Sita on the other shore of the ocean and was again sent by the Lord as His messanger to inform her after the slaying of the ten headed Ravana, give prosperity to us on being worshipped by us.

संसेव्याशोकवन्यां रघुपतिदयितां क्रूरवाग्राक्षसीनां
संहारं यश्चिकीर्षुस्सदयमभिहितस्सेविकास्स्वाम्यधीनाः।
संरक्षन्त्यस्तदाज्ञामदधत यदि तत् कोऽपराधोऽत्र तासां
संहार्या नेति देव्या कलयतु स दयां नन्तृषु क्षान्तमन्तुः।। ३९ ।।

May he, after paying obeisance to the consort of Lord Rama in Ashokavana desired to kill the cruelworded demonesses and who was told by Devi that they were servants and dependant on their master and whatever they did by way of carrying out the word of their master was not their mistake and so they should not be killed, be kind to those who worship him and overlook their mistakes.

आदिष्टो राघवेण प्रभुमपि जटिलं स्थण्डिले संविशन्तं
नन्दिग्रामे निविष्टं भरतमभिगतो ज्येष्ठभक्तौ सुनिष्ठम्।
दृष्ट्वा शत्रुघ्नजुष्टं रघुपतिपदवीदत्तदृष्टिं स भक्त-
श्रेष्ठं मेने नयज्ञो गमयतु विनयं वायुसूनुर्मनो नः।। ४० ।।

May the son of Vayu (the Wind God), adept in the art of diplomacy, on being ordered by Lord Rama proceeded to Nandigarm and saw Bharata who was ever worshipping his eldest brother and despite being a royal personage was doing matted hair and was sleeping on the floor along with Satrughna and was anxiously eyeing the road by which Rama was expected and concluded that he was the greatest of devotees, make our minds also humble end modest.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नाथस्याथाभिषेके नयनसरसिजस्यन्ददानन्दवाष्पं
जानाना जानकी यं पतिमतिमतनोद्धारदानेन धन्यम्।
नित्यं सौमित्रिसीतासहितरघुवरं वन्दमानो हनूमान्
वश्यो दिश्यादवश्यं दिशमथ विदिशं व्यश्नुवानं यशो नः ।। ४१ ।।

May Shri Hanuman who at the time of the coronation of Lord Rama was sitting, with tears of joy flowing from his lotus eyes and whom Janaki knowing the mind of her husband, honoured with the gift of her garland and who is always seen worshipping Lord Rama with Sita and Laxmana, be accessible to us (by our devotion) and give us fame which would travel to the ends of all direcctions.

मोक्षं नाथप्रसादात् करगतमपि यो व्याक्षिपंस्तस्य गाथां
गायन् शृण्वंस्तदीयं चरितमयमवन्नापदस्तस्य भक्तान्।
तत्त्वं सत्त्वे स्थितेभ्यः परममुपदिशन् संचरन् संप्रसद्य
सद्यश्शोकं स नुद्यात् सदयमनिलभूरद्य लोकस्य सर्वम्।। ४२ ।।

May the son of Anil (Wind God) who knowing that Moksha (Salvation) was already within his reach by the grace of Lord did not accept it and is even now moving in the world singing the praise of Lord hearing His story and protecting his devotees and imparting the knowledge of truth to good people, remove all the sorrow of the world at once through his grace.

रामं संकीर्तयन् यो विहरति सततं तं वहन्नेव वाचा
रामं ध्यायन् हनूमान् विचरति परितस्तं वहन् मानसेन।
दोर्भ्यामादाय रामं विलसति समरे तं वहन् वर्ष्मणैवं
यातः पायादपायाद्रघुपतिमयतां वाङ्मनोवर्ष्मभिर्नः।। ४३ ।।

May he, who always carries Lord Rama in his mouth by chanting his name and also carries Him in the heart meditating on Him and physically also carries Him on his shoulders and in the short carries Him by words, thoughts and body thus becoming Rama-maya himselt, protect us from danger.

कृष्णं विष्णुं स जानन्नपि परपुरुषं राघवान्यावतारं
रामाकारे दिदृक्षुः पुनरपि पुरतो मारुतिस्तेन युद्ध्यन्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

बिभ्राणे राघवस्याकृतिमथ पतितः पादयोस्तस्य दास्यं

स्पष्टं व्याचष्ट यस्य प्रदिशतु भगवान् भक्तियोगं परं नः।। ४४ ।।

May he, who knowing fully well that Lord Krishna was Lord Vishnu himself and another incarnation of Lord Rama wanted to see Him again in the attire of Lord Rama and so fought with Him and after He showed the form of Rama fell at his feet and clarified his eternal servitude, impart us the great Bhakti Yoga in Lord.

पुष्पं सौगन्धिकाख्यं हिमगिरिविपिने कृष्णया प्रार्थितं यद्

भ्रात्रे भीमाय तस्मै तदवचयकृतेः काम्यया भ्राम्यते प्राक्।

संदर्श्यानुग्रहं यो व्यतरदपहरन् स्कन्धयोरस्य गन्धं

गन्धं संसारबन्धप्रदमपहरताद् गंधवाहात्मजो नः।। ४५ ।।

May the son of wind God, who showed himself to his brother Bhima and removed the haughtiness that the latter had on the strenght of his shoulders when he was moving round in the Himalayan forests to collect the flower known as Sougandhika which was desired by Draupadi,remove all haughtiness from us which ultimately gives rise to bondage in Sansara.

पार्थादन्यत्र दिव्यां दृशमधिगमितात् संजयाद्वा प्रबुद्धात्

पार्थस्य स्यन्दनाग्रे कपिकुलतिलकान्मारुतेर्वा ध्वजस्थात्।

सार्थां श्रोतुं हि गीतां परमपुरुषतो निःसृतां कः समर्थः

सोऽर्थं गीतोपदिष्टं कपिरुपदिशतादस्मदुज्जीवनार्थम्।। ४६।।

May the monkey, who was the only being sitting in the flag atop the Chariot of Arjuna apart from Arjuna himself who was endowed with divine vision by Lord, and apart from Sanjaya, the charioteer of Dhrutarashtra who was similarly given divine vision (by sage Vyasa) could hear and understand the Gita as preached by the Great Lord Himself, teach us the meaning of Gita for our proper living.

मध्ये सिन्धोर्भवाब्धेरिव पुरुषतनावत्र लंकाख्यपुर्यां

सीतेवाप्य द्विपञ्चेन्द्रिययुतमनसाऽत्मा दशास्येन बन्धम्।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आचार्यदिव नन्दत्यनिलभुव इवाकर्ण्य नाथस्य वार्ताम्

इत्यध्यात्मीयरामायणमधि महितो मारुतिस्ताद् गुरुर्न:।। ४७ ।।

May Shri Maruti, who consoled Sita when she was kept as a prisioner by the ten headed monster in Lanka sorrounded by ocean, like a preceptor who consoles his disciple who is infact a soul imprisioned in the body sorrounded by the ocean of sansara and held captive by the ten headed monster (i.e.) mind (here 10 heads denote 10 senses) and actually praised as playing the role of an Acharya be our spiritual master.

लोकेऽद्यालोकहीने सपदि कलियुगे संस्कृते लुप्यमाने

लोको रामायणं तत् पठतु कथमिति प्राप्य चिन्तां परां ताम् ।

हिन्दीरामायणं यः कविवरतुलसीदासतो भक्तिभावैः

पूर्णं तूर्णं प्रणाय्यं व्यवृणुत स नृणां मारुतिश्चारुशीलः।। ४८ ।।

Maruti of charming quality found that in Kaliyuga the light of Knowledge was dim and Sanskrit was eclipsed and people could not read the original Valmiki Ramayana in Sanskrit, and so got the Ramayana fully composed in Hindi by the sage poet Tulsidas with devotional feelings quickly, out of his compession.

क्रव्यादानां विभाव्यं पुरवरमखिलं हव्यवाहेन दग्ध्वा

देव्यास्संसेव्य नव्याम्बुजसदृशपदं सेव्यमाधाव्य भूयः।

अभ्यर्णे वर्णयिष्यंस्तदथ रघुपतेः तीर्णवन्नर्णवं भोः

तूर्णं कर्णावतीर्णं कुरु सुत मरुतस्तोत्रमुद्गीर्णमेतत्।। ४९ ।।

O son of Marut (Wind God) who burnt the beautiful city of Demons completely with fire and who after worshipping the hallowed and lotus like feet of Devi ran up and crossed the ocean to describe the whole story to Lord Rama, please allow this Stotra to enter your ears quickly.

उग्रं वा शान्तमूर्तिं दशमुखनगरे विष्टमंगुष्ठमात्रं

अग्रे सौमित्रिसीतासहितरघुपतेः प्रश्रयेणोपविष्टम् ।

व्यग्रा निध्याय सद्यो निजहृदि बहुधा सिद्धिमासेदिवांसः

सुग्राह्यां पावमानेरिति हि नुतिमिमादरेणाददीरन् ।। ५० ।।

I hope that great Sadhakas and Upasakas of Shri

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Hanuman who meditate upon him as Ugramurthi, Santa Murthi or thumbsized when he entered Lanka or in his serving form sitting in front of Lord Rama with Sita and Laxman and acquire various types of powers will surely consider this Stotra as acceptable as it is but in praise of their beloved deity Shri Hanuman himself.

एतां पञ्चाशतं यः पठति हनुमतः प्रश्रितो वा शृणोति
भक्त्या तात्पर्यमस्य प्रवचनविधिना श्रावयत्यन्यभक्तान् ।
तद्दृष्ट्या कुष्ठयक्ष्मोदरहृदयशिरःकर्कटादीन् स रोगान्
उल्लंघ्योल्लाघभूतस्सुखमनुभविता शश्वदुल्लासशीलः ।। ५१ ।।

Any person who either reads these fifty slokas himself or hears them or explains the meaning of the slokas with devotion to the Bhaktas of Shri Hanuman, will through the grace of Shri Hanuman get relief from diseases like leprosy, tuberculosis, stomach, heart and brain disorders and cancers and will enjoy good health and happiness for ever.

प्रत्नं रत्नाकरस्य प्रथितमपि यशो दुस्तरत्वे निरस्य
यत्नैर्येन प्रणीतैरभवदवसितो रामसीतावियोगः ।
रत्नं रामायणाख्यस्रज इति कविभिर्मारुतेः कीर्तितस्य
यत्नस्तस्यार्चने नः क्षणमपि विहितो नित्यकल्याणहेतुः ।। ५२ ।।

Any effort made by us even for a moment to worship Maruti who caused the downfall of the wellknown and ancient fame of the ocean that it is uncrossable and through whose efforts the separation of Rama and Sita came to an end and who is described as the jewel of the garland of Ramayana by poets, is bound to be the cause of great prosperity, for the performer.

श्रीरामो विश्वसर्गस्थितिविलयकरो यः परब्रह्मभूतः
भूलोकेऽत्रावतीर्णो दशलपनविलोपाय मायामनुष्यः ।
चक्रे संदर्शयां नः शुभचरितमिषेणैकमादर्शमार्गं
स्तोत्रं दासस्य तस्योदितमनिलभुवस्तन्मुदे तत्सदेदम् ।। ५३ ।।

This stotra of His servant and the son of Wind God will always be pleasing to Lord Rama who is actually Parabrahma Himself

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

responsible for creation, continuation and destruction of the universe and who had taken Avatar in the world as an illusory man to slay the tenheaded monster and who showed a model life for human beings to live, with His own life.

सुन्दरराजग्रथितं सुन्दरकाण्डाधिनायकस्तोत्रम् ।

सुन्दरमेतत् पठिता नन्दति पुरुषः सदा स्वस्थः ॥ ५४ ॥

After reading this beautiful stotra of the hero of Sundara kanda viz. Maruthi written by poet Sundararajan, any person will be happy and healthy forever.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शरणागति-षोडशी

(श्री श्रीसुन्दरराजः)

Sharanagathi Shodashi

(Shri S. Sundararajan)

ग्राहेणाकृष्यमाणं सरसि बलवता त्रस्तगात्रं गजेन्द्रं
त्रातारं त्वां स्तुवन्तं झटिति करुणयाऽभ्येत्य तार्क्ष्याधिरूढः।
नक्रं चक्रेण हत्वा ज्वलदनलमुचा तं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥१॥

(1) Oh! Lord Shriman Narayana, please Protect me, who has no refuge other than You, and who has surrendred before You, even as You protected out of compassion, the fear-stricken elephant, which was being pulled into the pond by the powerful crocodile, and which invoked You as its Savior, by arriving quickly seated on Garuda, and killing the crocodile with Your fire spitting disc.

अङ्कात्सद्योऽवरोप्य स्वपितुरभिमताच्छ्रावितं क्रूरवाक्यं
तत्तन्मातुस्सपत्न्या ध्रुवमधिविपिनं बालकं त्वां स्तुवन्तम्।
संदर्श्यात्मानमुच्चैः पदवितरणतः त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥२॥

(2) Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected the infant Dhruva, who invoked you in the forest after he was thrown out from the lap of his father, of which he was fond, by his stepmother and made to hear several cruel words, by showing Yourself and rewarding him with a lofty position (as Polar star in the Universe).

त्वच्चक्रेणाभिगुप्ते त्वयि निहितभरे निर्निमित्तं प्रयुक्तां
कृत्यां दुर्वाससा तां प्रणमति विनयेनाम्बरीषे नरेन्द्रे ।
दग्ध्वा संत्रास्य दुर्वाससमथ नृपतिं तं यथा पर्यरक्षः

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥३॥

(3) Oh! Lord Shriman Narayana, Please protect me, who has no refuge other than You and who has surrendered before You, even as You protected King Ambarisha, who had surrendered to You and to protect whom, You had deployed the disc and against whom despite his beseechings, black magic was used by Sage Duravasas, without any justification by burning the magic, and teaching a lesson to the Sage.

प्रह्लादं बालमार्तं त्वयि निहितमतिं तुद्यमानं स्वपित्रा
तत्पित्रङ्घ्र्याहतात्त्वं नरहरिवपुषा स्तम्भमध्यादुदित्य ।
सद्यो हत्वा तदीयं पितरमनितरं तं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥४॥

(4) Oh! Lord Shriman Narayana, please protect, me, who has no refuge other than You and who has surrendered before You, even as You protected the boy, Prahlada, who was always immersed in Your thought, and had no fefuge other than You and who was being harrassed by his father (Hiranya Kashipu) by suddenly emerging in the man-lion form, from the pillar, which was kicked by his father and slaying his father.

त्यक्तं मातापितृभ्यामनितरशरणं तं शुनश्शेपमार्तं
पुंमेधायाम्बरीषे नयति पथि मुनेः कौशिकाल्लब्धबोधम् ।
श्लोकाभ्यां त्वां स्तुवन्तं शरणमुपगतं त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥५॥

(5) Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected the boy, Shunasshepa, who had surrendered to You and who had no refuge other than You and who got the knowledge from Sage Visvamitra[1] on the way and (as

1. Even though out of the two slokas tught to Shunasshepa by Visvamitra one was meant for Lord Indra and the other for Upendra i.e., Lord Shriman Narayana, the statement of the poet that both the slokas were meant for Lord Shriman Narayana, is to confirm that it was Upendra who was first satisfied as Antaryami, and Indra was made to be satisfied by Him as such to consider that the sacrifice was accomplished by King Ambarisha and accordingly given the fruits and Shunasshepa was set free.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

advised by him) invoked You by two slokas when he was abandoned by his parents and was taken by king Ambarisha for performing a sacrifice involving human offering (where Shunasshepa was to be sacrificed).

ब्रह्मास्त्रात्त्वत्प्रयुक्तादभिमुखचलितात्कातरं काकमेकं
भ्रान्त्वा त्रैलोक्यमन्यं कमपि न शरणं प्राप्तवन्तं वधार्हम् ।
त्वामेवान्ते शरण्यं शरणमुपगतं त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥६॥

Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected, the crow which deserved to be executed for the offence it had committed & which afraid of the oncoming Brahmastra despatched by You to kill it, went round the three worlds and not finding a refuge, finally surrendered before You as the only refuge.

भ्रात्रा धिक्कारपूर्वं परुषमभिहितं पथ्यमेवोक्तवन्तं
ज्येष्ठेनाप्यार्यधर्मव्यपगतमतिना राक्षसेन्द्रानुजं तम् ।
त्यक्त्वा पुत्रांश्च दारान् शरणमुपगतं त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥७॥

(7) Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected that younger brother (Vibhishana) of the demon king (Ravana) who took refuge in You after abandoning his wife and children, when he was rebuked and insulted by his brother who though elder to him had swerved from the path of rightous persons, when he had only advised him about what was good and in his interest.

दारिद्र्यार्तं कुचेलं सुहृदिति भवतो याचितुं द्रव्यमेत्य
धानामुष्टिप्रदं तं कृतविविधकथं विस्मृताभ्यागमार्थम् ।
विज्ञायैतत्परोक्षे धनवितरणतस्त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥८॥

Oh! Lord Shriman Narayana, please protect me, who has no

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri Sarayu Trust

refuge other than You and who has surrendered before You, even as You protected, the penniless Kuchela, who had come to ask for wealth from You as a friend, and who offered a fistful of flattened rice (sent by his wife for You to eat) and who forgot the purpose of his visit while narrating several stories to You, by knowing the purpose of his visit indirectly and blessing him with wealth.

क्रूरेणाकृष्यमाणां कुरुसदसि तथा तत्र दुश्शासनेन
पाञ्चाली वेपमानां वसनविरहितां तन्यमानां क्रमेण ।
त्वामेवार्तां शरण्यं शरणमुपगतां तां यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ।।९।।

Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected the distressed and trembling Draupadi in the darbar of Kauravas, being dragged by Dusshasana and being stripped, when she took refuge in You as the only refuge (for all).

भ्रातृव्यैर्द्यूतिखेले च्छलयति शकुनौ निर्जितान्नष्टराज्यान्
पत्न्या सार्धं प्रविष्टान् वनमतिगहनं पाण्डवान् पञ्च पूर्वम् ।
द्रुह्यद्दुर्योधनात्त्वं शरणमुपगतांस्तान् यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ।।१०।।

(10) Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected, the five Pandavas, who surrendered to you from the inimical uryodhana, when they were banished to the forest along with their wife (Draupadi) after being defeated in dice by their cousins, thanks to the trickery of Sakuni.

आतिथ्यायाभ्युपेतादनुचरसहितात्क्रोधनश्शप्स्यतीति
भीतां दुर्वाससस्तां द्रुपददुहितरं कानने त्वां प्रपन्नाम् ।
भुक्त्वा शिष्टान्नमाप्यायिततदतिथिकस्त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ।।११।।

Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected Draupadi, who surrendered to you in the forest, being afraid of the curse of the short tempered sage Durvasas when he came, (which she was not in a position to provide as

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

neither food nor material to cook food was available), by eating the remains of food and thereby making sage Duravasas and his disciples feel full in their stomach and satisfied as it were with a good feast.

अस्थानस्नेहशङ्काविचलितधिषणं पार्थमार्तं प्रपन्नं
शास्त्रार्थान्बोधयित्वा सरलविशदया गीतया युद्धरंगे ।
अन्ते तत्त्वं प्रपत्तेस्सदयमुपदिशंस्त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ।।१२।।

Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, even as You protected, Arjuna in the battle-field when he was grief stricken and confused with misplaced affection and apprehension, and surrendered to You by kindly enlightening him on the import of Sashtras through the simple and clear exposition of GITA, and finally teaching him the principle of surrender to You.

अश्वत्थाम्ना विसृष्टे पितृवधजनितक्रोधसंमूर्च्छितेन
दिव्यास्त्रे ब्रह्मशीर्षेऽभ्युपगतनिधनं रक्षितुं गर्भमन्तः ।
पत्नीं तां पार्थसूनोः शरणमुपगतां त्वं यथा पर्यरक्षः
श्रीमन्नारायणैवं कृपंणमशरणं पाहि मां त्वां प्रपन्नम् ।।१३।।

Oh! Lord Shriman Narayana, please protect me, who has no fefuge other than You and who has surrendered before You, even as You protected, the wife (Uttara) of Arjuna's son (Abhimanyu), who surrendered to You for saving her foetus, which was threatened by the divine astra called Brahmasirsha used by Aswatthama, who was furious (with Pandavas) because of the killing of his father.

कामान्धाद्बाधमानाच्छ्रितजनमवितुं शार्ङ्गचापं दधानः
क्रोधान्धाच्चापि विद्युल्लसितमसिवरं नन्दकं मोहतोऽन्धात् ।
कौमोदक्याह्वयां तां विभवगुरुगदां पाञ्चजन्यं मदान्धात्
मात्सर्यान्धाच्च चक्रायुधमवतु भवान् सर्वतस्सर्वदा नः ।।१४।।

(14) May You, who hold the bow Sarnga to protect the surrendered from harrasment at the hands of the sensous and treacherous and who carries Nandaka, the sword, to protect the surrendered from harrassment at the hands of the angry and

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

furious and who bears the mace called Kaumodaki, to protect the surrendered from harrassment at the hands of the deluded and megalomanic and who holds the conch called Panchajanya to protect the surrendered from harrassment at the hands of the haughty and proud and who carries the disc (called Sudarsana) to protect the surrendered from harrassment at the hands of the envious and jealous, protect us all around, and at all times.

माया त्रैगुण्यरूपा स्थगयति धिषणां मोहिनी दुस्तरा ते
तेनाहंकारमूढस्त्वदपचरणवान् जन्तुरत्राप्ति भोगान् ।
तीर्त्वा संसारमेनं परमपदमितः प्राप्य ते किंचिकीर्षुं
श्रीमन्नारायणैवं कृपणमशरणं पाहि मां त्वां प्रपन्नम् ॥१५॥

Oh! Lord Shriman Narayana, please protect me, who has no refuge other than You and who has surrendered before You, because Your insurmountable illusory energy (maya) veils one's intellingnce thanks to which every living being undergoes its enjoyment after doing dis-service to You, and I want to leave this Sansar and reach paramapada (Your abode) and am desirious of serving You.

त्वं तीर्थं त्वं प्रसूनं तदिदमहमपि त्वं त्वमन्नं त्वमत्ता
श्रीमन्नारायण त्वं जगति तदिह यद् दृश्यते श्रूयते वा ।
त्वद्रूपैर्वस्तुजातैः कथमिव भविता त्वत्सपर्या त्वया वा
मायामेतां निरस्य स्वयमिह कृपया देहि मे स्वाधिकारम् ॥१६॥

(16) Oh! Lord Shriman Harayana, You are the holy water, You are the flower, You are this that and I, You are the food and the eater, You are whatever is seen and heard in the universe. How can pooja be done to You by You using things which are only Your forms ? Please remove this illusion and give me my birth right of rendering free and enternal service to You.

शरणागतिषोडशिस्तुतिं पठतस्सुन्दरराजनिर्मिताम् ।
शरणागतरक्षणव्रती हरिरव्यादिह पञ्चहेतिभिः ॥

Hari, who has vowed to protect the surrendered, shall protect here all those who read this 'Sharanagathi Shodashi' stotra composed by Surdararajain, with his five weapons.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अकालमृत्युः

डॉ. श्रीमती इला घोष

गच्छसि कुत्र हे भ्रातः ! पर्याकुलितचेतसा ।
दोर्भ्यामुद्वहन्नेनन्तु वक्षोलग्नं शिशुं मृतम् ।।
दोलायां शायितः स्नेहेनाद्य धरातले कथम् ?
वृतो वात्सल्यभावेन मृत्तिकावरणं कथम् ?
अनुगतः स छायावदनुदिवसमम्बया ।
परित्यज्य तमेकाकी शक्यमागमनं कथम्?
अव्यक्तशिशुवाचा परिपूरितं गृहाङ्गणम्।
तत्र विचरति स्तब्धा मृत्युच्छाया भयावहा ।।
शिशुविहीनं तद्गेहं त्वां भृशं रोदयिष्यति ।
क्रन्दनं पुत्रहीनाया हृदयं वेधयिष्यति ।।
जनन्या सज्जिताः स्वप्नाः केन्द्रीकृत्य तु तं शिशुम् ।
मातृत्वगौरवैर्दीप्तरमभूत्तदा मुखम् ।।
शिशोः जन्म पदं मातुः जीवनार्थोऽयमेव तु।
हा ! वात्सल्यलता निष्फला सर्वं तु निरर्थकम् ।।
चिरनिद्रापरोऽयं न कदापि जागरिष्यति।
मधुरया स्ववाचा 'पितः' तु नोदीरयिष्यति।।
सिंहासने मनोराज्यस्याभिषिक्तः स जन्मतः ।
करूणाश्रुजलैरद्य करोषि तस्य सेचनम्?
हृतः केन शिशूच्छ्वासः मृत्युरधिकृतः कथम्।
अद्य नास्ति स रामः प्रतिकारः संभवः कथम्?
अकालमृत्युरेकस्तु रामराज्यमकम्पयत्।
म्रियन्ते शिशवोऽसंख्याः न लवमपि वेदनम्।।
अस्माभिरनुगम्यन्ते मृताशा नतमस्तकैः।
नीयमानाः दिशां कान्नु नियत्या बलपूर्वकम्?

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

क्षणिकाः

आचार्य गणपति शुक्लः

एकता

एकः शब्दः
अनेकार्थाः
अत्र भवति श्लेषः
न स्यात् विश्लेषः ॥१॥

नवयुगदेवः

स नवयुगदेवः
यो मनः पूरयति
विनिमये जयजयकारम्
श्रीफलञ्चाधिगच्छति ॥२॥

निर्धनता

महार्घता प्रतिदिनं वर्धमाना
लक्ष्मीरहर्निशं मुद्र्यमाणा
वञ्चन-लुण्ठन-वृत्तिर्मोदमाना
निर्धनता कथं भवेत् म्रियमाणा ॥३॥

निष्क्रियता

यथा चलति तथा चलतु
यथा भवति तथा भवतु
कः क्रीणीयात् कटुताम्
ममापि कार्यम् सिध्यतु ॥४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषद्वार्ता

(1) देववाणी- परिषदः षोडशः संकल्पना-दिवसः

देववाणी- परिषदः षोडशः सङ्कल्पना-दिवसः २१.८.१९९१ तारिकायां 'आर-६ वाणी विहार, नयी दिल्ली-११००५९' इत्यत्र सम्मानितोऽभूत्। अस्मिन्नवसरे दृश्यश्रव्याङ्कितानां परिषत्कार्यक्रमाणां प्रदर्शनं श्रवणं चानुष्ठीयाताम्। किञ्च परिषदा प्रकाशितानां चतुष्षष्टिसंख्याकानां ग्रन्थानां प्रदर्शन्यप्यायोज्यत।

महासचिवेन डा. रमाकान्तशुक्लेन परिषदः पूर्वाध्यक्षाणां डा. रमेशचन्द्र शुक्ल-डा. कृष्णकान्त शुक्ल-प्रो. श्रीनिवासरथानां किञ्च वर्तमानाध्यक्षस्य 'अभिराज' डा. राजेन्द्रमिश्रमहाभागस्य शुभकामना-सन्देशाः श्राविताः।

(2) चतुर्थः पण्डितराज-महोत्सवः

देववाणी-परिषदा २३.१०.१९९१ तारिकायां वाणी-विहारे चतुर्थः 'पण्डितराज- महोत्सवः' आयोजयिष्यते यत्र पण्डितराजजगन्नाथस्य ध्वन्यङ्कितानां रचनानां प्रस्तुतिः, तस्य व्यक्तित्वं कर्तृत्वं चावलम्ब नैके कार्मक्रमा अनुष्ठास्यन्ते। समारोहस्याध्यक्ष्यं परिषदध्यक्षैः डा. राजेन्द्रमिश्रमहाभागैः करिष्यते। आचार्यरमेशचन्द्रशुक्ल-पं. लालनकृष्णपण्ड्या- डा. रवीन्द्रनागर- डा. रमाकान्तशुक्लादिभिः स्वविचाराः प्रकटीकरिष्यन्ते।

(आनन्दवर्धनः)

संस्कृत-जगद्वार्ता

(१) **दिल्ली संस्कृत अकादमी** २२.८.१९९१ तारिकायां श्रीमद्दयानन्दगुरुकुले 'नवोदित प्रतिभा-कविसम्मेलनम्' आयोजितवती यत्र पञ्चविंशत्प्रायैर्युवकविभिः स्वसंस्कृतकविताः प्रस्तुताः।

(२) **आकाशवाण्यां संस्कृत कार्यक्रमः-** आकाशवाण्याः दिल्लीकेन्द्रेण ११.८.१९९१ तारिकायां 'साहित्यिकी' कार्यक्रमे डा. रमाकान्तशुक्लस्य 'शीलं परं भूषणम्' इतिशीर्षका वार्ता २.९.१९९१ तारिकायां च 'स्वरवेलायां' डा. शुक्लेन कृतः श्रीमद्भागवत-दशमस्कन्धात् पाठः प्रसारितौ।

(३) **दूरदर्शने संस्कृत-पत्र-पत्रिका-परिचर्चा-** दिल्लीदूरदर्शनेन संस्कृतदिवसमुपलक्ष्य २६.८.१९९१ तारिकायां प्रातःकालीनराष्ट्रियप्रसारणे संस्कृतपत्रपत्रिका अवलम्ब्य परिचर्चा प्रसारिता यत्र श्रीमती विजयश्रीः डा. भास्कराचार्यस्त्रिपाठी डा. रमाकान्तशुक्लश्च सहभागित्वं निरवहन्।

(रमा शुक्ला)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लेखक-सङ्केताः

1. डॉ. रमाकान्त शुक्लः, आर-6, वाणी-विहारः, नयी दिल्ली-110059

2. जगद्गुरुश्रीशङ्कराचार्यः, जगद्गुरु शङ्कराचार्य पुष्पगिरि महासमांस्थानम्, पुष्पगिरि-516166

3. न्यायमूर्ति श्री रङ्गनाथ मिश्रः, मुख्यन्यायाधीशः, भारतीय सर्वोच्च न्यायालयः, नयी दिल्ली

4. श्री श्रीसुन्दरराजः (S. Sundararajan) आइ. ए. एस., उड़ीसा सर्वकारस्य विकासायुक्तः, भुवनेश्वरम्-751001

5. डॉ. श्रीमती इला घोष, 15 गंगानगर कॉलोनी, पो. गढ़ा, जबलपुर (म. प्र.)

6. आचार्य गणपति शुक्लः, 13 कुमार मोहल्ला, बड़वाहा (म. प्र.) 451115

7. आनन्दवर्धन शुक्लः, आर-6, वाणी-विहारः, नयी दिल्ली-110059

8. श्रीमती रमा शुक्ला, आर-6, वाणी-विहारः, नयी दिल्ली-110059

'देववाणी-परिषद्, दिल्ली'-कृते डॉ. रमाकान्त शुक्लेन, देववाणी प्रिन्टर्स, उत्तम नगर, नयी दिल्ली- ११००५९ इति मुद्रणालये मुद्रापयित्वा, ६ वाणी-विहारः, नयी दिल्ली-११००५९ तः प्रकाशितम् अर्वाचीनसंस्कृतम् (१३/४) प्रकाशन-तिथिः १५.१०.१९९१ प्रधान सम्पादकः डॉ. रमाकान्त शुक्लः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Arvacheenasanskritam (Qly.) R. N. 34554/79

देववाणी-परिषदा प्रकाशिता: केचन ग्रन्था:

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु०	५०.००
२.	श्रीनेहरूवृत्तम् (आचार्य रमेशचन्द्र शुक्ल:)	रु०	१५.००
३.	श्रीपादसप्तति:(श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु०	४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्ल:)	रु०	२०.००
५.	सदाशयसमुच्चय: (पं० टी० वी० परमेश्वर अय्यर:)	रु०	१५.००
६.	आभाणकमञ्जरी („ „)	रु०	१५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्ल:)	रु०	३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचय: (प्रथम खण्ड) („)	रु०	३०.००
९.	„ „ „ (द्वितीय खण्ड:) („)	रु०	५०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपाद:)	रु०	४०.००
११.	निकषा (उपन्यास:) (डा० केशवचन्द्र दाश:)	रु०	२०.००
१२.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु०	२०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्ल:)	रु०	१८.००
१४.	संस्कृतसाहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु०	१५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्र:)	रु०	१५.००
१६.	गान्धिसूक्तिसप्तशती („ „)	रु०	१५.००
१७.	सुगमरामायणम् (डा० रमेशचन्द्र शुक्ल:)	रु०	६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यर:)	रु०	४०.००
१९.	पूर्णकुम्भ: (ललितनिबन्धसंग्रह:) (पं० विष्णुकान्त शुक्ल:)	रु०	७०.००
२०.	प्रकृतिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु०	३८.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्ल:)	रु०	५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराज:)	रु०	२०.००
२३.	सुरश्मिकाश्मीरम् („) („)	रु०	२०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्ल:)	रु०	१०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० पी० आर० स्वामिनाथन्)	रु०	१०.००
२६.	पण्डितराजीयम् (नाटकम्) (डा० रमाकान्त शुक्ल:)	रु०	२०.००
२७.	नाट्यसप्तकम् („ „)	रु०	६०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्र:)	रु०	१२.००
२९	लक्ष्मीशतकम्, (डा० वरदाचार्यकृष्णन्)	रु०	२०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु०	४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्ल:)	रु०	१०.००
३२.	सारस्वतसमुन्मेष: (डा० विन्ध्येश्वरीप्रसाद मिश्र:)	रु०	२०.००
३३.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्ल:)	रु०	२०.००
३४.	ऋतम् (उपन्यास:) (डा० केशवचन्द्र दाश:)	रु०	२०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहार:, नयी दिल्ली-११००५९.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi